1905 ईसवी में प्रकाशित

प्रस्तावना.

कलिकालाला अनुसरून भारत वर्षांतल्या सर्वमतांस जीर्णावस्था प्राप्त
झाली आहे. तदनुसार आमच्या या अनादिसिद्ध वीरशैवमतालाही ग्लानि
आली आहे. हें जाणून आपल्या औन्नत्याकरितां स्वधर्मांचें पुनरुज्जीवन
करावें, ह्मणून प्रत्येक पंथांतले मताभिमानी सुज्ञ लोक आपापल्या शक्तीला
अनुसरून स्वमतोद्धारार्थ झटत आहेत, ही संतोषाची गोष्ट आहे. त्याप्रमाणें
श्रीमंत अप्पासाहेब वारद सोलापूर हे "वीरशैवलिंगिब्राह्मणधर्मग्रंथमाला"
असें नांव देऊन स्वमतग्रंथांचा शोध करवून सदर मालेंत ग्रंथपुष्प गुंफीत
आहेत, हें सर्वांस विदित झालेंच आहे. सदर मालेंतलेंच हें "सिद्धांतशिखा-
मणि" पुष्प होय. या पुष्पांतल्या मकरंदाचें दिग्दर्शन वीरशैवरसिकां-
करितां करतों.

हा ग्रंथ शिवयोगी रेणुकाचार्यांनें परिश्रम करून शक्तिविशिष्टाद्वैती
वीरशैवलिंगिब्राह्मणांकरितां लिहून ठेवला आहे. यामध्यें वीरशैवांचें
परमरहस्य आहे. पहिल्या भागांत प्रसादिस्थलांपर्यंत वर्णन केलें आहे.
या दुसऱ्या भागांत एकून विषय ८२ आहेत त्यांपैकीं कांहीं येथें उदा-
हरणार्थ सांगतों कीं, पंधराव्या परिच्छेदामध्यें दीक्षागुरुस्थल, शिक्षागुरु-
स्थल, ज्ञानगुरुस्थल, वगैरे विषय आहेत. या स्थलांमध्यें असें वर्णन आहे
कीं,—ज्या दीक्षेनें उत्तम तऱ्हेचें शिवज्ञान होऊन मलमायादि पाशांचीं
बंधनें तुटतील तिला दीक्षा असें ह्मणत असून ती दीक्षा देणारा जो
असेल, त्याला दीक्षागुरु असें ह्मणतात. शिवभक्त शिष्यांस परतत्वप्रकाशक
ज्ञान शिकवितो, ह्मणून त्याला शिक्षागुरु ह्मणतात. शिवपरतत्वरहस्याचा
बोध शिष्याला चांगल्या रीतीनें करून देतो ह्मणून त्याला ज्ञानगुरु ह्मण-
तात. यांशिवाय शिक्षापादोदकस्थल, ज्ञानपादोदकस्थल, श्रीरेणुकाचार्यांनीं ६७
परमताचें खंडन करून शक्तिविशिष्टाद्वैतमताचें स्थापन केलें वगैरे ... १४९
वीरशैवतत्वांतले अतिशय महत्वाचे असून वीरशैवमत सुगम ... १५१

ह्मणणाऱ्या आंधळ्या लोकांस सणसणीत अंजनाप्रमाणें आहेत. या सिद्धांतशिखामणींतल्या अमोघ अमौलिक प्रत्येक विषयाचें मनन करून शिवाद्वैतरहस्याचा उपभोग स्वतः घेऊन इतर अज्ञजनांस त्या सुखाचा लाभ वीरशैव ब्राह्मण करू[illegible]ल अशी आशा करून ही प्रस्तावना संपवितों.

प्रसिद्धिकर्ता.

ह्मैसूरचे रा. रा. वै. वीरसंगप्पा यांनीं कानडी लिपींत छापविलेली प्रत घेऊन वे. शा. सं. कृष्णाजी नारायण जोशी शास्त्री यांच्याकडून मराठींत भाषांतर करविलें आहे.

या ग्रंथाचे प्रूफ, विषयानुक्रमणिका, प्रस्तावना वगैरे करण्याचे कामांत वे॥ मू॥ मल्लिकार्जुनशास्त्री जैनापूर व वे. शा. सं. रंगाचार्य शास्त्री मुधोळकर यांनीं चांगली मेहनत घेतली आहे.

या मंडळीनें परिश्रम केल्याबद्दल यांचे आह्मी आभारी आहों.

द्ण = शके १८२७. सन १९०५

विषयानुक्रमणिका.

भाग २ रा.

परिच्छेद १२

	पृ०
प्राणलिंगिस्थल समजून घेण्याकरितां अगस्त्यानें प्रश्न केला. त्यावर श्रीरेणुकानें उत्तर दिलें. ...	१
प्राणलिंगार्चनस्थलनिरूपण. ...	५
शिवयोगसमाधिस्थलनिरूपण. ...	७
लिंगनिजस्थलनिरूपण.	१२
अंगलिंगस्थलनिरूपण.	१६

परिच्छेद १३

शरणस्थलनिरूपण.	१८
तामसनिरसनस्थलनिरूपण. ...	२२
निर्देशस्थलनिरूपण.	२५
शीलसंपादनस्थलनिरूपण. ...	२७

परिच्छेद १४

ऐक्यस्थलनिरूपण.	३१
आचारसंपत्तिस्थलनिरूपण. ...	३५
एकभाजनस्थलनिरूपण.	४०
सहभोजनस्थलनिरूपण.	४२

परिच्छेद १५

दीक्षागुरुस्थलनिरूपण.	४७
शिक्षागुरुस्थलनिरूपण.	५०
ज्ञानगुरुस्थलनिरूपण	५३
क्रियालिंगस्थलनिरूपण.	५६
भावलिंगस्थलनि०	५८
ज्ञानलिंगस्थलनि०...	६१
स्वयंस्थलनिरूपण.	६४
चरस्थलनिरू०	६६
परस्थलनिरूपण.	६८

परिच्छेद १६

	पृ०
क्रियागमस्थलनिरूपण.	७२
भावागमस्थलनिरूपण.	७६
ज्ञानागमस्थल.	७९
सकायस्थलनिरूपण.	८२
अकायस्थलनिरू०	८४
परकायस्थलनि०	८७
धर्माचारस्थलनि०	९०
भावाचारस्थलनि०	९३
ज्ञानाचारस्थलनि०	९६

परिच्छेद १७

प्रसादिस्थलनि०	९९
इंद्रियानुग्रहस्थलनि०	१०३
प्राणानुग्रहस्थलनि०	१०६
कायार्पितस्थलनि०	१०९
करणार्पितस्थलनि०	१११
भावार्पितस्थलनि०	११४
शिष्यस्थलनि०	११७
शुश्रूषुस्थलनि०	१२०
सेव्यस्थलनि०	१२५

परिच्छेद १८

प्राणलिंगिस्थलाश्रितआत्मस्थलनि०	१२७
अंतरात्मस्थलनिरूपण.	१३३
निर्देहागमस्थलनि०	१३९
निर्भावागमस्थलनि०	१४१
नष्टागमस्थलनि०	१४४
आदिप्रसादिस्थलनि०	१४७
अंत्यप्रसादिस्थलनि०	१४९
सेव्यप्रसादिस्थलनि०	१५१

परिच्छेद १९

शरणस्थलाश्रितदीक्षापादोदक स्थल नि० ... ... १५५
शिक्षापादोदकस्थलनि० ... १६८
ज्ञानपादोदकस्थलनि० ... ... १६१
क्रियानिष्पत्तिस्थलनि० ... ... १६४
भावनिष्पत्तिस्थलनि० ... ... १६७
ज्ञाननिष्पत्तिस्थलनि० ... ... १७०
पिंडाकाशस्थलनि० ... ... १७२
बिंद्वाकाशस्थलनि० ... ... १७५
महाकाशस्थलनि० ... ... १७७
क्रियाप्रकाशस्थलनि० ... ... १८०
भावप्रकाशस्थलनि० ... ... १८३
ज्ञानप्रकाशस्थलनि० ... ... १८५

परिच्छेद २०

ऐक्यस्थलगतस्वीकृतप्रसादैक्यस्थल-निरूपण. १८९
शिष्टोदनस्थलनिरूपण. १९३
चराचरविनाशस्थलनिरू० ... १९५
भांडस्थलनि० ... ... १९८
भाजनस्थलनि० ... ... २००
अंगालेपनस्थलनिरू० ... ... २०४
स्वपराज्ञास्थलनि० ... ... २०६
भावाभावलयस्थलनि० ... ... २०८
ज्ञानशून्यस्थलनि० ... ... २११
अगस्त्यमुनिकृतश्रीरेणुकस्तुतिकथन. २१५
श्रीरेणुकगणेंद्रानें अगस्त्याची प्रशंसा केली. २२१

परिच्छेद २१

अगस्त्यमुनि पाहतां पाहतां श्रीरेणुक अंतर्धान पावले. २१९
श्रीरेणुकगणेंद्र लंकेला गेले. ... २१९
बिभीषणानें श्रीरेणुकाचा सत्कार केला. २२०
बिभीषणरेणुकसंवाद २२०
बिभीषणाचे मनोरथ श्रीरेणुकानें पूर्ण केले. २२५
परमताचें खंडन करून कामिकादि-शिवागमांची प्रतिष्ठा करून (शिवमताचें पुनरुज्जीवन करून) कोल्लिपाकीला श्रीरेणुक गेले. ... २२८
श्रीरेणुकानें सोमेश्वराची स्तुति केली. २२९
श्रीरेणुकास श्रीशिव प्रत्यक्ष झाले, व त्या शिवाच्या ठिकाणीं श्रीरेणुक ऐक्य झाले. २३१
ग्रंथमहत्वकथन. २३३

संस्कृतशुद्धिपत्रिका.

पृष्ठ.	अशुद्धं.	शुद्धं.	ओळ.
२	शिरः कठ	शिरःकठ	२५
१२	वीरशव	वीरशैव	१
१२	प्रभृति देवाः	प्रभृतिदेवाः	३४
१३	साक्षात	साक्षात्	५
१८	वृत्तंः	वृत्तं	११
१९	वेद नांत	वेदनांत	११
२०	सोऽयंज्ञतः	सोऽयंज्ञातः	६
२१	संसार	संसार	२४
३८	कारिकारिकानु	कारिकानु	२३
५३	ज्ञानवदः	ज्ञानप्रदः	२५
१०३	त्यजेतेत्यर्थः	त्यजतीत्यर्थः	२६-२७
१७१	ब्रह्मपर	ब्रह्मपर	१८
१७४	पट्त्रिंश	षट्त्रिंश	५
१८३	पितस्य	तस्य	३
१९१	अद्वतै	अद्वैत	४
२०३	यज्ञेया	ज्ञेया	१७
२०४	भाजवनवतः	भाजनवतः	९
२३२	विस्मि तो	विस्मितो	१९

सिद्धांतशिखामणि ग्रंथाची मराठीशुद्धाशुद्धपत्रिका.

पृष्ठ.	अशुद्ध.	शुद्ध.	ओळ.
२	ह्यांचा	ह्यांतील	२१
३	जसें	ज्याप्रमाणें	१४
३	लोकांस	लोकांच्या	२५
४	भजतात त्यास	भजतात त्यांस	८
४	नाहीं असें	नाहीं; त्या असें	१८
५	करणें त्या	करावी. या	२४
६	कावर	कावरील.	१४
६	अमृतामुळें,	अमृतामुळें, तें	१४
६	असें आहे.	असें होतें.	१४

पृष्ट.	अशुद्ध.	शुद्ध.	ओळ.
८	ह्यास	ह्यांस	३०
९	करणाऱ्यास	करणारा त्यास	१७
११	मलमायादिपाश जाळजाळून	मलमायादिपाशजाल जाळून	१५
१३	लिंगाला	लिंगाची	३०
१४	चंद्राचे	चंद्राच्या	२६
१५	पावतो	पावतो.	३०
१९	हें	ह्यांविषयी	२
१९	प्राणलिंगींच	प्राणलिंगी	३
२०	जसी	ज्याप्रमाणें	११
२१	थोडे प्रकाश	थोड्या प्रकाशाचे	१३
२१	(अल्पसामर्थ्य)	(अल्प सामर्थ्याचे)	१३
२१	डबा	"डबा"	३१
२१	त्याचें	त्यांचें	३१
२२	तो नेह्मी	जो नेह्मीं	२४
२३	होणारी.	होणारी	२२
२३	आंगांत	अंगांत	२४
२७	त्याप्रमाणें	तसा	२४
२८	ज्याचा	जो	१६
२८	आंगांत	अंगांत	२६
२९	त्याचें	ज्याचें	५
२९	त्या	तो	५
२९	मनुष्यास	मनुष्य	६
३०	आंगीं	अंगीं	३
३१	सांग	सांग.	१२
३१	ऐकून.	ऐकून,	१२
३५	भेदबुद्धि	भेदबुद्धी	[illegible]
३५	ह्यापासून	पासून	२
३६	सारखेंच आहे?	सारखींचे आहेत.	२६
४३	निरनिराळे	निरनिराळें	२
४४	शिवस्वामी	शिव स्वामी	४
४४	(धनी) आहें,	(धनी) आहे,	४
४५	विश्व हव्यभुक्	विश्वहव्यभुक्	९

विनंति.

उपयुक्त अशा वीरशैवलिंगिब्राह्मणधर्मग्रंथांपैकीं कोणत्याही पूर्ण अगर अपूर्ण ग्रंथाच्या हस्तलिखितप्रती कोणाजवळ असल्यास त्यांनीं त्या आह्मांकडे अगर रावसाहेब मल्लप्पा बसप्पा वारद सोलापूर यांचेकडे पाठवून देण्याची मेहरबानी करावी. ह्मणजे धर्मग्रंथ छापण्याचे कामीं त्यांचा चांगला उपयोग होईल, व पाठविणारांस धर्मोन्नतीच्या कामीं यथाशक्ति हातभार लावण्याचें श्रेयही मिळेल. त्या ग्रंथाचें काम संपतांच त्यांची मूळप्रत परत करूं व दोन छापील प्रतीही देऊं. आपली मूळप्रत मिळेल किंवा नाहीं याची शंका वाटल्यास, त्यांनीं आपली मूळप्रत परत मिळण्याविषयीं इच्छेप्रमाणें खात्री पटवून घेऊन मग आमचेकडे ग्रंथ पाठविण्याचें करावें.

मणूरमठाध्यक्ष मल्लिकार्जुनशास्त्री.
सोलापूर.

छापत असलेले ग्रंथ.

१ बसवेश्वरपुराण (व्यासकृत) भाग २ रा.
२. संक्षिप्तविवाहविधि.
३. अनादिवीरशैवसारसंग्रह. भाग २ रा.
४. दशकर्मपद्धति.

वरील ग्रंथ मराठी अर्थासह लौकरच तयार होतील.

सार्वजनिकसंस्थांमध्यें सर्व वर्गास हे आमचे ग्रंथ वाचण्यास मिळावे अशा हेतूनें व जंगमांस व गरीब अशा इतर लोकांना देखील वाचावयास मिळावे, या हेतूनें, विक्रीस तयार असलेल्या २१ ग्रंथांची किंमत निम्मी ठेविली आहे. लायब्ररीच्या सेक्रेटरींनीं किंवा मठाच्या अधिकाऱ्यांनीं पुस्तकाची मागणी करावयाची झाल्यास 'वरील संस्थांना पाहिजे आहे, कोणत्या किंमतीनें पाठवा' असा खुलासा पत्रांत करावा.

ग्रंथ मिळण्याचीं ठिकाणें.

सोलापूर येथें रावसाहेब मल्लप्पा बसप्पा वारद यांचे दुकानीं व याशिवाय मुंबई, विजापूर व कलबुर्गा येथें रावसाहेब वारद यांचे दुकानीं विकत मिळतील.

पृ० १३० क्रियासारे चतुर्थोपदेशे—

अष्टावरणविज्ञानी पंचाचारपरायणः ॥
वैदिकं कर्म कुर्वीत ज्ञानैकफलसाधनम् ॥ २९६ ॥

पृ० १३० क्रियासारांतील चौथ्या उपदेशांतील श्लोक—

अर्थ ॥ २९६ ॥ गुरु, लिंग, जंगम, पादोदक, प्रसाद, विभूति, रुद्राक्ष, मंत्र या अष्टावरणाचें ज्ञान असणारा, लिंगाचार, सदाचार, शिवाचार, गणाचार, भृत्याचार या पंचाचारांत निरत असलेला अशा वीरशैवानें ज्ञानाला मुख्य साधन असें वैदिक कर्म करावें.

पारमेश्वरतंत्रे अष्टमपटले.

नमस्तत्पुरुषायाथ महादेवाय ते नमः ॥
नमस्ते वीरशैवाय शिवाय गुरवे नमः ॥ ५२ ॥
वीरशैवमतेशाय महावीराय शंभवे ॥
नमस्ते वीरशैवाय शिवाय गुरवे नमः ॥ ५३ ॥

पारमेश्वरतंत्राच्या आठव्या पटलांतील श्लोक.

अर्थ—॥ ५२ ॥ तत्पुरुष महादेवाला नमस्कार असो. वीरशैव शिवाला व गुरूला नमस्कार असो. ॥ ५३ ॥ वीरशैव मताचा स्वामी, महावीर अशा शंभूला नमन असो. वीरशैव शिवा, आणि गुरो, तुला नमन असो.

शंकरसंहितेंतील ८५ व्या अध्यायांतील श्लोक.

ज्ञानिने शिवभक्ताय ज्ञानशास्त्रस्य पुस्तकम् ॥
दद्याच्छैवाय यो मर्त्यः स सम्यग्ज्ञानवान् भवेत् ॥ २३ ॥
अक्षराणि च यावंति दत्ते भक्ताय पुस्तके ॥
तावद्वर्षं शिवागारे स्थित्वांते मोक्षमाप्नुयात् ॥ २४ ॥
विद्यादानसमं दानं नास्ति लोकेषु सर्वदा ॥
विद्यया प्राणिनां मुक्तिस्तस्मात्तद्दानमुत्तमम् ॥ २५ ॥
ध्यानानामुत्तमं यद्वच्छिवध्यानं प्रकीर्तितम् ॥
दानानामुत्तमं तद्वद्विद्यादानमुदीरितम् ॥ २६ ॥
यो दद्याच्छिवभक्ताय विद्याकोशस्य पुस्तकम् ॥
सर्वकर्मविनिर्मुक्तो न पिबेज्जननीस्तनम् ॥ २७ ॥

दानानां च समस्तानां चत्वार्यैतानि भूतले ॥
श्रेष्ठानि कन्यागोभूमिविद्यादानानि सर्वदा ॥ २८ ॥

अर्थ–॥ २३ ॥ ज्ञानी, शिवभक्त, शैवास ज्ञानशास्त्राचें पुस्तक कोण देतो, तो प्राणी चांगला ज्ञानी होतो. ॥ २४ ॥ शिवभक्ताला दिलेल्या पुस्तकांत किती अक्षरें असतील तितक्या वर्षेंपर्यंत शिवमंदिरांत राहून शेवटीं मोक्षाला जातो. ॥ २५ ॥ विद्यादानासमान दुसरें दान जगांत केव्हांही सांपडत नाहीं. विद्येच्या योगानें प्राण्याला मुक्ति मिळते. ह्मणून विद्यादान श्रेष्ठ आहे, असें ह्मणतात. ॥ २६ ॥ सर्व ध्यानांमध्यें शिवध्यान जसें श्रेष्ठ आहे, तसें सर्व दानांमध्यें विद्यादान श्रेष्ठ आहे, असें सांगितलें आहे. ॥ २७ ॥ शिवभक्ताला जो प्राणी विद्याकोशाचें पुस्तक देतो, तो प्राणी सर्व कर्मांतून मुक्त होऊन पुनः आईचें स्तनपान करीत नाहीं. ॥ २८ ॥ सर्व दानांमध्यें हीं चार दानें जगांत श्रेष्ठ अशीं समजलीं गेलीं आहेत. कन्या, गो, भू, आणि विद्या हीं चार दानें होत.

डाक्तर भाऊदाजी इत्याख्यसंबंधिहस्तलिखितशिवरहस्यस्य सप्तमांशे देवीस्तवनपद्यावलिषु पठिते शिवगौरीसंवादे चतुर्दशाध्याये

गतरत्नकिरीटाश्च विष्णुमुख्याः सुरास्तदा ॥ प्रहृष्टवदनां देवीं तुष्टुवुर्विविधैस्तवैः ॥ देवा ऊचुः ॥ नमो देव्यै नमो देव्यै नमो देव्यै नमो नमः ॥ नमो नमो जगद्धात्र्यै जगद्धात्र्यै नमो नमः ॥ २ ॥ नमो नमस्ते कल्याण्यै मंगलायै नमो नमः ॥ नमो नमस्ते शर्वाण्यै सुखदायै नमो नमः ॥ ३ ॥ नमो नमस्ते भद्रायै शोभनायै नमो नमः ॥ नमो नमस्ते शुद्धायै शांभव्यै ते नमो नमः॥ ४ ॥ नमो नमो नमो मातर्नमो मातर्नमो नमः ॥ नमस्ते परमेश्वर्यै परमायै नमो नमः ॥ ५ ॥ नमस्ते मुक्तिदायिन्यै भुक्तिदायै नमो नमः ॥ नमस्ते विश्वरूपिण्यै विश्वमात्रे नमो नमः ॥ ६ ॥ नमस्ते लिंगधारिण्यै भूतिदायै नमो नमः ॥ नमः संतुष्टचित्तायै पुष्टिदायै नमो नमः ॥ ७ ॥

डाक्तर भाऊदाजी यांनीं लिहिलेल्या शिवरहस्याच्या सातव्या अंशांतील देवीस्तवनपद्यावलीमध्यें असलेल्या शिवगौरीसंवादांतील चौदाव्या अध्यायांतील श्लोकांचा अर्थ.

(१) नत्नमय किरीट शिरावर धारण केलेल्या विष्णुप्रमुख देवांनीं अनेक तऱ्हेनें प्रसन्नमुख देवीची स्तुति केली. (२) देव बोलले हे देवि, देवि, तुला नमस्कार असो, नमस्कार असो. जगाचें पोषण करणारे देवि, जगाचें धारण करणारे देवि, तुला नमस्कार असो. (३) हे कल्याणि, हे मंगले, तुला नमस्कार असो. नमस्कार असो, हे शर्वाणि, हे सुखदायिनि, तुला नमन असो. नमन असो, (४) हे भद्रे, हे शोभने, तुला नमस्कार असो, नमस्कार असो. हे शुद्धे, हे शांभवि, तुला नमन असो नमन असो. (५) हे माते, हे माते, तुला नमन असो, नमन असो. हे परमेश्वरि, हे परमे, तुला नमन असो, नमन असो. (६) मुक्तिदायिनि, भुक्ति देणारे देवि, तुला नमन असो, नमन असो, विश्वरूपिणि, विश्वमाते, तुला नमन असो, नमन असो. (७) इष्टलिंग धारण करणारे देवि, ऐश्वर्य देणारे देवि, तुला नमन असो, नमन असो आनंद मनाचे हे देवि, पुष्टि देणारे हे देवि, तुला नमन असो, नमन असो.

॥ श्रीशिवाय नमः ॥

श्रीसिद्धान्तशिखामण्याख्यं वीरशैवमतबोधकं शास्त्रं.

॥ अथ द्वादशपरिच्छेदप्रारंभः

॥ अथ प्राणलिंगिस्थलम् ॥

॥ अगस्त्य उवाच ॥

श्लोकः–भक्तो माहेश्वरश्चेति प्रसादीति निबोधितः ॥
एक एव कथं चैष प्राणलिंगीति कथ्यते ॥ १ ॥

व्याख्यानं—एक एव भक्तो माहेश्वरः प्रसादीति बोधितः एष च कथं केन प्रकारेण प्राणलिंगीति कथ्यत इति प्रश्नार्थः ॥ १ ॥

अर्थ– ॥ १ ॥ अगस्त्य ह्मणतात रेवणसिद्धा, एक भक्तच माहेश्वर होतो, प्रसादी होतो ह्मणून सांगितलेंस तें समजलें आतां तोच भक्त प्राणलिंगी कसा होतो तें सांग.

॥ श्रीरेणुक उवाच ॥

श्लोकः–भक्तो माहेश्वरश्चैष प्रसादीति च कीर्तितः ॥
कर्मप्राधान्ययोगेन ज्ञानयोगोऽस्य कथ्यते ॥ २ ॥

व्याख्यानं—एषः अयं शिवलिंगदीक्षासंपन्नः कर्मप्राधान्ययोगेन एवंरूपकर्मकांडोक्तक्रियाप्रधानयोगेन भक्त इति माहेश्वर इति प्रसादीति कीर्तितः अस्य एवंविधरूपत्रयसंपन्नस्य ज्ञानयोगः ज्ञानकांडोक्तज्ञानयोगः कथ्यते अनेन ज्ञानयोगेन प्रसाद्येव प्राणलिंगीत्युच्यत इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ रेवण सिद्ध ह्मणतात. अगस्त्यऋषे, भक्तच आपल्या शुद्धाचरणामुळें माहेश्वर होतो, प्रसादी होतो ह्मणून मी तुला सांगितलें आतां कर्माच्या श्रेष्ठपणामुळें त्यास ज्ञानयोग कसा प्राप्त होतो तें सांगतों.

अवतरणिका–अथ कोऽयं प्राणलिंगीत्यत्र "सर्वतत्त्वमयः

प्राणः सर्वज्ञानमयः शिवः॥ अनयोर्योगमेवैतत्प्राणलिंगमिहोच्यते" इति वीरागमोक्तरूपप्राणलिंगवान् प्राणलिंगीत्याह—

श्लोकः—लिंगं चिदात्मकं ब्रह्म तच्छक्तिः प्राणरूपिणी ॥
तद्रूपलिंगविज्ञानी प्राणलिंगीति कथ्यते ॥ ३ ॥

व्याख्यानं—चिद्रूपं ब्रह्मैव शिवलिंगं तच्छक्तिः शिवलिंगपीठशक्तिः प्राणरूपिणी प्रणवात्मकप्राणस्वरूपवती प्रणवस्य वेद्यसंस्कारलक्षणबिंदुघटितत्वात् चित्क्रियासामरस्यलक्षणोन्मेषशक्तिघटितत्वाच्च सर्वतत्वमयत्वमुक्तं तद्रूपलिंगविज्ञानी तत्प्रकारकलिंगज्ञानवान् प्राणलिंगीति कथ्यत इत्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ शिवलिंग ज्ञानस्वरूप आहे, शिवलिंगाची शक्ति ही प्राणस्वरूप आहे त्याचें (लिंगाचें) स्वरूप आणि लिंग ह्यांचें यथार्थज्ञान असणारा भक्त प्राणलिंगी होय असें ह्मणतात.

अवतरणिका—अथास्यापि स्थलभेदाः संति किमित्यत्राह—

श्लोकः—प्राणलिंगिस्थलं चैतत्पंचस्थलसमन्वितम् ॥
प्राणलिंगिस्थलं चादौ प्राणलिंगार्चनं ततः ॥ ४ ॥
शिवयोगसमाधिश्च ततो लिंगनिजस्थलम् ॥
अंगलिंगिस्थलं चाथ क्रमादेषां भिदोच्यते ॥ ५ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥ ५ ॥

अर्थ—॥ ४ ॥ प्राणलिंगिस्थलाचे पांच पोटभेद आहेत ते असे १ प्राणलिंगिस्थल २ प्राणलिंगार्चन स्थल ॥ ५ ॥ ३ शिवयोगसमाधिस्थल ४ लिंगनिजस्थल ५ अंगलिंगिस्थल हे पांच भेद झाले आतां ह्यांचा प्रत्येकाचा काय काय निराळेपणा आहे तो क्रमानें सांगतो.

अवतरणिका—"अथ प्राणेष्वंतर्मनसो लिंगमाहुः ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्ययस्यति ॥ मध्ये वामनमासीनं विश्वेदेवा उपासते" इत्यथर्वशिरः कठवल्लीश्रुत्यनुसारेण प्राणलिंगिस्थलं पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः—प्राणापानसमाघातात्कंदमध्याद्यदुत्थितम् ॥
प्राणलिंगं तदाख्यातं प्राणापाननिरोधिभिः ॥ ६ ॥

व्याख्यानं—प्राणापानसमाघातात् देशिकोपदेशेन प्राणापानवायुसंघट्टने

सति कंदमध्यात् नाभिकंदमध्यात् यज्ज्योतिरुत्थितम् उद्भूतं भवति तत् तज्ज्योतिः प्राणलिंगमिति प्राणापानवायुनिरोधवद्भिः शिवयोगिभिराख्यातं कथितमित्यर्थः॥६॥

अर्थ–॥ ६ ॥ प्राणवायूचा आणि अपानवायूचा रोध करणाऱ्यांनीं प्राणवायु आणि अपानवायु एकमेकांवर आदळले ह्मणजे तेथें बेंबीमध्यें जें तेज उत्पन्न होतें त्यास प्राणलिंग असें ह्मटलें आहे.

अवतरणिका–नन्विदं केन विज्ञातमित्यत्राह—

श्लोकः–प्राणो यत्र लयं याति भास्करे तुहिनं यथा ॥
तत्प्राणलिंगमुद्दिष्टं तद्धारी स्यात्तदाकृतिः ॥ ७ ॥

व्याख्यानं—प्राणः प्राणवायुः यत्र यस्मिन् परब्रह्ममयशिवलिंगे लयं भास्करे तुहिनमिव याति तस्मात्प्राणलिंगमित्युद्दिष्टमुपदिष्टं तद्धारी तत्परामर्शी तदाकृतिः तत्स्वरूपः स्यादित्यर्थः देशकालाद्यचुंबितत्वेन सामान्याकारेण भासमानचिदहंतैव प्राणलिंगमिति भावः ॥ ७ ॥

अर्थ–॥ ७ ॥ सूर्यामध्यें जसें दहिंवर लीन होतें त्याप्रमाणें प्राणवायु परब्रह्ममय शिवलिंगांत लय पावतो त्यामुळें त्यास प्राणलिंग ह्मणतात त्या प्राणलिंगाचा परामर्श (विचार करणारा) तो प्राणलिंगस्वरूप होतो.

अवतरणिका–अथ तल्लिंगं केषां स्फुरतीत्यत्राह—

श्लोकः–ज्ञानिनां योगयुक्तानामंतःस्फुरति दीपवत् ॥
चिदाकारं परं ब्रह्म लिंगमज्ञैर्न भाव्यते ॥ ८ ॥

व्याख्यानं—चिदाकारं स्फुरणरूपं परब्रह्मलिंगं परब्रह्ममयप्राणलिंगं योगयुक्तानां शिवयोगयुक्तानां ज्ञानिनां शिवज्ञानिनां अंतः हृदयकमले दीपवत्स्फुरति प्रकाशते अज्ञैः गुरूपदेशरहितैः प्राकृतैः न भाव्यते न हृदयंगमीक्रियते हृदये वै ब्रह्म सोमसूर्याग्निमंडले निवातदीपोपमस्थायि हृद्यंतर्ज्योतिः पुरुष इत्याद्युपनिषत्प्रसिद्धर्थ ॥ ८ ॥

अर्थ–॥ ८ ॥ तें प्राणलिंग योगसाधन करणाऱ्या ज्ञानी लोकांस मनामध्यें दीपाप्रमाणें प्रकाशमान होतें (समजतें) तें चित्स्वरूप असून श्रेष्ठ ब्रह्मलिंग आहे, तें प्राणलिंग गुरूपदेश नसणाऱ्या इतर अज्ञान मनुष्यांस मुळींच समजत नाहीं.

अवतरणिका– अथैतादृशप्राणलिंगं विहाय बाह्यलिंगनिष्ठा मूढा इत्याह—

श्लोकः–अंतःस्थितं परं लिंगं ज्योतीरूपं शिवात्मकम् ॥
विहाय बाह्यलिंगस्था विमूढा इति कीर्तिताः ॥ ९ ॥

व्याख्यानं—अत्र बाह्यलिंगमिष्टलिंगातिरिक्तप्राकृतलिंगपरं इष्टलिंगस्य चिदानंदघनत्वेनांतरत्वादिति भावः ॥ ९ ॥

अर्थ–॥ ९ ॥ मनांत राहिलेलें तें लिंग (इष्टलिंग) श्रेष्ठ आहे तें तेजोमय असून शिवस्वरूप आहे त्यास सोडून जे लोक बाह्यलिंगावर विश्वास ठेवून त्यास (स्थावरलिंगास) भजतात त्यास अडाणी असें ह्मटलें आहे.

अवतरणिका–तस्माद्बाह्यलिंगविमुखः सन् चिल्लिंगपरामर्श्यैव प्राणलिंगीत्याह—

श्लोकः–संविल्लिंगपरामर्शी बाह्यवस्तुपराङ्मुखः ॥
यः सदा वर्तते योगी प्राणलिंगी स उच्यते ॥ १० ॥

व्याख्यानं—बाह्यवस्तुशब्देन बाह्यलिंगं तत्पूजासाधनीभूतद्रव्यं च कथ्यते तत्र विमुखः सन् सदा निरंतरम् संविल्लिंगपरामर्शी अभ्यंतरे चिद्रूपप्राणलिंगविचारवान् यः शिवयोगी वर्तते स शिवयोगी प्राणलिंगीति कथ्यत इत्यर्थः ॥ १० ॥

अर्थ–॥ १० ॥ जो मनुष्य नेहमीं अभ्यंतरवर्ती (मनांत राहणाऱ्या) चिद्रूप प्राणलिंगास भजतो बाह्यलिंगाचें पूजन आणि तें पूजन करण्यास अवश्य लागणारें सामान मिळविण्याची खटपट करीत नाहीं असें वर्तन करणाऱ्या शिवयोग्यास प्राणलिंगी असें ह्मटलें आहे.

अवतरणिका–ननु बाह्यलिंगादौ वैमुख्यं किंनिबंधनमित्यत्राह—

श्लोकः–मायाविकल्पजं विश्वं हेयं संचित्य नित्यशः ॥
चिदानंदमये लिंगे विलीनः प्राणलिंगवान् ॥ ११ ॥

व्याख्यानं—विश्वं मायाविकल्पजं मायिकगुणभेदसंजातमिति हेयं त्यजनीयमिति संचिंत्य सम्यग्विभाव्य नित्यशः सदा चिदानंदमये सच्चिदानंदरूपे लिंगे प्राणलिंगे विलीनः मनोलयवान् प्राणलिंगी प्राणलिंगवानिति कथ्यत इत्यर्थः ॥ ११ ॥

अर्थ–॥ ११ ॥ हें त्रैलोक्य मायेच्या (अज्ञानाच्या) विकल्पापासून झालेलें आहे हें टाकण्यास योग्य आहे असें नेहमीं लक्ष्यांत आणून चैतन्यस्वरूप आणि आनंदस्वरूप अशा प्राणलिंगामध्यें ज्याचें मन नेहमीं निमग्न असतें त्यास प्राणलिंगी असें ह्मणावें.

अवतरणिका–ननु चिल्लिंगस्य नादबिंदुकलातीतत्वात् प्राणस्य नादबिंदुकलारूपत्वात् कथं तस्य पीठरूपत्वं संभवतीति शंकां शमयन् प्राणलिंगिस्थलं समापयति —

श्लोकः–सत्ता प्राणमयी शक्तिः सद्रूपं प्राणलिंगकम् ॥
तत्सामरस्यविज्ञानात्प्राणलिंगीति कथ्यते ॥ १२ ॥

व्याख्यानं—सतो भावः सत्तेत्यस्मीत्युत्तमपुरुषांतर्गतस्फूर्तिरेव चिल्लिंगस्य प्राणमयी जीवनभूता शक्तिः तादृशस्फुरणाभावे जडत्वप्रसंगात् सद्रूपं तादृशस्फुरणवदुत्तमपुरुषमयं प्राणलिंगमित्यर्थः । तत्सामरस्यविज्ञानात् । तयोश्शिवशक्त्योरन्योन्यसामरस्यविज्ञानात् प्राणलिंगीति कथ्यत इत्यर्थः ॥ १२ ॥

॥ इति प्राणलिंगिस्थलम् ॥

अर्थ–॥ १२ ॥ सत्ता ही प्राणस्वरूप शक्ति आहे, प्राणलिंग हें सत्स्वरूप आहे त्या दोहोंच्या ऐक्याचें ज्ञान झाल्यामुळें त्यास प्राणलिंगी असें ह्मणतात.

अथ प्राणलिंगार्चनस्थलम् ॥

अवतरणिका–अथ प्राणलिंगिना विधीयमानसकलयोगशास्त्रप्रसिद्धप्राणलिंगार्चनप्रकारं सप्तभिः सूत्रैः प्रतिपादयति—

श्लोकः–अंतर्गतं चिदाकारं लिंगं शिवमयं परम् ॥
पूज्यते भावपुष्पैर्यत्प्राणलिंगार्चनं हि तत् ॥ १ ॥

व्याख्यानं—हृत्कमलगतं चिदाकारं घटस्य कंबुग्रीवादिमत्त्वमिव चित्स्फुरणमाकारं स्वरूपं यस्य तादृशम् परं सर्वोत्कृष्टं यत् शिवमयं लिंगं शिवस्वरूपविश्वप्राणलिंगं भावपुष्पैः अंतःकरणवृत्तिविशेषैः पूज्यते तत् प्राणलिंगार्चनमिति हि प्रसिद्धमित्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ अन्तर्गत (हृदयकमलांत राहणारें) प्राणलिंग चित्स्वरूप असून श्रेष्ठ आहे आणि शिवस्वरूप आहे त्याची भक्तिरूपपुष्पांनीं पूजा करणें त्या पूजेला प्राणलिंगार्चन ह्मणतात.

अवतरणिका–अथ कुत्र पूजनीयमित्यत्र प्राणलिंगाश्रयभूतोर्ध्वहृत्कमलं वर्णयित्वा भावपुष्पैः पूजनीयमित्याह—

श्लोकः–अंतः पवनसंस्पृष्टे सुसूक्ष्मांबरशोभिते ॥
मूर्धन्यचंद्रविगलत्सुधासेकातिशीतले ॥ २ ॥

श्लोकः–बद्धेंद्रियनवद्वारे बोधदीपे हृदालये ॥
पद्मपीठे समासीनं चिल्लिंगं शिवविग्रहम् ॥
भावयित्वा सदाकालं पूजयेद्भाववस्तुभिः ॥ ३ ॥

व्याख्यानं—अंतः पवनसंस्पृष्टे प्राणवायुव्याप्ते सुसूक्ष्मांबरशोभिते अतिसूक्ष्माकाशविलसिते ब्रह्मरंध्रगतपूर्णचंद्रमंडलस्रवत्सुधासेकेनातिशीतले प्रतिबद्धश्रोत्रादिपंचेंद्रियनवद्वारे शिवज्ञानप्रदीपे ऊर्ध्वहृदयसदने पद्मपीठे द्वादशदलकमलकर्णिकायां समासीनं विद्यमानं शिवविग्रहं मंगलमूर्तिम् चिल्लिंगं प्राणलिंगं भावयित्वा गुरूपदिष्टप्रकारेण ध्यात्वा भाववस्तुभिः मानसिकपदार्थैः सदा पूजयेदित्यर्थः ॥ २ ॥ ३ ॥

अर्थ–॥ २ ॥ भक्ताचें चित्तरूपी मंदिर आंतील पंचप्राणरूपीवायु वाहण्यामुळें नेहमीं थंडगार असतें, त्यांतच अगदीं थोडा आकाशाचा भाग (पोंकळपणा) असतो, तो भक्त स्वतः त्या वेळीं शंकरस्वरूप झाला असल्यामुळें मस्तकावर (शिवमस्तकावरील) चंद्रामुळें पाझरणाऱ्या अमृतामुळें थंडगार असें आहे. ॥ ३ ॥ त्या मंदिरास दोन डोळे, दोन कान, दोन नाकपुड्या जीभ शौच आणि मूत्र करण्याचीं दोन इंद्रियें हीं इंद्रियरूपी नऊ दारें आहेत, त्यांत शिवज्ञानरूपी दीपाचा प्रकाश पडतो त्या ऊर्ध्वहृदयरूप मंदिरांत पद्मसिंहासनावर (द्वादशदलकमलकर्णिकेंत) शिवस्वरूपी प्राणलिंग बसलें आहे. असें गुरूनें सांगितल्याप्रमाणें ध्यान करून नेहमीं चांगल्या चांगल्या मानसिक वस्तूंनीं त्या प्राणलिंगाची पूजा करावी.

अवतरणिका–अथ तानि वस्तूनि कानीत्यत्राह—

श्लोकः–क्षमाभिषेकसलिलं विवेको वस्त्रमुच्यते ॥
सत्यमाभरणं प्रोक्तं वैराग्यं पुष्पमालिका ॥ ४ ॥
गंधः समाधिसंपत्तिरक्षता निरहंकृतिः ॥
श्रद्धाधूपो महाज्ञानं जगद्भासि प्रदीपिका ॥ ५ ॥
भ्रांतिमूलप्रपंचस्य निवेद्यं तन्निवेदनम् ॥
मौनं घंटापरिस्पंदस्तांबूलं विषयार्पणम् ॥ ६ ॥
विषयभ्रांतिराहित्यं तत्प्रदक्षिणकल्पना ॥
बुद्धेस्तदात्मिका शक्तिर्नमस्कारक्रिया मता ॥ ७ ॥

एवंविधैर्भावपुष्पैरुपचारैरदूषितैः ॥
प्रत्युन्मुखमना भूत्वा पूजयेल्लिंगमांतरम् ॥ ८ ॥

व्याख्यानं—क्षमैवाभिषेकोदकम् नित्यानित्यवस्तुविवेक एव वसनम् सत्यमनंनृतवचनमाभरणम् वैराग्यं इहामुत्र फलभोग विराग एव कुसुममालिका चित्तैकाग्रतैव गंधः निरहंकार एवाक्षताः विश्वास एव धूपः विश्वप्रकाशकं महाज्ञानं दीपः अत्र भ्रांतिशब्देनाज्ञानं लक्ष्यते नाहमीश्वर इत्यज्ञानस्य मूलप्रपंचस्य शरीराद्यहंकारवर्गस्य यन्निवेदनम् तन्नैवेद्यं मौनं घंटानादः तस्य अनाहतनादानुसंधान हेतुत्वात् विषयाणां मातृमानमेयात्मकानां फेनादेस्तरंगद्वारा समुद्रैकल्लोलीभाव इव मेयं माने मानं मातरि तं परमप्रमातरि ज्योतिर्लिंगे लयचिंतनमेव पूगपर्णचूर्णात्मकतांबूलसमर्पणमित्यर्थः विषयाणां शब्दादीनां शिवापेक्षया भेदभ्रांतिराहित्यं प्रदक्षिणं बुद्धेः तदात्मिका लिंगरूपता शक्तिः सामर्थ्यं बुद्धिवृत्तेर्लिंगे लय इत्यर्थः स च नमस्कारः एवंविधैर्भावशुद्धैरनिंदितैरुपचारैः अबहिर्मुखमनाः सन् आंतरं चिल्लिंगं प्राणलिंगं पूजयेदित्यर्थः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

॥ इति प्राणलिंगार्चनस्थलम् ॥

अर्थ—॥ ४ ॥ त्या मानसिकपूजेस क्षमा (शांति) रूप अभिषेकाकरितां निर्मल जलें घ्यावें. विवेक (खरें काय खोटें काय हा विचार) हें वस्त्र घ्यावें. सत्यभाषण हें अलंकार ह्मणून घ्यावें, वैराग्य ही फुलांची माळा घ्यावी. ॥ ५ ॥ शिवयोगसमाधिसंपत्ति ही गंध मानावी, अभिमान मुळींच नाहींसा करणें ह्या अक्षता ह्मणून घ्याव्या, भक्तिरूप धूप करून उत्तम शिवज्ञानरूपी जगाचें यथार्थज्ञान करून देणारा दीप आहे असें मानावें. ॥ ६ ॥ भ्रांतींत पाडण्यास मूळ कारण असा प्रपंच नैवेद्य ह्मणून उपयोगास आणावा, मौनरूपी घंटा वाजवावी, विषयोपभोगाची आशा मुळापासून नाहींशी करणें हा तांबूल ह्मणून समर्पण करावा. ॥ ७ ॥ विषयसुखाची भ्रांति सोडून देणें ही प्रदक्षिणा समजावी बुद्धि शिवस्वरूपाकडे एकाग्रमनानें लावणें हा नमस्कार होय. ॥ ८ ॥ ह्या प्रकारच्या मानसिक पुष्पांनीं आणि निर्दोष प्रकारच्या उपचारांनीं त्या लिंगस्वरूपाकडे आपलें एकाग्रपणानें लक्ष्य लाऊन प्राणलिंगाची पूजा करावी.

अथ शिवयोगसमाधिस्थलम् ॥

अवतरणिका—अथ चित्तवृत्तिनिरोधो योग इति योगसूत्रानुसारेण प्राणलिंगार्चनलभ्यशिवयोगसमाधिस्थलं निरूपयति—

श्लोकः—अंतःक्रियारतस्यास्य प्राणलिंगार्चनक्रमैः ॥
शिवात्मध्यानसंपत्तिः समाधिरिति कथ्यते ॥ १ ॥

व्याख्यानं—प्राणलिंगार्चनक्रमैः पूर्वोक्तप्राणलिंगार्चनप्रकारैः अंतरंगक्रियातत्परस्यास्य प्राणलिंगिनः शिवात्मध्यानसंपत्तिः लिंगांगरूपशिवजीवसमानसामरस्यानुसंधानसंपत्तिरेधिरित्यर्थः ॥ १ ॥

अर्थ—॥ १ ॥ प्राणलिंगाच्या पूजेच्या पूर्वी सांगितलेल्या प्रकारांनीं ह्याप्रमाणें अंतरंगक्रिया करण्यांत तत्पर असणाऱ्या ह्या प्राणलिंगीची लिंगांगरूप शिवजीव समान सामरस्यानुसंधान संपत्ति असते तिलाच समाधि असें ह्मणतात.

अवतरणिका—तत्कथमित्यत्र योऽसावसौ पुरुषः सोऽहमिति श्रुत्यनुसारेणाजपागायत्रीरूपशिवयोगेन समाधिं कथयति—

श्लोकः—सर्वतत्वोपरिगतं सच्चिदानंदभासुरम् ॥
स्वप्रकाशमनिर्देश्यमवाङ्मानसगोचरम् ॥ २ ॥
उमाख्यया महाशक्त्या दीपितं चित्स्वरूपया ॥
हंसरूपं परात्मानं सोऽहंभावेन भावयेत् ॥
तदेकतानतासिद्धिः समाधिः परमो मतः ॥ ३ ॥

व्याख्यानं—सर्वतत्वोपरिगतं भूम्यादिशिवांतषट्त्रिंशत्तत्वोत्तीर्णत्वेन विद्यमानं सच्चिदानंदरूपेण प्रकाशमानं "यतो वाचो निवर्तंते अप्राप्य मनसासह" इति श्रुतेः वाङ्मनोमार्गातीतं अतएवेदमेतादृगिति लक्षितुमशक्यं प्रत्यक्षादिमानांतरागम्यं शुक्लपटन्यायेन स्वसमवेतस्फुरणरूपोमाख्यमहाशक्तिप्रदीपितम् हंसरूपं परमात्मानं सोऽहंभावेन स एवाहमिति भावेन भावयेत् तदेकतानतासिद्धिः तयोर्जीवेश्वरयोरेकत्वसिद्धिः परमः समाधिः उत्कृष्टसमाधिरिति मतम् संमतमित्यर्थः तच्छब्दवाच्यस्य षडध्वोत्तीर्णत्वेन प्रसिद्धस्य परमात्मनः अहंशब्दस्य रूढत्वाल्लोके जीवात्मवस्तुनीति सूतसंहितोक्तेः अकारादिहकारांतवर्णाध्वपाशबद्धस्य जीवात्मनश्च अहमस्मि प्रथमं चेति अहमादिर्हि देवानां अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इत्यादि प्रमाणबलात् अकारः शिव अभिख्यातो हकारः शक्तिरुच्यते इति वक्ष्यमाणप्रकारेण षडध्वकारणीभूतानाहतनादलक्षणपरावाक्छक्तिमयास्मद्रूपसमाविष्टात्मकत्वानतिरिक्तत्वेन तादात्म्यचिंतनं समाधिरिति भावः ॥ २ ॥ ३ ॥

अर्थ—॥ २ ॥ सर्व तत्वांच्या (पृथ्वीपासून शिवापर्यंत असणाऱ्या ३६ तत्वांच्या) वर असणारें, सत् चित् आणि आनंद ह्यामुळें प्रकाशमान दिसणारें आहे, आपल्याप्रकाशानेंच आपण प्रकाशित होणारें आहे, तें असुकप्रकारचें आहे ह्मणून सांगतां येण्यासारखें नाहीं, तें वाचा आणि मन ह्यास समजण्यासारखें नाहीं. ॥ ३ ॥ उमा (पार्वती) नांवाची चित्स्वरूप महाशक्ति आहे त्या

शक्तीमुळें तें प्रकाशित दिसतें तें हंसस्वरूप असून परमेश्वर आहे त्यास "तोच मी" अशा बुद्धीनें मनांत स्मरण करावें. तीच शिवजीवांची एकाग्रपणाची सिद्धि आहे व तीच परमसमाधि श्रेष्ठ आहे असें मानलेलें आहे. × "इति"

अवतरणिका–अथ "प्राणरूप इह जीव उच्यते लिंगरूप इति शंकरः स्मृतः ॥ यस्तदैक्यमिति वेदितानयोः प्राणलिंगविदसौ शिवयोगी" इति शंकरसंहितावचनानुसारेण समाधिस्थस्य लक्षणमाह—

श्लोकः–परब्रह्ममहालिंगं प्राणो जीवः प्रकीर्तितः ॥
तदेकभावमननात्समाधिस्थः प्रकीर्तितः ॥ ४ ॥

व्याख्यानं—महालिंगमेव परब्रह्म परब्रह्माख्यपरशिवतत्वमिति प्रोक्तं "प्राणारूढो भवेज्जीव" इत्यागमोक्तेः प्राणः प्राण एव जीव इति प्रोक्तः तदेकभावमननात् लिंगप्राणमधिकृत्य विद्यमानयोर्लिंगांगिनोः शिवजीवयोः समानसमरसैक्यचिंतावान् समाधिस्थः शिवयोगसमाधिनिष्ठ इति प्रकीर्तित इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ महालिंग हें परब्रह्मस्वरूप आहे व प्राणास जीव ह्मणतात त्या महालिंगास आणि प्राणास अनुसरून असणारा, लिंगांगरूप शिवजीवांच्या समान सामरस्याच्या ऐक्याचें चिंतन करणाऱ्यास समाधिनिष्ठ ह्मणावें.

अवतरणिका–अथ गुदमवष्टभ्याधाराद्वायुमुत्थाप्य स्वाधिष्ठानं त्रिः प्रदक्षिणीकृत्य मणिपूरकं गत्वा अनाहतमतिक्रम्य विशुद्धौ प्राणलिंगं निरुध्य आज्ञामनुयान् ब्रह्मरंध्रं ध्यायन् त्रिमात्रोहमिति सर्वदा ध्यायेदिति हंसोपनिषद्वचनानुसारेण सकलसमाधिं प्रकाशयति—

श्लोकः–अंतःषट्कर्मरूढानि पंकजानि विभावयेत् ॥
ब्रह्मादिस्थानभूतानि भ्रूमध्यांतानि मूलतः ॥ ५ ॥
भ्रूमध्यादूर्ध्वभागे तु सहस्रदलमंबुजम् ॥
भावयेत्तत्र विमलं चंद्रबिंबं तदंतरे ॥ ६ ॥
सूक्ष्मरंध्रं विजानीयात्तत्कैलासपदं विदुः ॥
तत्रस्थं भावयेच्छंभुं सर्वकारणकारणम् ॥ ७ ॥

व्याख्यानं—अंतः जीवेश्वराश्रयीभूतसूक्ष्मशरीरमध्ये षट्चक्ररूढानि षट्चक्रो-

त्पन्नानि पंकजानि षट्कमलानि मूलत आधारमारभ्य भ्रूमध्यांतानि आज्ञाचक्रांतानि ब्रह्मादिस्थानभूतानि भावयेत् गुरूपदिष्टप्रकारेण चिंतयेत् भ्रूमध्यादूर्ध्वभागे तु ब्रह्मरंध्र इत्यर्थः सहस्रदलमंबुजम् सहस्रशक्तिदलालंकृतकमलं भावयेत् तत्र तत्कमलमध्ये विमलं निर्मलं चंद्रबिंबं सोममंडलं भावयेत् एतदंतरे तच्चंद्रमंडलमध्ये सूक्ष्मरंध्रं वालाग्रसमानातिसूक्ष्मरंध्रं विजानीयात् उपदेशाज्जानीयात् तत् तत्सूक्ष्मरंध्रम् कैलासपदं कैलासस्थानं सत् विदुः शास्त्रज्ञा जानीयुः तत्रस्थं शंभुं शिवं सर्वकारणकारणं ब्रह्मादिकारणेशानामपि कारणीभूतं संतं भावयेत् स्वात्माभेदेन ध्यायेदित्यर्थः ॥ ५ ॥ ६ ॥ ७ ॥

अर्थ–॥ ५ ॥ आपल्या सूक्ष्मशरीरांत सहा कर्मांवर उगवलेलीं सहा कमलें आहेत, असें मानावें तीं मुळापासून (आधारचक्रापासून) भ्रूमध्यापर्यंत (आज्ञाचक्रापर्यंत) सहा होतात त्यांचीं स्थानें १ गुद २ गुह्य ३ नाभि ४ हृदय ५ कंठ ६ भ्रूमध्य हीं होत. हीं सहा चक्रें ब्रह्मादिस्थान आहेत. ॥ ६ ॥ भ्रूमध्याच्या वरच्या जागीं (ब्रह्मरंध्रांत) सहस्र शक्तिरूपदलांनीं शोभणारें कमल आहे अशी कल्पना करावी त्या कमलांत स्वच्छ चंद्रमंडल आहे असें समजावें. ॥ ७ ॥ त्या चंद्रमंडलांत सूक्ष्मरंध्र गुरूपदेशानें जाणावें त्यास कैलासपद म्हणून मानतात, त्या जागीं शंकर बसलेला आहे, अशी कल्पना करावी, तो शंकर सर्वप्रकारच्या कारणास (ब्रह्मादिककारणेशांसही) कारण आहे.

अवतरणिका–अथाधारस्वाधिष्ठानगतपृथ्वीजलसंघट्टनेन मणिपूरकाख्यनाभिकंदमुत्पत्त्य तदुद्भूतानाहताख्यहृदयद्वादशदलकमले तपिन्यादिद्वादशकलायुक्तसूर्यमंडलं भाति ॥ तदुपरि षोडशदलयुक्तविशुद्धिकमले अमृतादिषोडशकलायुक्तचंद्रमंडलं विभाति तदुपरि द्विदलयुक्ताज्ञाचक्रे ज्वलिन्यादिदशकलात्मकवह्निमंडलं प्रकाशते तदुपरि सहस्रदलालंकृतब्रह्मचक्रे तदष्टत्रिंशत्कलोपेतकुंडलीमंडलोपरि लिंगांगसामरस्यलक्षणशिवयोगसमाधिसंपन्नस्य प्राणलिंगिनः शिवानंदव्यतिरेकेण मायिकसुखानुभवो नास्तीति सूत्रद्वयेनाह—

श्लोकः–बहिर्वासनया विश्वं विकल्पार्थं प्रकाशते ॥

अंतर्वासितचित्तानामात्मानंदः प्रकाशते ॥ ८ ॥

व्याख्यानं—इदमिति बहिर्मुखेन संस्कारेण सर्वं जगत् संकल्पविकल्पार्थं

प्रकाशते अहमित्यंतर्मुखे परिमिलितचित्तानां आत्मानंदः शिवानंद एव प्रकाशत इत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ बाहेरील वासनेनें संस्कारानें पाहूं लागलें असतां सर्व जग नानाप्रकारच्या संकल्पविकल्पनांनीं भरलेलें दिसून येतें. मनांत अन्तर्दृष्टीनें विचार केल्यास विचार करणारांस आत्मस्वरूपाचें यथार्थज्ञान होतें.

अवतरणिका–ननु बहिर्वासना कथं गच्छतीति तत्राह—

श्लोकः–आत्मारणिसमुत्थेन प्रमोदमथनात्सुधीः ॥
ज्ञानाग्निना दहेत्सर्वं पाशजालं जगन्मयम् ॥ ९ ॥

व्याख्यानं—सुधीः प्राणलिंगी प्रमोदमथनात् शिवसुखस्य विचारात् आत्मारणिसमुत्थेन ज्ञानाग्निना शिवाभेदज्ञानाग्निना सर्वं जगन्मयं मलमायादिपाशसमूहं दहेत् भस्मीकुर्यादित्यर्थः ॥ ९ ॥

अर्थ–॥ ९ ॥ ज्ञानी मनुष्यानें (प्राणलिंगीनें) आत्मारूपअरणीवर शिवसुखविचाररूप मंथा घांसतांना त्यापासून उत्पन्न झालेल्या शिवाभेद ज्ञानरूप अग्नीनें सर्व त्रैलोक्यरूप मलमायादिपाश जाळजाळून टाकावें. (ज्ञानी मनुष्यानें आत्मस्वरूपाचें यथार्थ ज्ञान करून घेऊन त्रैलोक्याचा पसारा (मायिक) खोटा आहे ह्मणून ओळखावा.

अवतरणिका–अथ शिवध्यानमहत्वं सूत्रद्वयेन कथयन् शिवयोगसमाधिस्थलं समापयति—

श्लोकः–संसारविषवृक्षस्य पंचक्लेशपलाशिनः ॥
छेदने कर्ममूलस्य परशुश्शिवभावना ॥ १० ॥

व्याख्यानं—धर्माधर्मलक्षणकर्ममूलस्य अविद्यादिपंचक्लेशलक्षणपर्णवतः जननमरणलक्षणसंसारविषवृक्षस्य छेदने शिवध्यानमेव परशुरित्यर्थः १० ॥

अर्थ–॥ १० ॥ संसार (जननमरण) हा एक विषवृक्ष आहे, त्यास अविद्या वगैरे पांच पानें आहेत; धर्माधर्मरूप कर्म हें त्या संसारवृक्षाचें मूळ आहे. तो वृक्षमुळापासून तोडून टाकण्यास शिवध्यान ही कुऱ्हाड आहे. (शिवभक्ति केली ह्मणजे संसाराचा नाश होतो.)

अज्ञानराक्षसोन्मेषकारिणः संहृतात्मनः ॥
शिवध्यानं तु संसारतमसश्चंडभास्करः ॥ ११ ॥

व्याख्यानं—अज्ञानलक्षणराक्षसनयनोन्मीलनकारिणः निबिडतरसंसारांधकारस्य शिवध्यानं चंडभास्करः प्रचंडमार्तंड इत्यर्थः ॥ ११ ॥

॥ इति शिवयोगसमाधिस्थलम् ॥

अर्थ–॥ ११ ॥ संसार हा अंधकार आहे त्यामुळें अज्ञानरूप राक्षसांचा प्रसार होतो, आणि आत्मस्वरूपज्ञानाचा लय होतो. त्या संसारांधकाराचा नाश करण्यास शिवध्यान सूर्यासारखें तेजःपुंज आहे. (शिवध्यानानें संसाराचा नाश होतो.)

॥ अथ लिंगनिजस्थलम् ॥

अवतरणिका–अथैवंविधशिवयोगसंपन्नस्य प्रत्यक्षीभूतलिंगनिजस्थलं निरूपयति—

श्लोकः–स्वांतस्थशिवलिंगस्य प्रत्यक्षानुभवस्थितिः ॥
यस्यैव परलिंगस्य निजमित्युच्यते बुधैः ॥ १ ॥

व्याख्यानं—स्वात्मनि तादात्म्येन स्थितस्य शिवलिंगस्य यया प्रत्यक्षानुभवस्थितिः देशकालाकारकृतसंकोचाभावेन सामान्यतोऽहमिति प्रत्यक्षानुभवस्थितिरस्ति सैव परलिंगस्य महालिंगस्य निजमिति निजस्वरूपमिति बुधैः आत्मतत्वज्ञानिभिः उच्यते कथ्यत इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ आत्म्यांत तादात्म्यानें असलेल्या शिवलिंगाची प्रत्यक्षानुभव स्थिति ज्याच्यापासून आली आहे तीच स्थिति महालिंगाचें निजस्वरूप होय असें आत्मतत्वज्ञानी ह्मणतात.

अवतरणिका–अथ तत्स्वरूपं सूत्रद्वयेन प्रकटयति—

श्लोकः–ब्रह्मविष्ण्वादयो देवाः सर्वे वेदादयस्तथा ॥
लीयंते यत्र गम्यंते तल्लिंगं ब्रह्म केवलम् ॥ २ ॥

व्याख्यानं—ब्रह्मविष्णुप्रभृति देवाः वेदागमपुराणादिशब्दसमूहाश्च यत्र लयं गच्छंति पुनः प्रकाशयंति तत् लिंगं लिंगशब्दाभिधेयं केवलं ब्रह्म ब्रह्मैवेत्यर्थः ॥२॥

अर्थ–॥ २ ॥ ब्रह्मदेव विष्णु वगैरे सर्वदेव आणि चार वेद ह्या लिंगस्वरूपांतच लीन होतात व लिंगस्वरूपापासूनच उत्पन्न होतात. तें हें लिंग प्रत्यक्ष ब्रह्मस्वरूप आहे.

अवतरणिका–ननु लिंगशब्दाभिधेयं विश्वोत्पत्तिलयस्थानं ब्रह्मैव चेत् तच्छिवस्वरूपं वा तद्व्यतिरिक्तं वा इत्यत्राह—

श्लोकः–चिदानंदमयः साक्षाच्छिव एव निरंजनः ॥
लिंगमित्युच्यते नान्यद्यतः स्याद्विश्वसंभवः ॥ ३ ॥

व्याख्यानं—यतः ब्रह्मस्वरूपलिंगात् विश्वसंभवः विश्वोत्पत्तिः स्यात् तल्लिंगं ब्रह्मस्वरूपलिंगं चिदानंदमयः सच्चिदानंदस्वरूपः निरंजनः दोषरहितः साक्षात् प्रत्यक्षीभूतः शिव एवेत्युच्यते नान्यत् अन्यद्वस्तु नोच्यत इत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ शिव हा सच्चिदानंदस्वरूप आहे, निरंजन (निर्दोष) आहे, त्यालाच लिंग ह्मणतात दुसरें कांहीं नाहीं· त्या लिंगापासून जग निर्माण होतें·

अवतरणिका–अथ निष्कर्षमाह—

सी. एन.

श्लोकः–बहुनात्र किमुक्तेन लिंगमित्युच्यते बुधैः ॥
शिवाभिधं परं ब्रह्म चिद्रूपं जगदास्पदम् ॥ ४ ॥

व्याख्यानं—अत्र अस्मिन्विषये बहुभाषणेन किम् जगदाधारभूतस्फुरणस्वभावं परब्रह्मैव शिवाभिधम् परशिवाभिधानं लिंगं निजलिंगमिति बुधैः शास्त्रज्ञैरुच्यत इत्यर्थः ॥ ४ ॥

अर्थ—॥ ४ ॥ फार सांगण्यांत अर्थ नाहीं, ज्ञाते लोक ह्मणतात कीं, लिंग हें परब्रह्मस्वरूप चित्स्वरूप आहे, त्यास शिव असें नांव असून सर्व त्रैलोक्य त्या लिंगस्वरूपांत राहतें (लिंग हें सर्व जगास आश्रयभूत आहे.)

अवतरणिका–मायिकवेदांतमतसिद्धं लिंगं निजलिंगं न भवतीति सूत्रद्वयेन प्रतिपादयति—

श्लोकः–वेदांतवाक्यजां विद्यां लिंगमाहुस्तथा परे ॥
तदसज्ज्ञेयरूपत्वाल्लिंगस्य ब्रह्मरूपिणः ॥ ५ ॥

व्याख्यानं—वेदांतवाक्यजां "प्रज्ञानं ब्रह्म अहंब्रह्मास्मि तत्त्वमसि अयमात्मा ब्रह्म" इत्यादि वेदांतवाक्यप्रकाशितां विद्यां तथा तत्प्रकारकं निजलिंगं सत् अपरे वेदांतज्ञानिनः आहुः तत् तद्वेदांतवाक्यप्रकाशितज्ञानलिंगं ब्रह्मरूपिणः परब्रह्मस्वरूपिणो लिंगस्य ज्ञेयरूपत्वात् निजलिंगरूपचिदहं प्रकाशवेद्यत्वात् असत् अप्रशस्तमित्यर्थः प्रमाणानां प्रमातृभित्तिलग्नत्वेनैव प्रमेयप्रकाशकत्वनियमात् अन्यथा बौद्धमतप्रवेशापत्तेः ब्रह्मलिंगस्य प्रमेयपदप्रविष्टत्वेन प्रमाणांतरसापेक्षत्वादिति ॥ ५ ॥

अर्थ–॥ ५ ॥ दुसरे कितीएक लोक वेदांतवाक्यापासून उत्पन्न झालेल्या विद्येलाच (ज्ञानालाच) लिंग ह्मणतात, परब्रह्मस्वरूपी लिंगाला प्रमेय वस्तूंत

गणना केल्यामुळें त्याप्रमाणें वेदान्तवाक्यजन्य ज्ञानच लिंग ह्मणून ह्मणतात तें खोटें आहे.

अवतरणिका–अथ मतांतरं निराकरोति—

श्लोकः–अव्यक्तं लिंगमित्याहुर्जगतां मूलकारणम् ॥
लिंगी महेश्वरश्चेति मतमेतदसंगतम् ॥ ६ ॥

व्याख्यानं—जगतां मूलकारणमव्यक्तं मायातत्वं लिंगमित्याहुः महेश्वरो लिंगी चेति लिंगवानित्याहुः एतन्मतं "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं" इति श्वेताश्वतराणां मतं असंगतं प्राणलिंगिनामसंमतम् प्रकृतेर्जडत्वेन हेयकोटिप्रविष्टत्वादिति ॥ ६ ॥

अर्थ–॥ ६ ॥ सर्व जगाला मूलकारण अशा मायातत्वालाच लिंग असें ह्मणतात महेश्वर व लिंगी ह्मणून मानतात हें मत मायेलाच प्रकृति ह्मणून मानावें महेश्वराला मायी ह्मणतात हें सांगणारें श्वेताश्वतरमत प्राणलिंगीस मान्य नाहीं कारण प्रकृतीला जडत्व असल्यामुळें तें टाकण्यास योग्य आहे. ह्या कारणानें त्यांचें मत असंगत आहे.

अवतरणिका–"अथ न तत्र सूर्यो भाति न चंद्रतारकम् नेह विद्युतो भांति कुतोऽयमग्निः तमेवभांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति कठवल्लीश्रुत्यनुसारेण प्राणलिंगिनां संमतं निजलिंगस्वरूपं सूत्रद्वयेन प्रतिपादयति—

श्लोकः–न सूर्यो भाति तत्रेंदुर्न विद्युन्न च पावकः ॥
न तारका महालिंगे द्योतमाने परात्मनि ॥ ७ ॥

व्याख्यानं—परात्मनि परमात्मनि महालिंगे द्योतमाने सति तत्र तस्मिन् महाप्रकाशे न सूर्यः सूर्यो न भाति नेंदुः चंद्रो न भाति पावको न भाति विद्युच्च न भाति नक्षत्राणि च न भांति ॥ ७ ॥

अर्थ–॥ ७ ॥ तें श्रेष्ठ प्राणलिंग परमेश्वर आहे तें स्वतः प्रकाशित (प्रकट) झाल्यावर त्याच्या तेजापुढें सूर्याचें तेज ह्मणजे कांहींच नाहीं, मग चंद्रांचे तेजाची, विजेच्या तेजाची विस्तवाच्या तेजाची किंवा नक्षत्रांच्या तेजाची काय प्रतिष्ठा आहे ?

अवतरणिका–तर्हि तेषां भासनं कथमित्यत्राह—

श्लोकः–ज्योतिर्मयं परं लिंगं श्रुतिराह शिवात्मकम् ॥
तस्य भासा सर्वमिदं प्रतिभाति न संशयः ॥ ८ ॥

व्याख्यानं—शिवात्मकं परं लिंगं महालिंगमेव ज्योतिर्मयं अन्यानपेक्षप्रकाशरूपं तस्मात् तस्य भासा ज्योतिर्लिंगप्रकाशेनैव इदं सर्वं सूर्यचंद्रादिकं सर्वं प्रति भाति अत्र संदेहो नास्तीति कठवल्लीश्रुतिराहेत्यर्थः अयं भावः वन्ह्यर्कसोमानां मातृमानमेयात्मकत्रिपुटीमयप्रपंचरूपत्वात् एतेषां प्रकाशः महालिंगप्रकाशाधीन- इति सिद्धत्वेन पुनस्तन्महालिंगं वेदांतजन्यज्ञानप्रकाश्यमित्यंगीकृतं चेत् पराधीनः प्रकाशत्वेनात्यंतजडत्वप्रसंगात् अप्रमेयं स्वप्रकाशं वस्तु निजलिंगशब्दार्थः अस्मन्मते निगमागमादिप्रमाणानां स्वशक्तिमयत्वेन स्वसंवेद्यत्वान्न दोष इति ॥ ८ ॥

अर्थ—॥ ८ ॥ वेद सांगतो कीं, लिंग हें श्रेष्ठ असून तेजःपुंज आहे, शिवस्वरूप आहे, त्या लिंगाच्या प्रकाशामुळेंच आपल्याला हें सर्व जग दिसत आहे ह्यांत शंका नाहीं.

अवतरणिका—अथ सूत्रद्वयेन लिंगमहत्वमुक्त्वा निजलिंगस्थलं समापयति—

श्लोकः—लिंगान्नास्ति परं तत्वं यदस्माज्जायते जगत् ॥
यदेतद्रूपतां धत्ते यदत्र लयमश्नुते ॥ ९ ॥

C. N. Kalburgi

व्याख्यानं—यत्र लिंगे यतः यस्मात्कारणात् यज्जगज्जायते उत्पद्यते यज्जगत् एतद्रूपतां स्थितिरूपतां धत्ते दधाति यज्जगत् लयं संहारं अश्नुते अनुभवति तस्मात्कारणात् अस्माल्लिंगात् अन्यानपेक्षभासमानस्वप्रकाशमयनिजलिंगात् परं तत्वं नास्ति ॥ ९ ॥

अर्थ—॥ ९ ॥ लिंगापेक्षां श्रेष्ठ तत्व दुसरें कांहीं नाहीं कां तर ह्या लिंगापासूनच सर्व जग उत्पन्न झालें आहे ह्या लिंगापासूनच जगाचें रक्षण होतें व शेवटीं सर्व जग ह्या लिंगांतच लय पावतें.

श्लोकः—तस्माल्लिंगं परं ब्रह्म सच्चिदानंदलक्षणम् ॥
निजरूपमिति ध्यानात्तदवस्था प्रजायते ॥ १० ॥

व्याख्यानं—तस्मात् सच्चिदानंदस्वरूपं परब्रह्मैव निजरूपं लिंगं निजरूपमिति ध्यानात् चिंतनात् तदवस्थालिंगमेव निजमित्यवस्था प्रजायते प्रकाशत इत्यर्थः ॥ १० ॥

इति लिंगनिजस्थलं ॥

अर्थ—॥ १० ॥ ह्यासाठीं लिंग हें परब्रह्म आहे, तें सत्, चित् आणि आनंद अशा स्वरूपाचें आहे हें सर्व माझेंच रूप आहे. असें ध्यान केलें ह्मणजे तशीच अवस्था प्राप्त होते (ध्यान करणारा मनुष्य लिंगस्वरूपाशीं ऐक्य पावतो.

अथांगलिंगस्थलम् ॥

अवतरणिका—अथ लिंगनिजांगिनमंगलिंगिनं सूत्रद्वयेन निरूपयति—

श्लोकः—ज्ञानमंगमिति प्राहुर्ज्ञेयं लिंगं सनातनम् ॥
विद्यते तद्द्वयं यस्य सोऽगलिंगीति कीर्तितः ॥ १ ॥

व्याख्यानं—ज्ञानं शिवज्ञानवान् जीवः अंगं अंगमिति प्राहुरित्यर्थः ज्ञेयं तेन-शिवज्ञानवतानेन साक्षात्करणीयं वस्तु सनातनं नित्यं लिंगमिति प्राहुः "द्वासुपर्णा-सयुजासखायाविति" श्रुतेः एतद्द्वयं अंगलिंगद्वयं यस्य प्राणलिंगिनो वर्तते सोऽग-लिंगी कीर्तित इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ शिवज्ञानविशिष्ट जीवाला अंग ह्मणतात जाणून घ्यावयाच्या वस्तूस सनातन लिंग ह्मणतात तीं दोन्ही (ज्ञान आणि लिंग) ज्याला आहेत त्यास अंगलिंगि असें ह्मणावें.

अवतरणिका—अथैवं चेत् भेदवादिमतप्रवेशो जात इत्य-त्राह—

श्लोकः—अंगे लिंगं समारूढं लिंगे चांगमुपस्थितम् ॥
एतदस्तिद्वयं यस्य स भवेदंगलिंगवान् ॥ २ ॥

व्याख्यानं—अंगे जीवात्मनि लिंगं शिवलिंगं समारूढं सामरस्येनास्ति लिंगे शिवलिंगे अंगं जीवः उपस्थितं सामरस्येनास्ति एतद्द्वयं यस्यास्ति बीजांकुरन्यायेनैवं-विधज्ञानद्वयं यस्य प्राणलिंगिनोऽस्ति सोऽगलिंगवानित्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ अंगांत (जीवांत) लिंग मिळून जावें व लिंगांत अंग (जीव) मिसळून जावें अशा तऱ्हेची दोहोंचीही एकत्र स्थिति ज्याची झालेली आहे त्यास अंगलिंगि असें ह्मणावें.

अवतरणिका—नन्वत्र ज्ञानमात्रमेव विवक्षितं किमित्यत्राह—

श्लोकः—ज्ञात्वा यः सततं लिंगं स्वांतस्थं ज्योतिरात्मकम् ॥
पूजयेन्भावयन्नित्यं तं विद्यादंगलिंगिनम् ॥ ३ ॥

व्याख्यानं—यः प्राणलिंगी स्वांतस्थं स्वहृदयकमलस्थं ज्योतिरात्मकं ज्योतिर्मयं सततं नित्यं लिंगं निजलिंगं ज्ञात्वा सामरस्यरूपं श्रुतिगुरुस्वानुभवैर्विदित्वा पूजयेत् ध्यायेत् तं प्राणलिंगिनं विद्यात् जानीयादित्यर्थः ॥ ३ ॥

अर्थ-॥ ३ ॥ जो मनुष्य आपल्या हृदयांत असणारें तेजःपुंज प्राणलिंग

यथार्थरीतीनें जाणून त्याचें ध्यान करून त्याची दररोज पूजा करितो त्यास अंगलिंगी असें ह्मणावें.

अवतरणिका–अथ निजलिंगपर्यायनामान्युक्त्वा तत्र दृढचित्तवान् जीवन्मुक्त इति सूत्रत्रयेण कथयति—

श्लोकः–ज्ञायते लिंगमेवैकं सर्वैः शास्त्रैः सनातनैः ॥
ब्रह्मेति विश्वधामेति विमुक्तेः पदमित्यपि ॥ ४ ॥
मुक्तिरूपमिदं लिंगमिति यस्य मनःस्थितिः ॥
स मुक्तो देहयोगेऽपि स ज्ञानी स महागुरुः ॥ ५ ॥

व्याख्यानं—एकं निजलिंगमेव परब्रह्मेति ज..धारमिति परमुक्तिस्थानमिति "विरूपनित्यया वाचा" इति श्रुतेः आरंभविवक्षाध्यवसायोक्तिरूपेण शिवशक्तिमयत्वात् सनातनैः नित्यैः सर्वैः शास्त्रैः निगमागमादिप्रमाणैः ज्ञायते इदं निजलिंगं मुक्तिरूपं परमुक्तिस्वरूपमिति यस्य प्राणलिंगिनो मनः स्थितिः सः देहयोगेऽपि मुक्तः पुनर्जन्मांतराभावाज्जीवन्मुक्तः स ज्ञानी स एव शिवज्ञानवान् स महागुरुः श्रीगुरुरित्यर्थः ॥ ४ ॥ ५ ॥

अर्थ–॥ ४ ॥ अनादिकालापासून चालत आलेलीं सर्वशास्त्रें असें ह्मणतात कीं, लिंग हेंच काय तें एक परब्रह्म आहे, सर्वत्रैलोक्याचा आधार आहे, व मोक्षाचें स्थानही आहे. ॥ ५ ॥ हें लिंग मोक्षप्राप्ति करून देणारें आहे (मूर्तिमन्त मोक्षच आहे) अशी ज्याच्या मनाची पुरती समजूत झालेली आहे तो मनुष्य देहधारी (जिवंत) असला तरी मुक्तच आहे असें समजावें तो मनुष्य मोठा ज्ञानी असून श्रेष्ठ गुरु आहे असें समजावें.

अवतरणिका–अथैवं लिंगनिजज्ञानशून्यानां मुक्तिर्नास्तीत्याह—

C. N. Kalburgi

श्लोकः–अनादिनिधनं लिंगं कारणं जगतामिति ॥
ये न जानंति ते मूढा मोक्षमार्गबहिष्कृताः ॥ ६ ॥

व्याख्यानं—अनादिनिधनं उत्पत्तिविनाशरहितमित्यर्थः शिष्टं स्पष्टं ॥ ६ ॥

अर्थ–॥ ६ ॥ लिंगास जन्म नाहीं व मरणही नाहीं, लिंग हें सर्व त्रैलोक्यास कारण आहे, (लिंगापासून सर्व त्रैलोक्य उत्पन्न झालें) जे लोक ह्या लिंगास जाणत नाहींत (ज्यांस लिंगाची माहिती नाहीं) ते मूर्ख आहेत ते लोक मोक्षमार्गाचे अधिकारी नव्हत (त्यांस मोक्ष होणार नाहीं.)

अवतरणिका–अथ प्राणलिंगार्चनादिधर्मवान्प्राणलिंग्येव ज्ञानपरिपाकवशात् शरण इत्यभिधानवानित्युक्त्वा प्राणलिंगिस्थलं समापयति—

वृत्तंः–यः प्राणलिंगार्चनभावपूर्वैर्धर्मैरुपेतः शिवभावितात्मा ॥
स एव तुर्यः परिकीर्तितोऽसौ संविद्विपाकाच्छरणाभिधानः॥७॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण विरचिते सिद्धान्तशिखामणौ प्राणलिंगिनः पंचस्थलप्रसंगो नाम द्वादशीयः परिच्छेदः समाप्तः

व्याख्यानं—यः प्राणलिंगी प्राणलिंगपूजाचारप्रमुखैः धर्मैः शिवाचारैः समेतः सन् लिंगरूपेण भावितांगस्वरूपवान् तुर्यः भक्तापेक्षया चतुर्थः स एवासौ प्राणलिंगी ज्ञानपरिपाकवशात् शरण इत्यभिधानवानित्यर्थः ॥ ७ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां द्वादशीयः परिच्छेदः

अर्थ–॥ ७ ॥ जो भक्त प्राणलिंगाचें पूजन भक्तिरूप (वासनारूप) पुष्पांनीं करितो, आपले धर्म योग्यरीतीनें पाळतो, नेहमीं मनांत शिवाचेंच स्मरण करितो, त्याचें ज्ञान परिपूर्ण स्थितीला येऊन पोंचलें असल्यामुळें त्यास चवथ्या अधिकाराचा भक्त ह्मणजे शरण असें ह्मणावें. (तो भक्त शरण होय.)

ह्याप्रमाणें श्रीवीरशैव धर्माचा निर्णय असलेल्या सिद्धान्तशिखामणि ग्रंथांतील प्राणलिंगी पांचस्थलांचें वर्णन असलेला बारावा परिच्छेद संपला.

अथ त्रयोदशीयः परिच्छेदः

श्रीशिवायनमः ।

अथ शरणस्थलम्

अवतरणिका–अथागस्त्यप्रश्नः अगस्त्य उवाचेति—

श्लोकः–माहेश्वरः प्रसादीति प्राणलिंगीति बोधितः ॥
कथमेष समादिष्टः पुनश्शरणसंज्ञकः ॥ १ ॥

व्याख्यानं—माहेश्वरः प्रसादीति बोधितः प्राणलिंग्येव पुनः कथं केन प्रकारेण शरणाभिधानवानित्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ अगस्त्य ह्मणाले रेवणसिद्धा, माहेश्वर प्रसादी आणि प्राणलिंगी हें क्रमाक्रमानें आपण मला सांगितलें आतां प्राणलिंगीच काय केल्यानें शरण होतो हें सांगा. अगस्त्यानें असा प्रश्न केल्यावर रेवणसिद्ध ह्मणाले–

अवतरणिका–अस्य प्रश्नस्योत्तरं निरूपयति रेणुक उवाचेति-

श्लोकः–अंगलिंगी ज्ञानरूपस्सती ज्ञेयः शिवः पतिः ॥
यत्सौख्यं तत्समावेशे तद्वान् शरणनामवान् ॥ २ ॥

व्याख्यानं—ज्ञानरूपः शिवज्ञानमेव स्वरूपं यस्य स तादृशः शिवज्ञानवानित्यर्थः अंगलिंगी अंगलिंगसामरस्यवान् प्राणलिंगी सतीति ज्ञेयः शिवः शिवलिंगमेव पतिः पतिरिति ज्ञेयः तत्समावेशे तयोरंगलिंगरूपयोः स्त्रीपुरुषयोः समानसमरसरूपयोगे यत्सौख्यं यथा "यथा स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नांतरम् एवमेवायं पुरुष प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेदनांतरं" इति बृहदारण्यश्रुतिप्रसिद्धं यत्सौख्यं अस्ति तद्वान् तादृशसौख्यवान् शरणनामवानित्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ अंगलिंगी (लिंगांगसामरस्याचे स्थितीचा अनुभव घेणारा) शिवज्ञानसंपन्न असतो तो सती समजावा व शिव हा पति समजावा. स्त्रीपुरुष दोघेही एकविचाराचे असल्यास एकमेकांपासून एकमेकांस जें सुख होतें तें सुख शरणास असतें. तशा रीतीच्या सुखाचा अनुभव घेणाऱ्यास शरण ह्मणावें.

अवतरणिका–अथ अस्यापि स्थलभेदोऽस्ति किमित्यत्राह—

श्लोकः–स्थलमेतत्समाख्यातं चतुर्धा धर्मभेदतः ॥
आदौ शरणमाख्यातं ततस्तामसवर्जनम् ॥ ३ ॥
ततो निर्देशमुद्दिष्टं शीलसंपादनं ततः ॥
क्रमाल्लक्षणमेतेषां कथयामि निशम्यताम् ॥ ४ ॥

व्याख्यानं—एतत्स्थलं शरणस्थलं धर्मभेदतः आचारभेदात् चतुर्धा चतुर्विधमिति समाख्यातम् । आदौ शरणस्थलम् तदनंतरम् तामसनिरसनस्थलम् ततो निर्देशस्थलम् अथ शीलसंपादनस्थलम् उद्दिष्टमुपदिष्टं एषां चतुर्णां लक्षणं क्रमाद्वदिष्यामि श्रूयतामित्यर्थः॥ ३ ॥ ४ ॥

अर्थ-॥ ३ ॥ हें शरणस्थल होय, त्याचे चार पोटभेद आहेत १ शरणस्थल २ तामसवर्जनस्थल ॥ ४ ॥ ३ निर्देशस्थल ४ शीलसंपादनस्थल हे चार पोटभेद होत, क्रमाक्रमानें ह्या प्रत्येकाचें लक्षण सांगतों तें तूं नीट लक्ष्य देऊन ऐक.

P. N. Kolbarg(?)

अवतरणिका–"सती चाहं पतिर्लिंगं हृदि युक्तः स्वयं प्रभुः॥ प्रापंचिकसुखं नास्ति शरणस्थलमुत्तमं" इति शंकरसंहितावचनानुसारेण शरणस्थलं निरूपयति—

श्लोकः–सतीव रमणे यस्तु शिवे शक्तिं विभावयन् ॥
तदन्यविमुखः सोऽयंज्ञातः शरणनामवान् ॥ ५ ॥

व्याख्यानं—रमणे प्राणकांतविषये सतीव पतिव्रतास्त्रीव यस्तु शिवे शिवलिंगविषये शक्तिं स्वात्मानं स्त्रियं भावयन् तदन्यविमुखः शिवलिंगादन्यत्र देवतांतरे तिर्यङ्मुखः सन् अस्ति सोऽयं शरणवान् शरणस्थलवानिति ज्ञातः ज्ञातुं योग्य इत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ पतिव्रता स्त्री आपल्या पतीची जसी मनोभावानें सेवा करिते त्याचप्रमाणें जो शिवाची सेवा करितो, शिव आपला पति असून आपण सती आहों असें मानतो (सतीप्रमाणें दृढ निश्चयानें शिवसेवा करितो) शिवाखेरीज इतर देवांकडे कधींही पाहत नाहीं अशा त्या ज्ञानी मनुष्यास शरण म्हणावें.

अवतरणिका–अथ बहुदृष्टांतपूर्वकं शिवलिंगासक्त एव शरणइत्युपपादयति—

श्लोकः–परिज्ञाते शिवे साक्षात्कोवान्यमभिकांक्षति ॥
निधाने महति प्राप्ते कः काचं याचतेऽन्यतः ॥ ६ ॥

व्याख्यानं—शिवे परमशिवे साक्षात् प्रसिद्धश्रुत्यादिप्रमाणैः परिज्ञाते ब्रह्मादिभ्यो महानिति ज्ञाते सति कोवान्यं कांक्षति न कांक्षतीत्यर्थः यथा महति निधाने प्राप्ते सति अन्यतः अन्यस्मात् काचं काचमणिं को याचते न कोऽपि याचत इत्यर्थः तथा शिवादन्यत्र देवतांतरे विमुखः शरण इत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ शिवाचें यथार्थ ज्ञान झाल्यावर मग दुसऱ्या देवांची कोण इच्छा करील? अनायासें द्रव्याचा ठेवा सांपडला असतां कांचेचे तुकडे मला द्या म्हणून दुसऱ्याकडे मागण्यास कोण जाईल? कोणी जाणार नाहीं.

शिवानंदं समासाद्य को वान्यमुपतिष्ठते ॥
गंगामृतं परित्यज्य कः कांक्षेन्मृगतृष्णिकाम् ॥ ७ ॥

व्याख्यानं—शिवानंदं शिवलिंगसुखं समासाद्य प्राप्य कः देवतांतरम् उपतिष्ठते आश्रयति नाश्रयतीत्यर्थः गंगोदकं परित्यज्य कः मृगतृष्णिकाम् मरीचिकाजलम् कांक्षेत् इच्छेत् तथा शिवादन्यत्र विमुखः शरण इत्यर्थः ॥ ७ ॥

C. N. Kalburgi

अर्थ-॥ ७ ॥ शिवस्वरूपाचें यथार्थ ज्ञान होऊन त्यापासून उत्पन्न होणारा आनंद झाला असतां दुसऱ्या देवांस शरण कोण जाईल ? गंगानदीचें गोड पाणी प्यावयास मिळालें असतां तें टाकून देऊन पाण्यासारख्या दिसणाऱ्या झळयाच्या मागोमाग पाण्याच्या आशेनें कोण धांवेल ? कोणी धांवणार नाहीं.

संसारतिमिरच्छेदे विना शंकरभास्करम् ॥
प्रभवंति कथं देवाः खद्योता इव देहिनाम् ॥ ८ ॥

व्याख्यानं—खद्योताः अल्पप्रकाशिनः प्राणिविशेषाः यथांधकारनिवारणे समर्था न भवंति भास्करः समर्थो भवति तथा संसारतिमिरच्छेदे शंकरभास्करं विना ब्रह्मादयो देवास्समर्था न भवंतीति शिवादन्यत्र विमुखः शरण इत्यर्थः ॥ ८ ॥

अर्थ-॥ ८ ॥ प्राणिमात्रांचा संसाररूप आंधार नाहींसा करण्यास शंकररूप सूर्यावांचून दुसरा कोण समर्थ आहे ? शंकराखेरीज इतर देव काजव्यासारखे थोडे प्रकाश (अल्पसामर्थ्य) आहेत त्यांच्यानें संसाररूप अंधकाराचा पुरेतपणीं नाश कसा होईल ? होणार नाहीं.

संसारार्तः शिवं यायाद्ब्रह्माद्यैः किं फलं सुरैः ॥
चकोरस्तृषितः पश्येच्चंद्रं किं तारका अपि ॥ ९ ॥

व्याख्यानं—तृषितः पिपासार्दितः चकोरः चंद्रं यथा पश्येत् तारका न पश्येत् तथा संसारेण श्रमितः ब्रह्माद्यैः किं फलमिति शिवमेवाश्रयेत् तादृशचकोरवदन्यत्र विमुखः शिवशरण इत्यर्थः ॥ ९ ॥

C. N. Kalburgi

अर्थ-॥ ९ ॥ संसारदुःखानें पीडलेल्या मनुष्यानें शंकरासच शरण जावें इतर देवांस शरण जाऊन काय उपयोग आहे ? चकोरपक्षी तहान लागल्यावर चंद्रासच शरण जातो, चांदण्यांस (नक्षत्रांस) शरण जात नाहीं.

शिव एव समस्तानां शरण्यः शरणार्थिनाम् ॥
संसारोरगदष्टानां सर्वज्ञः सर्वदोषहा ॥ १० ॥
शिवज्ञाने समुत्पन्ने परानंदः प्रकाशते ॥
तदासक्तमना योगी नान्यत्र रमते सुधीः ॥ ११ ॥

व्याख्यानं—संसारसर्पदष्टानां समस्तानां शरणार्थिनां सर्वज्ञः सर्वदोषघ्नः शिव एव रक्षक इति शिवमाहात्म्यज्ञाने समुत्पन्ने सति परमानंदाविर्भावो जायते तदासक्तचित्तः शिवयोगी अन्यत्र देवतांतरे न रमत इत्यर्थः ॥ १० ॥ ११ ॥

अर्थ- ॥ १० ॥ संसाररूप साप चावल्यामुळें "ह्या दुःखांतून आपणांस सोडवा ह्मणून शरण आलेल्या सर्व प्राणिमात्रांचें दुःख दूर करून त्याचें रक्षण कर-

ण्यास शिवच एक समर्थ आहे, तो सर्वज्ञ आहे. ॥ ११ ॥ एकवेळ शिवज्ञान प्राप्त झालें असतां अतिशय आनंद होतो, त्या शिवानंदांत निमग्न झालेला चांगली बुद्धि असणारा योगी दुसऱ्या कोणत्याही सुखाची आवड करीत नाहीं.

अवतरणिका—अथोक्तार्थमुपसंहरन् शरणस्थलं समापयति—

श्लोकः—तस्मात्सर्वप्रयत्नेन शंकरं शरणं गतः ॥
तदनंतसुखं प्राप्य मोदते नान्यचिंतया ॥ १२ ॥

व्याख्यानं—तस्मात् कारणात् सर्वप्रयत्नेन मनोवाक्कायकर्मणा शिवं शरणं गतः रक्षणविचक्षण इति ज्ञात्वा प्रपन्नः तदनंतसुखं प्राप्य तस्माच्छिवात् अनंतसुखं लब्ध्वा मोदते अन्यचिंतया देवतांतरचिंतया न मोदत इत्यर्थः ॥ १२ ॥

इति शरणस्थलम् ॥

अर्थ— ॥ १२ ॥ त्यामुळें हरएकप्रकारानें (सर्वतोपरी) शिवास शरण गेलेला भक्त अतिशय सुखाचा उपभोग घेत आनंदानें राहतो त्यास दुसरी कोणत्याही प्रकारची काळजी राहत नाहीं.

अथ तामसनिरसनस्थलम् ॥

अवतरणिका—अथ शरणेन विधीयमानतामसनिराकरण-स्थलं निरूपयति—

श्लोकः—शिवासक्तपरानंदमोदिना गुरुणा यतः ॥
निरस्यंते तमोभावास्स तामसनिरासकः ॥ १ ॥

व्याख्यानं—शिवासक्तः सन् परानंदानुमोदिना गुरुणा श्रेष्ठेन शरणेन तमोभावाः तमोविकाराः यतः कारणात् निरस्यंते निवार्यंते ततः तस्मात् सः तामसनिरासको भवेदित्यर्थः ॥ १ ॥

अर्थ—॥ १ ॥ जो नेहमीं शिवभक्तींत निमग्न असतो आणि त्याच अत्यानंदामुळें तो नेहेमी आनंदित असतो त्या गुरूस शरण ह्मणतात, त्या गुरूमुळें आपले अज्ञानविकार दूर होतात ह्मणून त्यास तामसनिरासक शरण असें ह्मणतात.

अवतरणिका—ननु तमोभावाः किमर्थं निराकरणीया इत्यत्राह—

श्लोकः—यस्य ज्ञानं तमोमिश्रं न तस्य गतिरिष्यते ॥
सत्वं हि ज्ञानयोगस्य नैर्मल्यं विदुरुत्तमाः ॥ २ ॥

व्याख्यानं—नैर्मल्यं निर्मलसाधनं सदित्यर्थः शिष्टं स्पष्टं तस्मात्तमोविकारा निराकरणीया इति भावः ॥ २ ॥

अर्थ-॥ २ ॥ ज्याचें ज्ञान तमोगुणानें युक्त आहे, त्यास सद्गति होत नाहीं ज्ञानीलोक ज्ञानयोगाला निर्दोषरीतीचा सत्वगुण उपयोगीं पडतो असें ह्मणतात.

अवतरणिका—अथ "सत्वात्सुखं च ज्ञानं च वैराग्यं सौख्यमेव च ॥ दुःखप्रवृत्तिरागौ च लौहित्यं रजसो भवेत् ॥ मोहो भ्रांतिस्तथालस्यं कार्ष्ण्यं च तमसो भवेत् " ॥ इति सूतसंहितावचनानुसारेण गुणत्रययुक्तान्प्रकाशयति—

श्लोकः—शमो दमो विवेकश्च वैराग्यं पूर्णभावना ॥
क्षांतिः कारुण्यसंपत्तिः श्रद्धा सत्यसमुद्भवा ॥ ३ ॥
शिवभक्तिः परो धर्मश्शिवज्ञानस्य बांधवाः ॥
एतैर्युक्तो महायोगी सात्विकः परिकीर्तितः ॥ ४ ॥

व्याख्यानं—शमः शांतिः दमः बाह्येंद्रियनिग्रहः विवेकः नित्यानित्यवस्तुविचारः वैराग्यं विषयविरक्तिः पूर्णभावना अखंडध्यानं क्षांतिः क्षमा कारुण्यसंपत्तिः भूतदया सत्यसमुद्भवा यथार्थवस्तुसंभवा श्रद्धा विश्वासः शिवभक्तिः परो धर्मः उत्कृष्टशिवाचारः शिवज्ञानस्य बांधवाः एते शिवज्ञानस्य संबंधिनः एतैर्दशगुणैर्युक्तो महायोगी सात्विक इति सत्वगुणयुक्त इति प्रकीर्तितः ॥ ३ ॥ ४ ॥

अर्थ-॥ ३ ॥ शम, (अन्तरिंद्रियनिग्रह) दम, (बहिरिंद्रियनिग्रह) विवेक-(नित्यानित्य वस्तुविचार) वैराग्य, (विषयविरक्ति) पूर्णभावना, (अखंडज्ञान) क्षांति, (क्षमा) कारुण्य, (भूतदया) श्रद्धा (विश्वास) हे गुण व खरेपणापासून उत्पन्न होणारी. ॥ ४ ॥ शिवभक्ति व उत्कृष्ट शिवाचार हे वर सांगितलेले गुण शिवज्ञानास फार उपयोगीं पडतात. हे सर्व गुण ज्या योग्याच्या आंगांत आहेत त्यास सात्विक असें ह्मणतात.

अवतरणिका—नन्वेतैर्गुणैर्युक्तस्य महायोगिनः कदाचिद्वा कामक्रोधादयः संभवंति किमित्यत्राह—

श्लोकः—कामक्रोधमहामोहमदमात्सर्यवारणाः ॥
शिवज्ञानमृगेंद्रस्य कथं तिष्ठंति सन्निधौ ॥ ५ ॥

व्याख्यानं—शिवज्ञानस्य मत्तमनोगजनिग्रहकरत्वेन सिंहरूपत्वात् तस्य संनिधौ कामक्रोधादिगजस्थितेरवकाशो नास्तीत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ काम, क्रोध, महामोह (अज्ञान) मद, मात्सर्य हे सर्व हत्तीसारखे आहेत ते सर्वजण शिवज्ञानरूप सिंहाच्याजवळ कसे राहतील? राहणार नाहींत. (शिवज्ञानी मनुष्यांस कामक्रोधादिक षड्रिपूंचा विकार होत नाहीं.)

अवतरणिका–अथ रजोगुणयुक्तं प्रदर्शयति—

श्लोकः–यत्र कुत्रापि वा द्वेष्टि प्रपंचे शिवरूपिणि ॥
शिवद्वेषी स विज्ञेयो रजसाविष्टमानसः ॥ ६ ॥

व्याख्यानं—यः रजसाविष्टमानसः रजोगुणकार्यभूतकामक्रोधाद्यावृतचित्तः सन् शिवरूपिणि प्रपंचे यत्र क्वापि द्वेष्टि स शिवद्वेषी राजस इति शेषः विज्ञेयः ज्ञातुं योग्य इत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ ज्याचें मन रजोगुणात्मक झालेलें असतें, तो मनुष्य प्रसंग पडेल त्यावेळीं शिवस्वरूप असणाऱ्या प्रपंचाचा द्वेष करितो त्यास शिवद्वेषी असें ह्मणावें.

अवतरणिका–अथ तमोगुणयुक्तं लक्षयति—

श्लोकः–यो द्वेष्टि सकलान् लोकान् यो वाऽहंकुरुते सदा ॥
योऽसत्यभावनायुक्तः स तामस इति स्मृतः ॥ ७ ॥

व्याख्यानं—स्पष्टं ॥ ७ ॥

अर्थ–॥ ७ ॥ जो मनुष्य सर्व प्राणिमात्रांचा द्वेष करितो व नेहमीं अभिमानानें फुगलेला असतो, नेहमीं खोट्या कल्पना करितो त्याला तामस असें ह्मणतात.

अवतरणिका–अथायं तमोगुणः शिवशरणानां नास्तीति श्लोकद्वयेनोक्त्वा तामसनिरसनस्थलं समापयति—

श्लोकः–तमोमूला हि संजाता रागद्वेषादिपादपाः ॥
शिवज्ञानकुठारेण छेद्यंते हि निरंतरम् ॥ ८ ॥

व्याख्यानं—तमोगुणरूपमूलवंतः संतः संजाताः रागद्वेषादिपादप्राः कामक्रोधादिराजसवृक्षाः शिवज्ञानकुठारेण सात्विकशिवज्ञानरूपपरशुना सदा छेद्यंते हि प्रसिद्धं ॥ ८ ॥

अर्थ–॥ ८ ॥ रागद्वेष वगैरे झाडें तमोगुणरूप मूळापासून उगवतात तीं झाडें शिवज्ञानरूप कुऱ्हाडीनें निरंतर तोडिलीं पाहिजेत. (शिवज्ञानाखेरीज रागद्वेष वगैरेंचा नाश होत नाहीं.)

अवतरणिका–ननु तमोमूलकत्वेन संजातरागद्वेषादिपाद-

ग्रानां शिवज्ञानकुठारेण छेदनमस्तु एतत्कारणीभूततमोगुणनिवृत्तिः केन भवेत् तद्विना तदंकुरनिवृत्तिर्न संभवतीत्यत्राह—

श्लोकः–शिवज्ञाने समुत्पन्ने सहस्रादित्यसंनिभे ॥

कुतस्तमोविकाराः स्युर्महतां शिवयोगिनाम् ॥ ९ ॥

व्याख्यानं—इति सहस्रादित्यसंकाशे शिवज्ञाने समुत्पन्ने सति महतां महापुरुषाणां शिवयोगिनां शिवशरणानां तमोविकाराः तमोंकुराः कुतः स्युः कस्मात्कारणाद्भवेयुः कारणीभूतस्य तमसो मूलनाशादिति भावः ॥ ९ ॥

इति तामसनिरसनस्थलम् ॥

अर्थ–॥ ९ ॥ शिवज्ञान हजार सूर्यांप्रमाणें तेजःपुंज आहे. तें शिवज्ञान एकवेळ श्रेष्ठ अशा शिवयोग्यांच्या मनांत उत्पन्न झाल्यावर अज्ञानपणाचे (अंधकाराचे) उपद्रव कसे होतील? कधींही होणार नाहींत.

अथ निर्देशस्थलम् ॥

अवतरणिका–अथ तामसनिराकरणेन भासमाननिर्देशस्थलं निरूपयति—

श्लोकः–निराकृत्य तमोभागं संसारस्य प्रवर्तकम् ॥

निर्दिश्यते तु यज्ज्ञानं स निर्देश इति स्मृतः ॥ १ ॥

व्याख्यानं—संसारप्रवृत्तेर्मूलकारणं तमोभागं निराकृत्य यत् ज्ञानं निर्दिश्यते उपदिश्यते सः तत् ज्ञानं निर्देश इति निर्देशस्थलमिति स्मृतः स्मृतमित्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ संसारांत पाडणारा तमोगुण घालवून जें उत्तम रीतीचें ज्ञान गुरु आपल्या शिष्यांस शिकवितो त्यास निर्देश असें ह्मणतात.

अवतरणिका–अथ तज्ज्ञानं केनोपदिश्यत इत्यत्र गुरुरेवेति तन्महत्वं बहुधा प्रकाशयति—

श्लोकः–गुरुरेव परं तत्वं प्रकाशयति देहिनाम् ॥

को वा सूर्यं विना लोके तमसो विनिवर्तते ॥ २ ॥

व्याख्यानं—लोके सूर्यं विना तमोनिराकरणद्वारा पदार्थप्रकाशको नास्ति तथा गुरुं विना तमोनिराकरणद्वारा परतत्वप्रकाशको नास्तीत्यर्थः ॥ २ ॥

अर्थ– ॥ २ ॥ प्राणिमात्रांस श्रेष्ठतत्वाचा गुरूच उपदेश करितो (गुरूखेरीज इतरांस तत्वांचा उपदेश करितां येत नाहीं.) सर्व जगांतील अंधकार दूर करण्यास सूर्याखेरीज दुसरा कोण समर्थ आहे ?

अवतरणिका-पुनर्दृष्टांतमाह—

श्लोकः-अंतरेण गुरुं सिद्धं कथं संसारनिष्कृतिः ॥

निदानज्ञं विना वैद्यं किं वा रोगो निवर्तते ॥ ३ ॥

व्याख्यानं—सिद्धं गुरुमंतरेण ज्ञानसिद्धगुरुं विनेत्यर्थः संसारनिष्कृतिः भवरोगनिवृत्तिः कथं स्यात् कथं भवेत्? तत्र दृष्टांतः निदानज्ञं एतद्धेतुकस्यास्य रोगस्येदमौषधमिति रोगज्ञानपूर्वकचिकित्साभिज्ञं वैद्यं विना रोगो निवर्तते किंवा न निवर्तेत इत्यर्थः यथा निदानज्ञानहीनेन[1] वैद्येन विना रोगो न निवर्तते तथा ज्ञानसिद्धगुरुव्यतिरेकेण संसारनिवृत्तिर्न संभवतीति तात्पर्यम् ॥ ३ ॥

अर्थ-॥ ३ ॥ शिवयोग साधनांत पारंगत असणाऱ्या गुरूवांचून संसाराची निष्कृति कशी होईल? रोगाचें मूळ कारण काय हें समजणारा वैद्य जवळ असल्यावांचून रोग्याचा रोग कसा बरा होईल?

अवतरणिका-नन्वयं गुरुः कथं ज्ञायत इत्यत्राह—

श्लोकः-अज्ञानमलिनं चित्तदर्पणं यो विशोधयेत् ॥

प्रज्ञाविभूतियोगेन तमाहुर्गुरुसत्तमम् ॥ ४ ॥

व्याख्यानं—अज्ञानमलिनं चित्तदर्पणं यः प्रज्ञाविभूतियोगेन "प्रज्ञानं ब्रह्म" इति श्रुतिप्रसिद्धशिवज्ञानविभूतिसंबंधेन शोधयेत् निर्मलं कुर्यात् तं गुरुसत्तमं गुरुश्रेष्ठं संतं आहुरित्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ जो अज्ञानरूपमळानें मलीन झालेलें चित्तरूप दर्पण (आरसा) ज्ञानरूप राख लाऊन लख्ख करितो त्यास गुरुश्रेष्ठ ह्मणावें.

अवतरणिका-अथ तादृशगुरुकटाक्षात्सकलसिद्धिर्भवतीत्याह—

श्लोकः-अपरोक्षिततत्वस्य जीवन्मुक्तस्वभाविनः ॥

गुरोः कटाक्षे संसिद्धे को वा लोकेषु दुर्लभः ॥ ५ ॥

व्याख्यानं—अपरोक्षिततत्वस्य स्वस्वरूपेण साक्षात्कृतशिवतत्वस्यतःजीवन्मुक्तस्वभाविनः "विकल्परहितं ज्ञानं निषेधरहिता क्रिया ॥ अलोकरंजकं रूपं जीवन्मुक्तस्य लक्षणं" इति वासिष्ठवचनात् जीवन्मुक्तस्वरूपवतः गुरोः सद्गुरोः कटाक्षे कृपारसपूरितापांगे संसिद्धे सति लोकेषु को वा दुर्लभः न कोऽप्यलभ्य इत्यर्थः भोगमोक्षलक्षणसकलसिद्धिर्भवतीति भावः ॥ ५ ॥

अर्थ-॥ ५ ॥ ज्याला शिवज्ञान प्रत्यक्ष झालेलें आहे, जो स्वतः जीवन्मुक्त

१ निदानज्ञानसहितेन ॥ पाठांतरम् ॥

स्थितींत आहे त्या गुरूचा कृपाकटाक्ष आपल्यावर झाल्यावर जगांत आपणांस कोठेंही कांहीं कमी नाहीं.

अवतरणिका–नन्वेतादृशगुरवः संति किमित्यत्र “गुरवो बहवः संति शिष्यवित्तापहारकाः ॥ शिष्यहृत्तापहारस्तु गुरुरेकोऽपि दुर्लभः” इति शिवरहस्यवचनानुसारेणाह—

श्लोकः–कैवल्यकल्पतरवो गुरवः करुणालयाः ॥
दुर्लभा हि जगत्यस्मिन् शिवाद्वैतपरायणाः ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ६ ॥

अर्थ–॥ ६ ॥ मोक्षप्राप्ति करून देण्याचे कामांत कल्पवृक्ष असणारे व शिवाच्या अद्वैतशास्त्रांत प्रवीण असणारे असे कृपाळू गुरु ह्या जगांत फार दुर्मिळ आहेत.

अवतरणिका–तस्माच्छिवलिंगतत्परः श्रीगुरुः प्राकृतगुरुभ्यः श्रेष्ठ इति वदन् निर्देशस्थलं समापयति—

श्लोकः–क्षीराब्धिरिव सिंधूनां सुमेरुरिव भूभृताम् ॥
ग्रहाणामिव तिग्मांशुर्मणीनामिव कौस्तुभः ॥ ७ ॥
द्रुमाणामिव भद्रश्रीर्देवानामिव शंकरः ॥
गुरुः शिवः परः श्लाघ्यो गुरूणां प्राकृतात्मनाम् ॥ ८ ॥

व्याख्यानं—भद्रश्रीर्मलयज इत्यर्थः शिष्टं स्पष्टं ॥ ७ ॥ ८ ॥

इति निर्देशस्थलं ॥

अर्थ–॥ ७ ॥ समुद्रांत जसा क्षीरसमुद्र श्रेष्ठ आहे, पर्वतांमध्यें जसा मेरुपर्वत श्रेष्ठ आहे, नवग्रहांत जसा सूर्य श्रेष्ठ आहे, रत्नांत जसें कौस्तुभरत्न श्रेष्ठ आहे, ॥ ८ ॥ झाडांत जसें चंदनाचें झाड श्रेष्ठ आहे, सर्वदेवांमध्यें शंकर जसा श्रेष्ठ आहे त्याप्रमाणें जगांतील इतर सामान्यस्वभावाच्या गुरूंपेक्षां शंकर गुरु श्रेष्ठ आहे.

॥ अथ शीलसंपादनस्थलम् ॥

अवतरणिका–अथ श्रीगुरुर्निर्देश्यज्ञानयोगात् शिवतत्वस्य जिज्ञासाशीलमित्युक्त्वा शीलवतः स्वरूपं सप्तभिः सूत्रैः प्रतिपादयति—

श्लोकः–जिज्ञासा शिवतत्वस्य शीलमित्युच्यते बुधैः ॥
निर्देश्ययोगादार्याणां तद्वान् शीलीति कथ्यते ॥ १ ॥

व्याख्यानं—आचार्याणां पूर्वोक्तलक्षणवदाचार्यैः निर्देश्ययोगात् उपदेश्यज्ञानयोगात् शिवतत्वस्य जिज्ञासा ज्ञातुमिच्छा शीलमिति बुधैः ज्ञानिभिरुच्यते तद्वान् तादृशजिज्ञासालक्षणशीलवान् शीलीति कथ्यत इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ शिवतत्व काय आहे तें समजावून घेण्याच्या इच्छेला ज्ञाते लोक जिज्ञासा (समजून घेण्याची इच्छा) शील असें ह्मणतात, गुरुवर्यांचा उपदेश ऐकण्याची आवड असणाऱ्या भक्तांस शीली असें ह्मणतात.

अवतरणिका–अथ निष्कर्षमाह—

श्लोकः–प्रपन्नार्तिहरे देवे परमात्मनि शंकरे ॥
भावस्य स्थिरतायोगश्शीलमित्युच्यते बुधैः ॥ २ ॥

व्याख्यानं—पालयस्वेति शरणागतानां क्लेशहरे परब्रह्मस्वरूपशिवे चित्तस्थिरीकरणं शीलमिति बुधैः शिवशास्त्रज्ञैः कथ्यत इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ शंकर शरण आलेल्या भक्तांची पीडा दूर करितात ते परमेश्वर आहेत त्यांची एकाग्रनिष्ठेनें भक्ति करण्याचा ज्याचा स्वभाव असतो त्यास ज्ञानी लोक शील असें ह्मणतात.

अवतरणिका–अथ प्रकारांतरेण तल्लक्षणमाह—

श्लोकः–शीलं शिवैकविज्ञानं शिवध्यानैकतानता ॥
शिवप्राप्तिसमुत्कंठा तद्योगी शीलवान् स्मृतः ॥ ३ ॥

व्याख्यानं—शिवे विज्ञानं शिव एव विशेषज्ञानं शिवध्यानैकतानता शिवध्यान एव अनन्यवृत्तित्वं शीलमित्युच्यते तद्योगी शीलविशिष्टः शिवज्ञानसमुत्कंठात् शिवाभिगमनलालस्यात् शीलवानिति स्मृत इत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ शिव हेंच उत्तम ज्ञान आहे असें मानणें त्यास शील ह्मणतात, शिवज्ञानावर एकाग्रपणानें विश्वास ठेवणें, शिवप्राप्ति आपणास कधीं होईल अशी उत्कंठा होणें असे गुण आंगांत असणाऱ्या शिवयोग्यास शीलवान् असें ह्मणतात.

अवतरणिका–इममर्थमेव स्फुटीकृत्याह—

श्लोकः–शिवादन्यत्र विज्ञाने वैमुख्यं यस्य सुस्थिरम् ॥
तदासक्तमनोवृत्तिस्तमाहुश्शीलभाजनम् ॥ ४ ॥

व्याख्यानं—शिवात् शिवलिंगात् अन्यत्र विज्ञाने देवतांतरविशेषज्ञाने

वैमुख्यं विमुखत्वं यस्य शरणस्य सुस्थिरं दृढं यस्य मनोवृत्तिः मनोव्यापारः तदासक्ता शिवलिंग एव लंपटा तं शीलभाजनम् शीलभजकं संतं आहुः ॥ ४ ॥

अर्थ–॥ ४ ॥ शिवज्ञानाखेरीज इतर ज्ञान करून घेण्याची ज्याला कधींही इच्छा होत नाहीं शिवज्ञानाकडे मात्र त्याचें सदोदित मन गुंतून राहतें त्या मनुष्यास (शीलपात्र) शीलास योग्य झाला असें ह्मणतात.

अवतरणिका–अत्र दृष्टांतमाह—

श्लोकः–पतिव्रतायां यच्छीलं पतिरागात्प्रशस्यते ॥
तथा शिवानुरागेण सुशीलो भक्त उच्यते ॥ ५ ॥

व्याख्यानं—पतिव्रताया यच्छीलं पातिव्रत्यं पतिरागात् पुरुषप्रीतिवशात् प्रशस्यते तथा शिवानुरागेण शिवोपरि प्रीत्या अभक्तः अवियुक्तः शरणः सुशीलः शोभनशीलवानित्यर्थः शरणलिंगयोः सतीपतिभावस्योक्तत्वात्पतिव्रतादृष्टांतः कथितः ॥ ५ ॥

अर्थ–॥ ५ ॥ पतिव्रतेचा चांगला स्वभाव तिच्या पतीवरील तिच्या भक्तीमुळें (सेवेमुळें, प्रेमामुळें) जसा चांगला दिसतो त्याप्रमाणेंच शिवाच्या दृढभक्तीमुळें चांगल्या स्वभावाचा (सुशील) शिवभक्त ज्यास्त शोभतो.

अवतरणिका–अथेममर्थमेव विशदयति—

श्लोकः–पतिं विना यथा स्त्रीणां सेवान्यस्य तु गर्हणा ॥
शिवं विना तथान्येषां सेवा निंदा कृतात्मनाम् ॥ ६ ॥

व्याख्यानं—स्त्रीणां पतिं विना प्राणकांतं विना अन्यस्य परपुरुषस्य सेवा यथा गर्हणा निंदिता तथा कृतात्मनां कृतकृत्यानां शिवशरणानां शिवं विना शिवलिंगं विना अन्येषां विष्णवादिदेवानां सेवा निंदा भवतीत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ स्त्रियांनीं आपल्या पतीची सेवा करावयाची सोडून देऊन इतर पुरुषांची केली तर त्या जशा निंदेस पात्र होतात तसेंच शिवाखेरीज इतर देवांची सेवा करणारे पुरुष (शरण) निंदेस पात्र आहेत.

अवतरणिका–अथोक्तार्थं संगृह्याह—

श्लोकः–बहुनात्र किमुक्तेन शिवज्ञानैकनिष्ठता ॥
शीलमित्युच्यते सद्भिश्शीलवांस्तत्परो मतः ॥ ७ ॥

व्याख्यानं—अत्र शीलविषये बहुभाषणेन किं शिवज्ञानैकनिष्ठता श्रीगुरुनिर्दिष्टशिवज्ञान एकस्मिन्नेव निष्ठा शीलमिति सत्पुरुषैरुच्यते- तत्परः तच्छीलासक्तः शीलवानिति मतः संमत इत्यर्थः ॥ ७ ॥

अर्थ-॥ ७ ॥ फार सांगण्यांत काय अर्थ आहे ? शिवावर दृढनिश्चय ठेवणें ह्या गुणास सज्जनलोक शील ह्मणतात तें शील आंगीं असणाऱ्यास शीलवान् ह्मणतात.

अवतरणिका-अथैवंविधशीलवान् शरण एव शिवलिंगैक्य इति शरणस्थलं समापयति—

वृत्तम्-शिवात्मबोधैकरतस्थिराशयः शिवं प्रपन्नो जगतामधीशम् ॥
शिवैकनिष्ठाहितशीलभूषणः शिवैक्यवानेष हि कथ्यते बुधैः ॥ ८ ॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण विरचिते सिद्धान्तशिखामणौ शरणस्य चतुःस्थलप्रसंगो नाम त्रयोदशीयः परिच्छेदः समाप्तः ॥

व्याख्यानं—शिवात्मबोधैकरतः लिंगांगज्ञानैकनिष्ठः सन् जगतां अधीशं शिवम् प्रपन्नः रक्षेति शरणं गतः स्थिराशयः शिवशरणयोर्दृढीभूतसतीपतिभावयुक्तचित्तः शिवैकनिष्ठाहितशीलभूषणः शिवलिंगैकनिष्ठाकृतिशीलालंकारवानेष शरणः शिवैक्यवानिति बुधैः शिवशास्त्रप्रवीणैः कथ्यते हि प्रसिद्धमित्यर्थः ॥ ८ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां त्रयोदशीयः परिच्छेदः ।

अर्थ-॥ ८ ॥ जो भक्त सर्व विश्व शिवमय आहे आणि माझा आत्मा ही शिवस्वरूपच आहे असें मानितो, ज्याचें मन निश्चळ झालेलें असतें, सर्व त्रैलोक्याचा ईश्वर शंकर त्याला जो शरण जातो, शिवावर दृढ निश्चय ठेवणें ह्या गुणामुळें जो अतिशय शोभतो त्या भक्ताला ज्ञानी लोक शिवैक्य पावलेला असें ह्मणतात.

ह्याप्रमाणें श्रीवीरशैवांच्या धर्माचा निर्णय असलेल्या सिद्धान्तशिखामणि ग्रंथांतील शरणस्थलाच्या चार पोटभागांचें वर्णन असलेला हा तेरावा परिच्छेद संपला.

॥ श्रीशिवाय नमः ॥

N. Kalburgi C. N. Kalburgi

अथ चतुर्दशीयः परिच्छेदः

ऐक्यस्थलम्

अवतरणिका–अथागस्त्यप्रश्नः–अगस्त्य उवाचेति—

श्लोकः–तामसत्यागसंबंधान्निर्देशाच्छीलतस्तथा ॥
शरणाख्यस्य भूयोऽस्य कथमैक्यनिरूपणम् ॥ १ ॥

व्याख्यानं—तमोभागनिराकरणात् ज्ञाननिर्देशात् तथा शीलसंपादनात् शरणा-
ख्यस्यास्य एतावन्मात्रेण कथमैक्यनिरूपणं लिंगांगयोर्भेदघटितत्वादिति ॥ १ ॥

अर्थ–॥ १ ॥ अगस्त्य ह्मणतात रेवणसिद्धा, शरणाचे तामसत्याग, निर्देशशील वैगेरे अधिकार सांगितलेस, इतक्यानेंच त्याला ऐक्याची पदवी येते ह्मणतोस तें मला समजावून सांग असें अगस्त्याचें बोलणें ऐकून.

अवतरणिका–अस्योत्तरं ददाति श्रीरेणुक उवाचेति—

श्लोकः–प्राणलिंगादियोगेन सुखातिशयमेयिवान् ॥
शरणाख्यश्शिवेनैक्यभावनादैक्यवान् भवेत् ॥ २ ॥

व्याख्यानं—प्राणलिंगादियोगेन बाह्यलिंगपूजावैमुख्येनांतर्लिंगपूजाध्यानयोगेन
सुखातिशयं शिवसुखातिशयं एयिवान् लब्धवान् शरणाख्यः शिवेन शिवलिं-
गेन ऐक्यभावनात् एकत्वचिंतनात् ऐक्यवान् शिवलिंगैक्यवान् भवेत् स्यादित्यर्थः ।
अयं भावः लिंगात्मनोर्भेदो न संभवति चिदेकरूपत्वात् ननु चिद्रूपत्वेऽपि व्यक्ति-
भेदोऽस्तीति चेत् उच्यते स जीवः परिच्छिन्नचित्प्रकाशरूपो वा यद्यपरिच्छिन्नचित्प्र-
काशरूपो वा नाद्यः परिमितघटादिप्रकाशवत् स्वविषयस्वमात्रनिष्ठत्वेन परवि-
षयपरस्वरूपेष्वंधबधिरप्रायत्वेन चैत्रो मैत्राद्भिन्नः मैत्रश्चैत्राद्भिन्नः चैत्रमहं जानामि
मैत्रमहं जानामीति बाह्याभ्यंतरानुसंधानं न संभवतीति चैत्रोऽहमिति प्रकाशस्य
तन्मात्रनिष्ठत्वात् मैत्रस्वरूपतद्विषययोरंधबधिरप्रायत्वात् एवं मैत्रोऽहमिति प्रकाशः
स्यादिति अथापरिच्छिन्नप्रकाशत्वे तादृशप्रकाशद्वयांगीकारो न संभवति सेव्यसेवक-
भावाद्यसंभवात् प्रकाशैक्ये कल्पितभेदमादाय तत्संभवात्प्रकाशैक्यमंगीकरणीयं
सर्वासर्वशब्दयोर्मायाकार्यकोटिप्रविष्टत्वेनांतरालिकत्वात् ज्ञत्वकर्तृत्वयोरेव स्वाभा-
विकत्वात् इति तदेकत्वचिंतनादैक्यवान् स्यादिति ॥ २ ॥

अर्थ–॥ २ ॥ रेवणसिद्ध ह्मणतात—प्राणलिंगादिसाधनांमुळें (बाह्यलिंगपूजा

सोडून प्राणलिंगपूजाध्यानयोगामुळें) परमावधीचा (अतिशय) शिवज्ञाना-नंदाचा अनुभव घेणारा शरण मी शिवाशीं ऐक्य पावलों अशी त्यांचे मनाची दृढ समजूत झाली असल्यामुळें तोच स्वतः शिवैक्य पावतो.

अवतरणिका–अथास्यापि स्थलभेदाः संति किमित्यत्राह—

श्लोकः–ऐक्यस्थलमिदं प्रोक्तं चतुर्धा मुनिपुंगव ॥
ऐक्यमाचारसंपत्तिरेकभाजनमेव च ॥
सहभोजनमित्येषां क्रमाल्लक्षणमुच्यते ॥ ३ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥

अर्थ–॥ ३ ॥ ऋषिश्रेष्ठा अगस्त्या, ऐक्यस्थलाचे चार पोटभेद आहेत ते असे १ ऐक्यस्थल २ आचारसंपत्ति ३ एकभाजन ४ सहभोजन ह्या चोहोंचेंही क्रमाक्रमानें लक्षण सांगतों.

अवतरणिका–"एकमेव तद्भवत्यविकल्पो वा विकल्पोऽत्र काचन भिदास्ति नैवात्र किंचन भिदास्त्यत्र भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्योर्मृत्युमाप्नोति तदेव तद्व्यं स्वप्रकाशं" इत्युत्तरतापनीयश्रुत्यनुसारेण लिंगैक्यस्य लक्षणं पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः–विषयानंदकणिकानिस्पृहो निर्मलाशयः ॥
शिवानंदमहासिंधुमज्जनादैक्यमुच्यते ॥ ४ ॥

व्याख्यानं—विषयानंदकणिकानिस्पृहः शब्दादिविषयानंदशीकरेषु विरक्तः सन् निर्मलाशयः निर्मलचित्तवानेव शिवानंदमहासिंधुमज्जनात् शिवानंदमहा-समुद्रे तादात्म्यानुप्रवेशनात् ऐक्यं लिंगैक्यस्थलमित्युच्यत इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ ज्या भक्ताचें मन विषयोपभोगाचे सुखास कसपटाप्रमाणें मानतें (जो विषयसुखाची आवड करीत नाहीं) ज्याचें मन निष्पाप असतें, जो नेहमीं शिवज्ञानरूप महासमुद्रांत बुडालेला असतो त्या भक्तास शिवैक्य असें ह्मणतात.

अवतरणिका–नन्विदमैक्यं कीदृशस्य संभवतीत्यत्राह—

श्लोकः–निर्धूतमलसंबंधो निष्कलंकमनोगतः ॥
शिवोऽहमिति भावेन निरूढो हि शिवैक्यताम् ॥ ५ ॥

व्याख्यानं—निवारिताणवादिमलसंपर्कवान् कलंकरहितमनोव्यापारवान् शि-वोऽहमिति परामर्शनेन शिवलिंगैक्यतां निरूढो हि भजतीति प्रसिद्धं ॥ ५ ॥

C. N. Kalburgi

अर्थ-॥ ५ ॥ ज्याचे आणवमल, मायामल, कार्मिकमल नाहींसे झाले आहेत, ज्याचे मनांतील विचार निष्पापरीतीचे आहेत, जो मीच स्वतः शिव आहें अशा समजूतीनें आपलें वर्तन ठेवितो त्यास शिवैक्य पावलेला असें ह्मणतात.

अवतरणिका-अथ किं पश्यन्नास्तीत्यत्राह—

श्लोकः-शिवेनैक्यं समापन्नश्चिदानंदस्वरूपिणा ॥
न पश्यति जगज्जालं मायाकल्पितवैभवम् ॥ ६ ॥

व्याख्यानं—मायाशक्तिपरिकल्पितं विश्वमपश्यन्नास्त इत्यर्थः ॥ ६ ॥

अर्थ-॥ ६ ॥ शिव हा चित्स्वरूपी आहे व आनंदस्वरूप आहे त्या शिवाशीं ऐक्य पावलेल्या मनुष्यास मायेमुळें ज्याला महत्व आलें आहे अशा जगाचा पसारा खरा वाटत नाहीं त्याला सर्व जग शिवमयच आहे असें वाटतें.

अवतरणिका-तत्कुतो न पश्यतीत्यत्राह—

श्लोकः-ब्रह्मांडबुद्बुदोद्भेदविजृंभी तत्त्ववीचिमान् ॥
मायासिंधुर्लयं याति शिवैक्यवडवानले ॥ ७ ॥

व्याख्यानं—ब्रह्मांडबुद्बुदोद्भेदविजृंभी ब्रह्मांडरूपबुद्बुदाविर्भावेन वर्धिष्णुः तत्त्ववीचिमान् षट्त्रिंशत्तत्त्वलक्षणवीचिमान् मायासिंधुः शिवैक्यवडवानले शिवलिंगैक्यरूपवडवाग्नौ लयं याति अतः कारणात् प्रपंचदर्शनं नास्ति उपादानकारणनाशात्कार्यनाशस्यावश्यमंगीकरणीयत्वात् ॥ ७ ॥

अर्थ-॥ ७ ॥ शिवैक्य हा समुद्रांत राहणारा वडवाग्नि आहे, त्या वडवाग्नींत त्रैलोक्यरूपी अनेक प्रकारचे बुडबुडे असणारा, अनेक प्रकारचीं तत्वें ह्याच लाटा असणारा माया (अज्ञान)रूपी समुद्र जळून जातो. (शिवैक्य झालें असतां अज्ञानपणा समूळ नाहींसा होतो).

अवतरणिका- अथ तदेव विशदयति—

श्लोकः-मायाशक्तितिरोधानाच्छिवे भेदविकल्पना ॥
आत्मनस्तद्विनाशे तु नाद्वैतात्किंचिदिष्यते ॥ ८ ॥

व्याख्यानं—शिवे मायाशक्तेस्तिरोधानात् प्रसरणात् आत्मनः जीवस्य भेदविकल्पना स्यात् तद्विनाशे मायाप्रसरणस्य नाशे अद्वैतात् किंचित् ईषद्भेदोऽपि नेष्यते नेच्छाविषयीक्रियते ॥ ८ ॥

अर्थ-॥ ८ ॥ मायाशक्ति (अज्ञानपणा) नाश पावली असतां (गुप्त झाली असतां) शिवाविषयीं आपली जी भेदबुद्धि (शिव निराळा मी निराळा अशी

समजूत) असते ती नाहींशी होते, व ती नाहींशी झाल्यावर अद्वैतावांचून दुसरें कांहींच उरत नाहीं. (सर्व शिवस्वरूप आहे असें भासूं लागतें.)

अवतरणिका–ननु शिवजीवयोः पतिपशुलक्षणभेदश्रवणात् कथं किंचिद्भेदोऽपि नेष्यत इत्युक्तमित्यत्र "अहमेको न मे कश्चिन्नाहमन्यस्य कस्यचित् ॥ न तं पश्यामि यस्याहं न तं पश्यामि यो मम" इति देवीकालोत्तरवचनानुसारेण शिवलिंगैक्यस्य प्रसिद्धशिवाद्वैतं पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः–पशुत्वं च पतित्वं च मायामोहविकल्पितम् ॥
तस्मिन् प्रलयमापन्ने कः पशुः को नु वा पतिः ॥ ९ ॥

व्याख्यानं—स्पष्टं ॥ ९ ॥

अर्थ–॥ ९ ॥ पशुपणा आणि पतिपणा हा भेद मायेच्या अज्ञानपणामुळें मानला गेला आहे, तो एकवेळ समूळ नाश झाला ह्मणजे पशु तरी कोठला? आणि पति तरी कोठला?

अवतरणिका–अथास्य संसारस्य भेदवल्मीकनिष्ठसर्परूपत्वात् किमस्यौषधमित्यत्राह—

श्लोकः–घोरसंसारसर्पस्य भेदवल्मीकशायिनः ॥
बाधकं परमाद्वैतभावना परमौषधम् ॥ १० ॥

व्याख्यानं—भेदवल्मीकशायिनः जडाजडभेदः जीवाजीवभेदः जीवजडभेदः जीवेश्वरभेदः जडेश्वरभेदः इत्येवंरूपपंचविधभेदविशिष्टवल्मीकस्थितस्य घोरसंसारसर्पस्य जननमरणादिभयंकरस्य संसारसर्पस्य बाधकमौषधं परमाद्वैतभावना जडचेतनैक्यभावनेत्यर्थः ॥ १० ॥

अर्थ–॥ १० ॥ संसाररूप भयंकर साप आहे, तो भेदरूप वारुळांत राहतो, त्याची पीडा न व्हावी अशी इच्छा असल्यास उत्तमरीतीची अद्वैतकल्पना हें खात्रीचें औषध आहे.

अवतरणिका–नन्वस्य संसारस्य भेदबुद्धिसमुत्पन्नमहासागरत्वादिमं केनोपायेन को वा तरतीत्यत्राह—

श्लोकः–भेदबुद्धिसमुत्पन्नमहासंसारसागरम् ॥
अद्वैतबुद्धिपोतेन समुत्तरति देशिकः ॥ ११ ॥

व्याख्यानं—देशिकः शिवलिंगैक्य इत्यर्थः ॥ शिष्टं स्पष्टं ॥ ११ ॥

अर्थ-॥ ११ ॥ भेदबुद्धि (निराळेपणाची कल्पना) ह्यापासून उत्पन्न झालेल्या संसाँररूप महासमुद्रांतून देशिक (शिवैक्य) अद्वैत बुद्धिरूप नांव करून त्यांत बसून तरून जातो.

अवतरणिका–नन्वियं संसृतिः कामरक्षःक्रियाकरी कालरात्रिर्भवति केन नश्यतीत्यत्राह—

श्लोकः–अज्ञानतिमिरोद्रिक्ता कामरक्षःक्रियाकरी ॥
संसारकालरात्रिस्तु नश्येदद्वैतभानुना ॥ १२ ॥
तस्मादद्वैतभावस्य सदृशो नास्ति योगिनाम् ॥
उपायो घोरसंसारमहातापनिवृत्तये ॥ १३ ॥

व्याख्यानं—अज्ञानतिमिरोद्रिक्ता अज्ञानलक्षणगाढांधकारेणोत्पन्ना सती कामरक्षःक्रियाकरी कामलक्षणराक्षसकृत्यं कुर्वती संसारकालरात्रिः अद्वैतभानुना शिवाद्वैतसूर्येण नश्यतीत्यर्थः ॥ १२ ॥ व्याख्यानं—स्पष्टं ॥ १३ ॥

अर्थ-॥ १२ ॥ अद्वैतशास्त्ररूप सूर्याच्या प्रकाशामुळें अज्ञानपणारूप आंधारानें चोहोंकडे काळीकुट्ट दिसणारी, मदनरूप राक्षसाची शक्ति वाढविणारी संसाररूप कालरात्रि नाहींशी होते. (अद्वैतशास्त्रामुळें जन्ममरण चुकून मोक्षप्राप्ति होते.) ॥ १३ ॥ ह्यावरून असें उघड दिसतें कीं, शिवयोगी लोकांस भयंकर अशा संसारांतील अनेक प्रकारांचीं संकटें दूर होण्यास अद्वैतशास्त्रासारखा दुसरा उपाय नाहीं.

अवतरणिका–अथ शिवाद्वैतातिशयमुक्त्वा सूत्रद्वयेनैक्यस्थलं समापयति—

श्लोकः–अद्वैतभावनाजातं क्षणमात्रेऽपि यत्सुखम् ॥
तत्सुखं कोटिवर्षेण प्राप्यते नैव भोगिभिः ॥ १४ ॥
चित्तवृत्तिसमालीनजगतः शिवयोगिनः ॥
शिवानंदपरिस्फूर्तिर्मुक्तिरित्यभिधीयते ॥ १५ ॥

व्याख्यानं—भोगिभिः राज्यभोगिभिरित्यर्थः ॥ शिष्टं स्पष्टं ॥ १४ ॥ १५ ॥

इत्यैक्यस्थलम् ॥

अर्थ-॥ १४ ॥ अद्वैतशास्त्राच्या अनुभवावरून क्षणमात्र जें सुख वाटतें तेंच सुख विषयसुखाचा उपभोग घेणारांनीं एक कोट वर्षेंपर्यंत विषयसुखाचा सारखा अनुभव घेतला तँरी त्यांस मिळत नाहीं. ॥१५॥ ज्याच्या मनोवृत्तींत सर्व जगाचें

यथार्थज्ञान होऊन चुकलें आहे त्या शिवयोग्याला शिवानंदाचें परिस्फुरण होणें झालाच मुक्ति ह्मणतात.

अथ आचारसंपत्तिस्थलम् ॥

अवतरणिका–अथ "यथा रविः सर्वरसान् प्रभुंक्ते हुताशनश्चापि हि सर्वभक्षकः ॥ तथैव योगी विषयान् प्रभुङ्क्ते न लिप्यते कर्मशुभाशुभैश्च" इति शिवरहस्यवचनानुसारेण लिंगैक्यस्य सदाचारसंपत्तिं द्वादशसूत्रैः प्रतिपादयति—

श्लोकः–शिवैकभावनापन्नशिवत्वो देहवानपि ॥
देशिको हि न लिप्येत स्वाचारैः सूतकादिभिः ॥ १ ॥

व्याख्यानं—शिवैकभावनया लब्धशिवत्ववान् देशिकः शिवलिंगैक्यः देहवानपि जीवन्मुक्तः सन् सूतकादिभिः सूतकप्रभृतिभिः स्वाचारैः स्वेच्छाचारैः न लिप्येतेत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ देशिक (शिवलिंगैक्य पावलेला) जरी देहधारी आहे तरी तो जीवन्मुक्त असून नेहमीं शिवाचें एकाग्रपणानें चिंतन करीत असल्यानें तोच स्वतः शिव होतो त्यामुळें जन्माचें सोयर आणि मरणाचें सूतक त्यास धरण्याचें मुळींच कारण राहत नाहीं.

अवतरणिका–कस्मादित्यत्राह—

श्लोकः–शिवाद्वैतपरिज्ञाने स्थिते सति मनस्विनाम् ॥
कर्मणा किं नु भाव्यं स्यादकृतेन कृतेन वा ॥ २ ॥

व्याख्यानं—मनस्विनां लिंगैक्यनिष्ठचित्तवृत्तीनां शिवाद्वैतज्ञाने स्थिरे सति अकृतेन कर्मणा दुष्कर्मणा कृतेन वा सत्कर्मणा वा किं नु भाव्यं स्यात् न किंचिदपि स्यादित्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ बुद्धिमान् मनुष्याच्या मनांत एकवेळ शिवाचें अद्वैतज्ञान परिपूर्णपणानें राहिलें ह्मणजे कर्म (शिवपूजन वगैरे) केलें तरी काय आणि न केलें तरी काय दोन्ही सारखेंच आहे ?

अवतरणिका–तत्कुत इत्यत्राह—

श्लोकः–शंभोरेकत्रभावेन सर्वत्र समदर्शनः ॥
कुर्वन्नपि महाकर्म न तत्फलमवाप्नुयात् ॥ ३ ॥

व्याख्यानं—सर्वत्र समदर्शनः लोष्टाश्मकांचनादिषु सर्वत्र समदर्शनः शिवलिं-

C. N. Kalburgi

गैक्यः शंभोरेकत्वभावेन ऐक्यभावेन महाकर्म पुण्यपापरूप महाकर्म कुर्वन्नपि तत्फलं नाप्नुयात् सर्वस्यापि शिवमयत्वेन दर्शनात्तल्लेपो नास्तीति भावः ॥ ३ ॥

अर्थ–॥ ३ ॥ सर्व ठिकाणीं शंकर परिपूर्णपणें व्यापलेला आहे ह्मणून सर्वतोपरी सारखेपणानें वागणाऱ्या देशिकाला त्यानें कोणतेंही लहानमोठें कर्म केलें तरी त्याचें फळ त्यास भोगावें लागत नाहीं.

सुकृती दुष्कृती वापि ब्राह्मणो वांत्यजोऽपि वा ॥
शिवैकभावयुक्तानां सदृशो भवति ध्रुवम् ॥ ४ ॥

व्याख्यानं—शिवैकभावयुक्तानां सर्वत्र शिवाभेदज्ञानयुक्तानां शिवलिंगैक्यानां सुकृती पुण्यात्मा वा दुष्कृती पापात्मा वा ब्राह्मणो अंत्यजो वा श्वपचो वा सदृशः समानः भवति ध्रुवं निश्चयः ॥ ४ ॥

अर्थ–॥ ४ ॥ शिवाशीं ऐक्य पावलेल्या (शिवाद्वैतज्ञानाचा यथार्थ बोध झालेल्या) शिवयोग्यास पुण्यवान् असो, पापी असो, ब्राह्मण असो किंवा चांडाळ असो सारे सारखेच आहेत.

अवतरणिका–ननु शिवज्ञानिनामपि वर्णाश्रमप्राप्तधर्माः कथं त्यजनीया इत्यत्राह—

श्लोकः–वर्णाश्रमसदाचारैर्ज्ञानिनां किं प्रयोजनम् ॥
लौकिकस्तु सदाचारः फलाभावे विभाव्यते ॥ ५ ॥

C. N. Kalburgi

व्याख्यानं—वर्णाश्रमप्राप्तैःब्राह्मणादिवर्णब्रह्मचर्याद्याश्रमप्राप्तैः सदाचारैः ज्ञानिनां शिवज्ञानिनाम् किं प्रयोजनं न किंचित्प्रयोजनमित्यर्थः कुत इत्यत्राह लौकिकस्तु सदाचारः वर्णाश्रमगतनित्यनैमित्तिकसदाचारः फलाभावेऽपि भाव्यते विधीयत इत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ जे शिवैक्य पावलेले ज्ञानी लोक आहेत त्यांस वर्णांतील व आश्रमांतील सदाचार पाळून काय करावयाचें आहे? जरी ते जगामध्यें सदाचारानें वागतात ही गोष्ट खरी, तरी त्या सदाचारापासून अमुक एक फळ मिळवावयाचें असतें असें मुळींच नाहीं.

अवतरणिका–ननु ज्ञानिनामपि शरीरसंबंधस्य विद्यमानत्वात् कथं ते परित्यजनीयाः अकरणे प्रत्यवायश्रवणादित्यत्राह—

श्लोकः–निर्दग्धकर्मबीजस्य निर्मलज्ञानवह्निना ॥
देहिवद्भासमानस्य देहयात्रा तु लौकिकी ॥ ६ ॥

व्याख्यानं—निर्मलशिवसंविद्वन्हिना पुनरुत्पत्तिशंकाशून्यत्वेन नितरामतिशयेन दग्धपुण्यपापलक्षणकर्मबीजवतः शिवज्ञानिनः प्रत्यवायसंबंधो नास्त्येव दग्धपटन्यायेन शरीरीव भासमानस्य तस्य देहयात्रा तु करचरणसंचालनादिव्यवहृतिस्तु लौकिकी विदेहकैवल्यपर्यंतमनुवर्तत इत्यस्थिरेत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ निष्पाप ज्ञानरूप अग्नीनें ज्याचें कर्मरूप बीज जळून गेलेलें आहे तो मनुष्य जरी जीवंत आहे असा दिसला तरी त्याची चरितार्थाची रीति फक्त लोकांस दिसण्यापुरती आहे इतकेंच. वास्तविक शरीरावर त्याचें मुळींच ममत्व (प्रेम) नसतें.

अवतरणिका–अथ "तस्य तावदेव चिरं यावन्न विमोक्ष्येत तस्य पुत्रादय उपयंति सुहृदः साधुकृत्यं द्विषंतः पापकृत्यं यथा पुष्करपलाशमापो न श्लिष्यंत एवमेव विद्धि पापं कर्म न श्लिष्यते स उत्तमः पुरुषः स तत्र पर्येति" इति छांदोग्यश्रुत्यनुसारेणाह—

श्लोकः–शिवज्ञानसमापन्नस्थिरवैराग्यलक्षणः ॥
स्वकर्मणा न लिप्येत पद्मपत्रमिवांभसा ॥ ७ ॥

व्याख्यानं—शिवज्ञानलब्धदृढवैराग्यचिन्हः शिवलिंगैक्यः स्वकर्मणा स्वेच्छाकर्मणा अंभसा जलेन पद्मपत्रमिव न लिप्येत इत्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ पाण्यांत असणाऱ्या कमळाचें पान जसें पाण्यानें भिजत नाहीं त्याचप्रमाणें शिवाच्या अद्वैतज्ञानामुळें उत्पन्न झालेलें वैराग्य ज्याच्या मनांत चांगल्या रीतीनें ठसलें आहे, त्याला कर्माची बाधा होत नाहीं.

अवतरणिका–"यथा वायुः सुशीघ्रोऽपि मुक्त्वाकाशं न गच्छति" इति निश्वासकारिकारिकानुसारेण शिवलिंगनिष्ठस्य सर्वापि क्रिया शिवलिंगपूजारूपेति पंचभिः सूत्रैः प्रतिपादयति–

श्लोकः–गच्छंस्तिष्ठन् स्वपन्वापि जाग्रन्वापि महामतिः ॥
शिवज्ञानसमायोगाच्छिवपूजापरस्सदा ॥ ८ ॥

व्याख्यानं—महामतिः शिवलिंगैक्यः गच्छन् गमनसमये तिष्ठन् स्थितिसमये स्वपन् निद्रासमये जाग्रन् विषयदर्शनसमये सदा निरंतरं शिवज्ञानसमायोगात् शिवानुसंधानसंबंधात् शिवपूजापरः लिंगनिष्ठ इत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ शिवसामरस्य पावलेला शिवयोगी वाटेनें जात असो किंवा एके

जागीं बसलेला असो तो बुद्धिमान् निजलेला असो किंवा जागा झालेला असो त्यास शिवज्ञान झालें असल्यामुळें तो नेहमीं शिवपूजाच करीत असतो असें समजावें.

अवतरणिका–ननु विषयदर्शनसमये कथं शिवानुसंधानमित्यत्राह—

श्लोकः–यद्यत्पश्यति सामोदं वस्तु लोकेषु देशिकः ॥
शिवदर्शनसंपत्तिस्तत्र तत्र महात्मनः ॥ ९ ॥

व्याख्यानं—देशिकः शिवलिंगैक्यः लोकेषु यद्यद्वस्तु घटपटादिकं सामोदं प्रीतियुक्तं सत् पश्यति तत्र तत्र तस्मिंस्तस्मिन् वस्तुनि महात्मनः शिवलिंगैक्यस्य शिवदर्शनसंपत्तिः शिवालोकनसंपत्तिर्भवेत् शिवातिरेकेण पदार्थांतराभावात् चिन्मयत्वबुद्धिर्भवेदित्यर्थः ॥ ९ ॥

अर्थ–॥ ९ ॥ देशिक (शिवैक्य पावलेला) ह्या जगांतील ज्या ज्या वस्तु आनंदानें पाहत असतो तेथें तेथें त्या सज्जनाला शिवज्ञानाचें ऐश्वर्य दिसून येतें (सर्व जग शिवमय आहे असें त्याच्या अनुभवास येतें.)

अवतरणिका–अथ "आत्मा त्वं गिरिजा मतिः परिचराः प्राणाः शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रासमाधिस्थितिः ॥ संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलं शंभो तवाराधनं" इत्यभियुक्तवचनानुसारेण त्रिकरणशुद्धशिवलिंगपूजोपचारं त्रिभिः सूत्रैः प्रतिपादयन् आचारसंपत्तिस्थलं समापयति—

श्लोकः–यद्यच्चिंतयते योगी मनसा शुद्धभावनः ॥
तत्तच्छिवमयत्वेन शिवध्यानमुदाहृतम् ॥ १० ॥

व्याख्यानं—शुद्धभावनः निर्मलभावनावानित्यर्थः शिष्टं स्पष्टं ॥ १० ॥

अर्थ–॥ १० ॥ ज्याचें मन शिवज्ञानामुळें निर्दोष झालेलें आहे तो शिवयोगी आपल्या मनांत जे जे विचार आणीत असतो ते ते विचार सर्व शिवमय जग त्यास वाटत असल्यामुळें तें शिवध्यानच होय असें ह्मटलें आहे.

यत्किंचिद्भाषितं लोके स्वेच्छया शिवयोगिना ॥
शिवस्तोत्रमिदं सर्वं यस्मात्सर्वात्मकः शिवः ॥ ११ ॥

व्याख्यानं—स्पष्टं ॥ ११ ॥

अर्थ-॥ ११ ॥ शिवयोगी स्वच्छंदपणानें जें जें बोलतो तें तें सर्व शिवस्तवनच समजावें कां तर शिव हा सर्वत्र व्यापलेला असून सर्वान्तर्यामी आहे.

या या चेष्टा समुत्पन्ना जायते शिवयोगिनाम् ॥
सा सा पूजा महेशस्य सर्वदा तद्गतात्मनाम् ॥ १२ ॥

व्याख्यानं—शिवयोगिनां शिवलिंगैक्यानां या या चेष्टा कायक्रिया जायते तद्गतात्मनां शिवलिंगे तादात्म्येन प्रविष्टस्वरूपवतां तेषां सा सा क्रिया सर्वदा महेशस्य शिवलिंगस्य पूजेत्यर्थः ॥ १२ ॥

इत्याचारसंपत्तिस्थलम् ॥

अर्थ-॥ १२ ॥ शिवयोगी लोकांच्या हातून करून न करून जी जी गोष्ट होते ती ती गोष्ट प्रत्यक्ष शंकराची पूजाच होय कां तर त्या शिवयोग्यांचें मन नेहमी शिवस्वरूपांत निमग्न झालेलें असतें.

॥ अथ एकभाजनस्थलम् ॥

अवतरणिका-अथ परेव्यये सर्व एकीभवंतीति मुंडकोपनिषद्वचनानुसारेण सर्वाचारसंपत्तिमतः शिवलिंगैक्यस्य एकभाजनस्थलं पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः-विश्वं शिवमयं चेति सदा भावयतो धिया ॥
शिवैकभाजनात्मत्वादेकभाजनमुच्यते ॥ १ ॥

व्याख्यानं—लिंगैक्यस्य शिवैक्यभाजनात्मत्वात् शिवैकाश्रयत्वात् एकभाजनस्थलमित्युच्यत इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ सर्वत्रैलोक्य शिवमय आहे असें नेहमीं आपल्या बुद्धीप्रमाणें मानल्यामुळें शिवाशीं तादात्म्य होतें म्हणून देशिकाच्या तशा स्थितीस एकभाजन असें म्हणतात.

अवतरणिका-ननु किमनेन भवतीत्यत्राह—

श्लोकः-स्वस्य सर्वस्य लोकस्य शिवस्याद्वैतदर्शनात् ॥
एकभाजनयोगेन प्रसादैक्यमतिर्भवेत् ॥ २ ॥

व्याख्यानं—स्वस्य स्वात्मनः सर्वस्य लोकस्य समस्तजनस्य अद्वैतदर्शनात् अहमिति चिदैक्यदर्शनात् एकभाजनयोगेन एककूटत्वेन प्रसादैक्यमतिः शिवप्रसाद एव स्वप्रसादः स्वप्रसाद एव शिवप्रसादः स एव स्वातिरिक्त इव भासमानस्य शिवभक्तस्य प्रसाद इति प्रसादैक्यमतिर्भवेदिति चरमूर्तिपादोदकप्रसादावपि शिवस्य स्वस्य च योग्याविति भावः ॥ २ ॥

C. N. Kalburgi
सी. एन. कलबुर्गी

अर्थ-॥ २ ॥ आपल्यामध्यें, सर्व लोकांच्या मध्यें आणि शिवाच्या मध्यें कांहीं एक अंतर नाहीं मी, सर्वलोक आणि शंकर एकच आहों अशी समजूत दृढ झाली असल्यामुळें एकभाजन (सारखेपणा) झाल्यामुळें प्रसादाविषयीं ऐक्य-बुद्धि होते.

अवतरणिका-ननु शिवस्य विश्वस्यैकरूपत्वे तयोः स्थितिः कथमित्यत्राह—

श्लोकः-शिवे विश्वमिदं सर्वं शिवः सर्वत्र भासते ॥
आधाराधेयभावेन शिवस्य जगतः स्थितिः ॥ ३ ॥

व्याख्यानं—शिवे विश्वं विश्वस्मिन् शिव इति बीजांकुरन्यायेनाधाराधेय-भावेन संबंधेन सामरस्येन शिवस्य जगतः स्थितिरित्यर्थः ॥ ३ ॥

C. N. Kalburgi

अर्थ-॥ ३ ॥ शिवामध्यें हें सर्व जग राहिलें आहे, व ह्या सर्व जगांत शिव व्यापून राहिलेला आहे असें अनुभवास येतें शिवाच्या आश्रयानें हें सर्व-स्थावर जंगम विश्व राहिलें आहे व त्या शिवाचा आणि जगाचा आधाराधेय भाव दिसून येतो. शिव आधार असून जग आधेय आहे.

अवतरणिका-एवंचिदेकभाजनतां प्राप्तस्य मायिकभेदेन प्रयोजनं नास्तीत्याह—

श्लोकः-चिदेकभाजनं यस्य चित्तवृत्तेः शिवात्मकम् ॥
नान्यत्तस्य किमेतेन मायामूलेन वस्तुना ॥ ४ ॥

व्याख्यानं—यस्य लिंगैक्यस्य चित्तवृत्तेः मनोव्यापारस्य चित् मनोव्यापाररू-पाज्ञप्तिरेव शिवात्मकमेकभाजनं शिवस्वरूपैकभाजनं तस्य मायामूलेन मायामूल-केन एतेन भेदेन किं किं प्रयोजनं न किंचित्प्रयोजनमित्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ ज्याच्या मनोवृत्ती शिवस्वरूपांत लीन झाल्या असल्यामुळें चित्स्वरूपाशीं पूर्णपणानें मिळून गेलेल्या आहेत त्याला ह्या दुसऱ्या भ्रममूलक वस्तु पाहून काय विकार होणार आहे? त्याचें मन मुळींच चंचळ होत नाहीं.

अवतरणिका-नन्विदं विश्वं कथं शिवात्मकमित्यत्राह—

श्लोकः-चित्प्रकाशयते विश्वं तद्विना नास्ति वस्तु हि ॥
चिदेकनिष्ठचित्तानां किं मायापरिकल्पितैः ॥ ५ ॥

व्याख्यानं—विश्वं घटाद्युपलक्षितनिखिलप्रपंचं चित्प्रकाशयते तद्विना चित्प्र-काशं विना वस्तु घटादिवस्तु नास्ति विषयसत्त्वोपगमे संविदेव भगवति शरण-

मिति प्राभाकरा अपि मन्यंते अतः यद्यदधीनतया भासते तत्तदात्मकं जलतरंगादिवदिति चिदेकनिष्ठचित्तानां मायापरिकल्पितैः प्रापंचिकवेद्यपदार्थैः किं प्रयोजनमित्यर्थः ॥ ५ ॥

अर्थ—॥ ५ ॥ चित्स्वरूप विश्वाचें ज्ञान करून देतें जिच्यांत चित्स्वरूप नाहीं अशी एकही वस्तु नाहीं. चित्स्वरूपावर ज्यांचा दृढ निश्चय आहे त्यांस मायेचे अनेक तऱ्हेचे विकल्प उत्पन्न झाले तरी त्या विकल्पांमुळें त्यांचें काय होणार आहे ?

अवतरणिका—अथैकभाजनस्थलं समापयति—

श्लोकः—वृत्तिशून्ये स्वहृदये शिवलीने निराकुले ॥
यः सदा वर्तते योगी स मुक्तो नात्र संशयः ॥ ६ ॥

व्याख्यानं—यः शिवयोगी वृत्तिशून्ये व्यापारशून्ये निराकुले क्षोभरहिते शिवलीने शिवलिंगैक्यभूते स्वहृदये सदा वर्तते सः मुक्तः जीवन्मुक्त इत्यर्थः अत्र संदेहो नास्तीत्यर्थः ॥ ६ ॥

इत्येकभाजनस्थलम् ॥

अर्थ—॥ ६ ॥ ज्याचे मनाचे अनेकप्रकारचे विचारतरंग नाहींसे झाले, ज्याचें मन फक्त शिवस्वरूपांतच लीन झालें त्याला दुसरा कोणताही व्याप राहिला नाहीं अशा स्थितींत जो शिवयोगी राहतो तो मुक्त होय ह्यांत कांहीं शंका नाहीं.

॥ अथ सहभोजनस्थलम् ॥

अवतरणिका—अथ "अग्राह्यमग्राह्येण वायुं वायव्येन सोमं सौम्येन ग्रसति स्वेन तेजसा तस्मादुपसंहर्त्रे महाग्रासाय वै नमोनम" इत्यथर्वश्रुत्यनुसारेणैकभाजनस्थलनिष्ठस्य सहभोजनस्थलं दशभिस्सूत्रैः प्रतिपादयति—

श्लोकः—गुरोश्शिवस्य शिष्यस्य स्वस्वरूपतया स्मृतिः ॥
सहभोजनमाख्यातं सर्वग्रासात्मभावतः ॥ १ ॥

व्याख्यानं—श्रीगुरोः शिवलिंगस्य शिष्यस्य च स्वस्वरूपतया स्वात्माभेदेन अस्मत्प्रत्ययानतिरिक्तत्वेन स्मृतिः सर्वग्रासात्मभावतः घटो मया ज्ञातः पटो मया ज्ञातः चैत्रो मया ज्ञातः मैत्रो मया ज्ञातः इति विश्वभेदग्रसनमेव स्वरूपत्वात् सहभोजनं अनुभूतपदार्थस्य पुनः स्वात्मविश्रांतत्वेन परामर्शनलक्षणं सहभोजनमित्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ गुरूचें रूप, शिवाचें रूप, शिष्याचें रूप हें निरनिराळे नसून एकच आहे, असें जें ज्ञान होतें, तें ज्ञान सर्व ग्रासात्मक झाल्यामुळें (ही घागर जाणतों, हा देवदत्त जाणतों वगैरे भेद ज्ञान मिळून ऐक्यज्ञान झाल्यामुळें) त्या ज्ञानालाच सहभोजन असें ह्मणतात.

अवतरणिका–अथ निष्कर्षमाह—

श्लोकः–शिवं विश्वं गुरुं साक्षाद्योजयेन्नित्यमात्मनि ॥
एकत्वेन चिदाकारे तदिदं सहभोजनम् ॥ २ ॥

व्याख्यानं—साक्षाच्चिदाकारे आत्मनि शिवं गुरुं विश्वं च एकत्वेन एकरूपत्वेन नित्यं संयोजयेत् संयोजनं नाम अस्मद्रूपानतिरिक्तत्वेन परामर्शनं यदस्ति तदिदं सहभोजनं अत्र गुरुशिवयोरस्मद्रूपानतिरिक्तत्वात् स्वात्मैक्येन संयोजनं संभवति इदंरूपतया भासमानस्य जडस्य कथमात्मैक्यसंयोजनं संभवतीति नाशंकनीयं तस्याप्युक्तरीत्यात्मविश्रांतत्वात् अन्यथा स्मृतिर्न स्यात् संसारस्यापि सविषयत्वेनैवात्मसमवेतत्वात् ॥ २ ॥

अर्थ-॥ २ ॥ शिव वेगळा नाहीं, गुरु वेगळा नाहीं व विश्व वेगळें नाहीं सर्व एक आहे असें ऐक्यज्ञान नेहमीं चित्स्वरूप अशा आत्म्याच्या ठिकाणीं नित्य एकनिष्ठपणानें स्मरण करितो (आपलेंच रूप आहे, असें मानतो) त्यास सहभोजन असें ह्मणावें.

अवतरणिका–अथ पुनरपि निष्कर्षमाह—

श्लोकः–अयं शिवो गुरुश्चैष जगदेतच्चराचरम् ॥
अहं चेति मतिर्यस्य नास्त्यसौ विश्वभोजकः ॥ ३ ॥

व्याख्यानं—अयं शिवः एष गुरुः स्वामी एतत्स्थावरजंगमात्मकं विश्वं अहं च इति यस्य बुद्धिः भेदबुद्धिः नास्ति सोऽसौ शिवलिंगैक्यः विश्वभोजकः जगद्भेदभक्षक इत्यर्थः ॥ ३ ॥

अर्थ-॥ ३ ॥ हा शंकर आहे, हा गुरु आहे, हें जग आहे, व त्या जगांत सजीव निर्जीव (स्थावर जंगम) असे दोन भेद आहेत हा मी निराळा आहें अशी ज्याला भेदबुद्धि मुळींच नाहीं त्याला विश्वभोजक असें ह्मणावें.

अवतरणिका–अथेतोऽपि निष्कर्षमाह—

श्लोकः–अहं भृत्यः शिवः स्वामी शिष्योऽहं गुरुरेव वै ॥
इति यस्य मतिर्नास्ति स चाद्वैतपदे स्थितः ॥ ४ ॥

व्याख्यानं—शिवः स्वामी अहं भृत्यः एष गुरुरहं शिष्यः इति यस्य मतिः

भेदबुद्धिः नास्ति स च शिवलिंगैक्यः अद्वैतपदे विश्वभेदग्रासात्मकशिवाद्वैतस्थाने स्थितः तिष्ठतीत्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ मी सेवक आहें, शिवस्वामी (धनी) आहें, मी शिष्य आहें किंवा गुरु आहें अशी ज्याची कल्पना देखील नसते त्यास अद्वैतपदाची योग्यता आली असें ह्मणावें. (तो अद्वैतपदाधिकारी होतो)

अवतरणिका-अथैवंविधसहभोजनसंपन्न एव विश्वहोमीति कथ्यत इत्याह—

श्लोकः-पराहंतामये स्वात्मपावके विश्वभास्वति ॥
इदंताहव्यहोमेन विश्वहोमीति कथ्यते ॥ ५ ॥

व्याख्यानं—विश्वप्रकाशके उत्कृष्टमूलाहंकारमये स्वात्माग्नौ इदंतारूपहवनद्रव्यहोमेन विश्वहोमीति कथ्यत इत्यर्थः ॥ ५ ॥

अर्थ-॥ ५ ॥ श्रेष्ठ (अहंता) अहंपणारूप असणाऱ्या व त्यामुळें त्रैलोक्य उत्तमरीतीनें दिसून येतें अशा आत्मस्वरूप अग्नीमध्यें इदंता (भेदबुद्धि)रूपहवन करावयाच्या द्रव्यानें जो होम करितो त्यास विश्वहोमी असें ह्मणावें.

अवतरणिका-ननु का सौ परांहंतेत्यत्राह—

श्लोकः-अहं शिवो गुरुश्चाहमहं विश्वं चराचरम् ॥
यया विज्ञायते सम्यक् पूर्णाहंतेति सा स्मृता ॥ ६ ॥

व्याख्यानं—शिवोऽहं गुरुरहं च चराचरं विश्वमहमिति यया चित्या सम्यक् विज्ञायते अत्र प्रत्यवमर्शात्मासौ चितिः स्वरसवाहिनी परा वाग्या आद्यंतप्रत्याहृतवर्णगणा सत्यहंता सेति पंचाशिका शास्त्रस्थित्या देशकालाद्याकारकृतसंकोचराहित्येन तद्वाचकसकलमातृकार्णक्रोडीकारलक्षणप्रत्याहृताकारहकारसंमेलनात्मक तदंतर्गतवेद्यसंस्कारलक्षणबिंदुस्पंदस्फुरितपरशक्तिशिवात्मैकत्वेन स्थूलप्रपंचोत्पत्तेः प्राक् तत्कारणत्वेनांडरसन्यायेन सामान्यतोऽहमिति पश्चात् अन्यव्यामिश्रमस्वतंत्रं भेदाशक्यावभासनं प्रतिबिंबमिति तल्लक्षणयोगसाम्येन प्रतिबिंबगत्या विश्वमयत्वेन स्वातंत्र्येण भासमाना पूर्णाहंतेति स्मृतेत्यर्थः ॥ ६ ॥

अर्थ—॥ ६ ॥ मीच शंकर आहें, मीच गुरु आहें, मीच स्थावर जंगम विश्व आहें, असें ज्या मीपणामुळें वाटतें त्या मीपणास पूर्णाहंता असें ह्मणावें.

अवतरणिका-अथोक्तलक्षणविश्वहोम्येव ज्ञानयज्ञदीक्षित इत्याह—

श्लोकः-आधारवह्नौ चिद्रूपे भेदजातं जगद्धविः ॥
जुहोति ज्ञानयज्वा यस्स ज्ञेयो विश्वहव्यभुक् ॥ ७ ॥

व्याख्यानं—चिद्रूपे ज्ञानस्वरूपे आधारवह्नौ आज्ञाचक्रगतवह्नौ भेदजातं मायाकल्पितं जगद्धविः विश्वहविः यो जुहोति सः विश्वहव्यभुक् विश्वहविर्भोक्ता ज्ञानयज्वा ज्ञानयज्ञदीक्षित इति ज्ञेयः ज्ञातुं योग्य इत्यर्थः ॥ ७ ॥

अर्थ-॥ ७ ॥ ज्ञानस्वरूप आधार अग्नीमध्यें निराळेपणाच्या बुद्धीमुळें उत्पन्न झालेलें जगद्रूप हवन करावयाचें द्रव्य जो ज्ञानरूप यज्ञ करणारा यजमान हवन करितो त्यास विश्व हव्यभुक् असें ह्मणावें. चित्स्वरूप ज्ञान असणाऱ्याच्या भेदबुद्धीचा नाश होतो.

अवतरणिका-ननु प्रत्यक्षवन्हौ तद्व्यतिरिक्तकाष्ठादौ निक्षिप्ते सति तन्नाशो दृश्यते ज्ञानाग्नौ निक्षिप्तजगतो नाशः कथमित्यत्राह—

सी. एन. फरशुर्गी.

श्लोकः-चिदाकारे पराकाशे परमानंदभास्वति ॥
विलीनचित्तवृत्तीनां का वा विश्वक्रमस्थितिः ॥ ८ ॥

व्याख्यानं—चिदाकारे पराकाशे ऊर्ध्वहृत्कमलकर्णिकाविवरे परमानंदभास्वति नित्यानंदमयमहालिंगाख्यभानौ विलीनचित्तवृत्तीनां लयीभूतमनोव्यापारवतां लिंगैक्यानां विश्वक्रमस्थितिः विश्वव्यापारवर्तनं कापि नास्तीत्यर्थः ॥ ८ ॥

अर्थ-॥ ८ ॥ चित्स्वरूप हें श्रेष्ठआकाश आहे, त्यांत अत्यानंदरूप सूर्य प्रकाशमान आहे, त्या चित्स्वरूपांत ज्यांचीं मनें गढून गेलीं आहेत त्यांस त्रैलोक्याच्या पसाऱ्याचें कांहीं एक कारण नाहीं.

अवतरणिका-अथ तस्य सहभोजनसंपन्नस्य लिंगैक्यस्य मुक्तिस्वरूपं सूत्रद्वयेन कथयति—

श्लोकः-निरस्तविश्वसंबाधे निष्कलंके चिदंबरे ॥
भावयेल्लीनमात्मानं सामरस्यस्वभावतः ॥ ९ ॥
सैषा विद्या परा ज्ञेया सत्तानंदप्रकाशिनी ॥
मुक्तिरित्युच्यते सद्भिर्जगन्मोहनिवर्तिनी ॥ १० ॥

व्याख्यानं—निवारितजननमरणादिक्लेशे दोषरहिते चिदाकाशस्वरूपे महालिंगे अंगशब्दवाच्यमात्मानं स्वरूपहानिवृद्धिव्यतिरेकेण सजातीयसमानसमरसभावेन लीनं स्थिरसिद्धिमंतं भावयेत् सैषा सच्चिदानंदस्वरूपप्रकाशिनी परा

विद्येति ज्ञातुं योग्या जगन्मोहनिवर्तिनी विश्वभेदभ्रांतिनिवर्तिनी परा मुक्तिरिति सत्पुरुषैरुच्यत इत्यर्थः ॥ ९ ॥ १० ॥

अर्थ–॥ ९ ॥ चित्स्वरूपरूप आकाश आहे, त्याला जगाचा कोणत्याही रीतीचा संबंध नाहीं, तें निष्कलंक आहे, त्या ज्ञानाकाशांत शिवसामरस्यामुळें आपलें मन लीन व्हावें. ॥ १० ॥ ही शिवैक्याची विद्या श्रेष्ठ आहे, ही सत्ता आणि आनंद ह्यांची वृद्धि करिते जगांतील अज्ञानाचा नाश करिते तिलाच मुक्ति असें ह्मणावें.

अवतरणिका–अथायं शिवलिंगैक्य एव मोक्षलक्ष्मीनिवासस्थानभूत इत्युक्त्वा सहभोजनस्थलं समापयति—

श्लोकः–भक्तादिधामार्पितधर्मयोगात्प्राप्तैकभावः परमाद्भुतेन ॥ शिवेन चिद्व्योममयेन साक्षान्मोक्षश्रियो भाजनतामुपैति ॥ ११ ॥

इति श्रीमत्षट्स्थलब्रह्मिणाशिवयोगिनाम्ना रेणुकाचार्येण विरचिते सिद्धांतशिखामणौ शिवलिंगैक्यस्य चतुर्विधस्थलप्रसंगो नाम चतुर्दशीयः परिच्छेदः समाप्तः ॥

व्याख्यानं—चिद्व्योममयेन ऊर्ध्वहृत्कमलमध्यस्थचिदाकाशस्वरूपेण परमाद्भुतेन परमाश्चर्यरूपेण शिवेन शिवलिंगेन स्वरूपहानिवृद्धिव्यतिरेकेण समानसमरसत्वेन लब्धैकत्ववान् शिवलिंगैक्यः भक्तादिधामार्पितधर्मयोगात् भक्तादिस्थलगतसदाचारसंबंधात् प्रत्यक्षमोक्षलक्ष्म्याः भाजनतां आश्रयत्वं उपैति प्राप्नोतीत्यर्थः ॥ ११ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां चतुर्दशीयः परिच्छेदः समाप्तः

अर्थ–॥११॥ भक्तवगैरे जीं सहास्थलें सांगितलेलीं आहेत व त्यांचे त्यांचे धर्म सांगितले आहेत त्या त्या स्थळांत ते ते धर्म पाळून क्रमाक्रमानें ऐक्यभाव पावलेला भक्त लोकोत्तर सामर्थ्य असणाऱ्या, चिदंबरस्वरूप असणाऱ्या शंकराच्या कृपेनें मोक्षलक्ष्मीस पात्र होतो. (षट्स्थल आणि त्यांतील धर्म पाळण्यामुळें शिवैक्य पावलेला मनुष्य शंकराच्या कृपेनें मोक्षास जातो.)

ह्याप्रमाणें वीरशैवधर्माचा निर्णय असलेल्या सिद्धान्तशिखामणिग्रंथांतील शिवलिंगाबरोबर ऐक्य पावलेल्या भक्ताच्या चार प्रकारच्या पोटभेदांचें वर्णन असलेला हा चवदावा भाग (परिच्छेद) संपला.

श्रीशिवाय नमः ।

अथ पंचदशीयः परिच्छेदः

अथ लिंगस्थलानि

दीक्षागुरुस्थलम्

अवतरणिका–अथ भक्तादिशिवलिंगैक्यांतषट्स्थलोक्तपिंडादिसहभोजनांतचतुश्चत्वारिंशदवांतरस्थलनिरूपितसदाचारसंपन्नस्य लिंगैक्यस्य वर्णाश्रमादिसंकल्पविकल्पशून्यत्वेन प्राकृताचारनिवृत्त्या सहभोजनसंपन्नत्वाल्लिंगरूपत्वेन तदाचरणीयलिंगाचारस्थलानि निरूपयति—श्रीरेणुकः

श्लोकः–षट्स्थलोक्तसदाचारसंपन्नस्य यथाक्रमम् ॥
लिंगस्थलानि कथ्यंते जीवन्मुक्तिपराणि च ॥ १ ॥

व्याख्यानं—अंगषट्स्थलोक्तसदाचारसंपन्नस्य शिवलिंगैक्यस्य क्रमेण जीवन्मुक्तिपराणि लिंगषट्स्थलानि कथ्यंत इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ षट्स्थलांत (भक्त, माहेश्वर, प्रसादी, प्राणलिंगी, शरण, ऐक्य) जे जे सदाचार पाळावे ह्मणून सांगितले आहेत ते ते योग्यरीतीनें पाळणाऱ्यास जीवन्मुक्ति करून देणारीं लिंगस्थलें (लिंगषट्स्थलें) ह्या परिच्छेदांत आतां सांगतों.

अवतरणिका–अथागस्त्यप्रश्नः अगस्त्य उवाचेति—

श्लोकः–भक्ताद्यैक्यावसानानि षडुक्तानि स्थलानि च ॥
लिंगस्थलानि कानीह कथ्यंते कतिवापुनः ॥ २ ॥

व्याख्यानं—स्पष्टं ॥ २ ॥

अर्थ–॥ २ ॥ अगस्त्य ह्मणतात—भक्तस्थलापासून ऐक्यस्थलापर्यंतचीं सहा स्थलें पूर्वीच्या भागांत सांगितलीं आहेत. आतां लिंगस्थलें कोणतीं आणि किती आहेत तीं सांगावीं.

श्रीरेणुक उवाच

श्लोकः–गुर्वादिज्ञानशून्यांता भक्तादिस्थलसंश्रिताः ॥
स्थलभेदाः प्रकीर्त्यंते पंचाशत्सप्त चाधुना ॥ ३ ॥

C. N. Kalburgi

व्याख्यानं—भक्ताद्यैक्यांतांगषट्स्थलसंश्रिताः दीक्षागुर्वादिवृत्तिज्ञानशून्यांताः सप्तोत्तरपंचाशल्लिंगस्थलभेदा अधुना कथ्यंत इत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ रेणुक ह्मणतात—भक्तादिस्थलांस अनुसरून असणारें गुरुस्थल प्रथम आणि ज्ञानशून्यस्थल शेवटचें असे सत्तावन भेद मानले आहेत.

अवतरणिका–अथ भक्तस्थलगतलिंगस्थलभेदान् सूत्रत्रयेण कथयति—

श्लोकः–आदौ नव स्थलानीह भक्तस्थलसमाश्रयात् ॥
कथ्यंते गुणसारेण नामान्येषां पृथक्छृणु ॥ ४ ॥

व्याख्यानं—इह लिंगषट्स्थले भक्तस्थलसमाश्रयात् आदौ नवस्थलानि गुणसारेण श्रेष्ठत्वेन एषां नवस्थलानां नामानि पृथक् पृथक् कथ्यंते शृणिवत्यर्थः॥४॥

अर्थ–॥ ४ ॥ अगस्त्यऋषीश्वरा, भक्तस्थलास अनुसरून अगोदर नऊ स्थलें येथें (लिंगषट्स्थलांत) मानिलेलीं आहेत त्यांच्या गुणाच्या महत्वावरून त्यांचीं नांवें वेगवेगळीं आहेत तीं स्थलें मी आतां तुला सांगतों.

अवतरणिका–अथ तान्युद्दिशति—

श्लोकः–दीक्षागुरुस्थलं पूर्वं ततश्शिक्षागुरुस्थलम् ॥
प्रज्ञागुरुस्थलं चाथ क्रियालिंगस्थलं ततः ॥ ५ ॥
भावलिंगस्थलं चाथ ज्ञानलिंगस्थलं ततः ॥
स्वयं परं चरं चेति तेषां लक्षणमुच्यते ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ५ ॥ ६ ॥

अर्थ–॥ ५ ॥ १ दीक्षागुरुस्थल २ शिक्षागुरुस्थल ३ प्रज्ञागुरुस्थल ४ क्रियालिंगस्थल ॥ ६ ॥ ५ भावलिंगस्थल ६ ज्ञानलिंगस्थल ७ स्वयंस्थल ८ परस्थल ९ चरस्थल हे स्थलाचे नऊ भेद आहेत आतां त्याचें लक्षण सांगतों.

अवतरणिका–अथ "दीयते च यथा ज्ञानं क्षीयते च मलत्रयम् ॥ सा दीक्षा संज्ञिता तस्यां गुरुर्दीक्षागुरुर्मत" इति वातुलोत्तरवचनानुसारेण शिवलिंगैक्य एव दीक्षागुरुरिति कथयति–

श्लोकः–दीयते परमं ज्ञानं क्षीयते पाशबंधनम् ॥
यया दीक्षेति सा तस्यां गुरुर्दीक्षागुरुः स्मृतः ॥ ७ ॥

व्याख्यानं—यया परमज्ञानं उत्कृष्टशिवज्ञानं दा दान इति धातुगत्या दीयते पाशबंधनं मलमायादिपाशबंधनम् क्षिक्षय इति धातुगत्या क्षीयते सा दीक्षेति

मता संमता तस्यां चित्क्रियालक्षणदीक्षायां गुरुः गृनिगरण इति धातुगत्या उपदेशंकृच्छिवलिंगैक्यः दीक्षागुरुरिति स्मृत इत्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ ज्या दीक्षेमुळें (दीक्षेनें) उत्तमतऱ्हेचें शिवज्ञान होतें, मलमायादि पाशाचें बंधन तुटतें ह्मणून तिला दीक्षा ह्मणतात ती दीक्षा देणारा तो दीक्षागुरु होय.

अवतरणिका–अथ गुरुस्वरूपं विशदयति—

श्लोकः–गुणातीतं गुकारं च रूपातीतं रुकारकम् ॥
गुणातीतमरूपं च यो दद्यात्स गुरुः स्मृतः ॥ ८ ॥

व्याख्यानं—गुकारं प्राकृतगुणातीतं रुकारं अशुद्धमायारूपातीतं गुणातीतमरूपं च मंडलत्रयात्मकगुणत्रयं ज्योतिर्मयबैंदवकलाशून्यचिन्मयवस्तु यः ददाति उपदिशति सः गुरुः स्मृतः गुरुरिति स्मृत इत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ गुरु हीं दोन अक्षरें आहेत गु ह्या अक्षरानें तो मोठा गुणातीत (प्राकृत गुण नसलेला.) आहे असें समजावयाचें व रु ह्या अक्षरावरून तो रूपातीत (निर्मायी) आहे असें समजावें तें गुणातीत व रूपातीत स्थल (चित्स्वरूपस्थल) तो प्राप्तकरून देतो ह्मणून त्याला गुरु ह्मणतात.

अवतरणिका–अथैतत्प्रसंगादाचार्यस्वरूपं च विशदयति—

श्लोकः–आचिनोति च शास्त्रार्थानाचारे स्थापयत्यलम् ॥
स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते ॥ ९ ॥

व्याख्यानं—शास्त्रार्थान् वीरशैवशास्त्ररहस्यार्थान् प्रकटीकृत्य कथयति आचारे वीरशैवाचारे शिष्यान् अलं आधिक्येन स्थापयति नियमयति स्वयं च वीरशैवाचारे आचरते तेन हि तेन कारणेन आचार्यो वक्ता "कुशलोस्य लब्ध" इति कठवल्लीश्रुत्यनुसारेणाचार्य इत्युच्यत इत्यर्थः ॥ ९ ॥

अर्थ–॥ ९ ॥ गुरु, शिष्यास अनेक वीरशैवशास्त्रांतील रहस्यार्थ शिकवितो व वीरशैवांचे चांगलें आचरण त्याकडून करवितो व आपणही स्वतः वीरशैवाचारानें वागतो त्यामुळें त्या गुरूस आचार्य असें ह्मणतात.

अवतरणिका–अथ देशिकशब्दनिर्वचनं च कृत्वा शिवलिंगैक्य एव जगद्गुरुरिति सूत्रद्वयेनोक्तदीक्षागुरुस्थलं समापयति—

श्लोकः–षडध्वातीतयोगेन यतते यस्तु देशिकः ॥
मायाब्धितारणोपायहेतुर्विश्वगुरुः शिवः ॥ १० ॥

व्याख्यानं—ज्ञानान्मुक्तिं दिशति "यस्स देशिक इति स्मृत" इति कामिकवाक्यप्रसिद्धो यो देशिकः षडध्वातीतयोगेन "अध्वनामध्वपते श्रेष्ठस्याध्वनः पारमय" इति श्रुतिप्रसिद्धवर्णपदादिषडध्वातीतयोगेन यतते उद्योगवानास्ते स शिवः शिवलिंगैक्यः मायाब्धितारणोपायहेतुभूतजगद्गुरुरित्यर्थः ॥ १० ॥

अर्थ—॥ १० ॥ शिष्यांस ज्ञान शिकवून मोक्षप्राप्ति करून देतो ह्मणून गुरूस देशिक असें ह्मणतात जो देशिक (गुरु) १ वर्णाध्व २ पदाध्व ३ मंत्राध्व ४ कलाध्व वगैरे सहा मार्गाहून पार गेलेला आहे माया (अज्ञानरूप) समुद्र तरून जाण्यास जो उपयोगी असून जो सर्व जगाचाही गुरु आहे तोच शंकर होय.

अवतरणिका—अथ कथमयं जगद्गुरुरित्याह—

श्लोकः—अखंडं येन चैतन्यं व्यज्यते सर्ववस्तुषु ॥
आत्मयोगप्रभावेन स गुरुर्विश्वभासकः ॥ ११ ॥

व्याख्यानं—सर्ववस्तुषु नीलपीतादिसकलवस्तुषु आत्मयोगप्रभावेन स्वानुभवबलात् अखंडं सच्चिदानंदात्मकं चैतन्यं येन व्यज्यते नीलपीतादिप्रतिनियतपदार्थावभासनकालेऽप्यहमित्यखंडचैतन्यमनुवर्तत एव अन्यथा तद्वैद्यदर्शनं न स्यादिति स्फुटीक्रियते स गुरुः विश्वभासकः विश्वप्रकाशक इत्यर्थः ॥ ११ ॥

इति दीक्षागुरुस्थलम् ॥

अर्थ—॥ ११ ॥ असें चैतन्य भरलेलें आहे असें निळ्या, पिंवळ्या वगैरे सर्व वस्तूंत स्वानुभवबलानें सच्चिदानंदात्मकचैतन्य ज्यामुळें प्रकाशमान होतें त्या प्रकाशमानकालांतही अखंड चैतन्यास अनुसरून असतो त्यास विश्वप्रकाशक ह्मणावें.

॥ अथ शिक्षागुरुस्थलम् ॥

अवतरणिका—अथ "बोध्यबोधकभावेन ज्ञानद्वारेण शास्यते ॥ शिष्यो हि येन गुरुणा स शिक्षागुरुरुच्यते" इति वातुलोत्तरवचनानुसारेण शिक्षागुरुस्थलं निरूपयति—

श्लोकः—दीक्षागुरुरसौ शिक्षाहेतुः शिष्यस्य बोधकः ॥
प्रश्नोत्तरप्रवक्ता च शिक्षागुरुरितीर्यते ॥ १ ॥

व्याख्यानं—असौ दीक्षागुरुः शिष्यस्य बोधकः सन् प्रश्नोत्तरप्रवक्ता शिष्यकृतप्रश्नस्योत्तरं दत्वा शिक्षाहेतुश्च शिक्षाकारणः सन् शिक्षागुरुरिति कथ्यत इत्यर्थः ॥ १ ॥

सी. एन. करजगी.

अर्थ-॥ १ ॥ हा दीक्षागुरु शिष्यास बोध व्हावयासाठीं शिक्षा (वर्तनक्रम) शिकवितो शिष्यास संशय येऊन त्यानें प्रश्न केल्यास त्याचीं समाधानकारक उत्तरें देऊन त्याचे सर्व संशय दूर करितो तेव्हां त्यास शिक्षागुरु असें ह्मणतात.

अवतरणिका-अथामुमेवार्थं स्फुटयति—

श्लोकः-बोधकोऽयं समाख्यातो बोध्यमेतदिति स्फुटम् ॥
शिष्ये नियुज्यते येन स शिक्षागुरुरुच्यते ॥ २ ॥

व्याख्यानं—अयं शिवसिद्धांतबोधकः परतत्वप्रकाशक इत्यर्थः "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।" इति वैयाकरणोक्तेः स्फुटं देशिकोपदेशस्फुटीभूतं एतत् शिवयोगज्ञानं बोध्यं इति येन गुरुणा शिष्यः समाख्यातः बोधकः सन् नियुज्यते नियम्यते स शिक्षागुरुरित्युच्यत इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ देशिक शिष्यास शिकवावयाचें शिवज्ञान चांगल्या रीतीनें बोध होईल असें सांगतो ह्मणून त्याला बोधक असें ह्मणतात, व बोधकानें करून दिलेलें शिवज्ञान शिष्याचे मनांत चांगल्या रीतीनें ठसतें ह्मणून त्यास शिक्षागुरु असें ह्मणतात.

अवतरणिका-अथ "आचार्यः पूर्वरूपं अंतेवास्युत्तररूपं विद्या संधिः आचार्योऽतेवासिनमाशास्ति" इति श्रुत्यनुसारेण द्वैविध्येन तत्स्वरूपं वर्णयति—

श्लोकः-संसारतिमिरोन्माथिशरच्चंद्रमरीचयः ॥
वाचो यस्य प्रवर्तंते तमाचार्यं प्रचक्षते ॥ ३ ॥

व्याख्यानं—यस्य वाचः उपदेशवाक्यानि संसारतिमिरविनाशने शरच्चंद्रमरीचय इव प्रवर्तंते तं आचार्यं संतं प्रचक्षते कथयंति ॥ ३ ॥

अर्थ-॥ ३ ॥ संसाररूप अंधकाराचा नाश व्हावयासाठीं ज्याच्या वाचा (धर्मोपदेश) शरदृतूंतील स्वच्छ चांदण्याप्रमाणें शोभतात त्याला आचार्य ह्मणावें.

श्लोकः-ददाति यः पतिज्ञानं जगन्मायानिवर्तकम् ॥
अद्वैतवासनोपायं तमाचार्यवरं विदुः ॥ ४ ॥

व्याख्यानं—यःजगन्मायानिवर्तकम् प्रापंचिकभेदभ्रांतिनिवर्तकम् पतिज्ञानम् "पतिं विश्वस्यात्मेश्वरं शाश्वतम् शिवमच्युतम्" इति नारायणोपनिषत्प्रसिद्धस्वात्माभिन्नशिवज्ञानम् ददाति प्रकाशयति तं आचार्यवरं आचार्यश्रेष्ठं संतं विदुः जानंतीत्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ जो शिवाचें यथार्थज्ञान करून देतो, तें ज्ञान सर्वजग मिथ्या आहे माया खोटी आहे असें अनुभवास आणतें, व अद्वैतमताकडे आपलें मन वळवितें तें शिवज्ञान करून देणाऱ्यास आचार्यश्रेष्ठ ह्मणतात.

अवतरणिका—अथ शिवाद्वैतज्ञानसंपन्नः सन् शिष्यसंदेहवारक एव गुरुश्रेष्ठ इति सूत्रद्वयेनाह—

**श्लोकः-पूर्वपक्षं समादाय जगद्भेदविकल्पनम् ॥
अद्वैतकृतसिद्धांतो गुरुरेष गुणाधिकः ॥ ५ ॥**

व्याख्यानं—जगद्भेदविकल्पनं प्रापंचिकभेदद्वैविध्यविशिष्टं पूर्वपक्षं समादाय अंगीकृत्य अद्वैतकृतसिद्धांतवानेष गुरुः शिक्षागुरुरेव गुणाधिकः श्रेष्ठ इत्यर्थः ॥५॥

अर्थ-॥ ५ ॥ जगाच्या निराळेपणाचा विकल्पाभास पूर्वपक्षाप्रमाणें घेऊन अद्वैतशास्त्राचा सिद्धांत करितो त्यास गुरु ह्मणावें तो सर्वांपेक्षां गुणवान् होय.

**श्लोकः-संदेहवनसंदोहसमुच्छेदकुठारिका ॥
यत्सूक्तिधारा विमला स गुरूणां शिखामणिः ॥ ६ ॥**

व्याख्यानं—विमला निर्मला यत्सूक्तिधारा यस्य गुरोरुपदेशवाक्यधारा संदेहवनसंदोहसमुच्छेदकुठारिका संशयारण्यसमुच्छेदपरशुः सः गुरूणां शिखामणिः श्रेष्ठ इत्यर्थः ॥ ६ ॥

अर्थ-॥ ६ ॥ ज्याची मधुर भाषणाची शैली संशयरूपी अनेक वनें साफ करावयाची कुऱ्हाडच अशी वाटते (ज्याच्या गोड आणि मुद्देसूद बोलण्यानें शिष्याच्या मनांतील सर्व संशय दूर होतात.) तो गुरूंचाही मुख्य गुरु समजावा.

अवतरणिका-अथेममर्थमेव विशेषयति सूत्रद्वयेन—

**श्लोकः-यत्सूक्तिदर्पणाभोगे निर्मले दृश्यते सदा ॥
मोक्षश्रीर्बिंबरूपेण स गुरुर्भवतारकः ॥ ७ ॥**

व्याख्यानं—निर्मले यस्योपदेशोक्तिदर्पणमंडले मोक्षलक्ष्मीः बिंबरूपेण प्रतिबिंबरूपेणेत्यर्थः दृश्यते प्रकाशते स गुरुः भवतारकः संसारार्णवतारक इत्यर्थः ॥ ७ ॥

अर्थ-॥ ७ ॥ ज्या गुरूच्या निर्मळ उत्तम भाषणरूप आरशांत मोक्षलक्ष्मी प्रतिबिंब पडलेल्याप्रमाणें दिसते. (त्या गुरूच्या उपदेशानें शिष्यास मोक्ष प्राप्ति होते.) तो गुरु संसारांतून तारणारा होय.

अवतरणिका-अथ प्रकारांतरेणाह—

श्लोकः–शिष्याणां हृदयालेख्यं प्रद्योतयति यः स्वयम् ॥
ज्ञानदीपिकयाऽनेन गुरुणा कः समो भवेत् ॥ ८ ॥

व्याख्यानं—यः श्रीगुरुः शिष्याणां हृदयालेख्यं हृत्कमलस्थनिजरूपचित्रं ज्ञान-दीपिकया ज्ञानदीपेन प्रद्योतयति प्रकाशयति अनेन गुरुणा शिक्षागुरुणा कः समो भवेत् न कोऽपि सम इत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ जो गुरु आपल्या ज्ञानरूप दीपानें शिष्यांच्या चित्तरूप चित्रास प्रकाशित करितो त्या गुरूची बरोबरी कोणाच्यानेंही करवत नाहीं.

अवतरणिका–अथैतादृशगुरुरस्ति वेत्यत्रास्ति दुर्लभ इ-त्युक्त्वा शिक्षागुरुस्थलं समापयति—

श्लोकः–परमाद्वैतविज्ञानपरमौषधिदानतः ॥
संसाररोगनिर्माथी देशिकः केन लभ्यते ॥ ९ ॥

व्याख्यानं—शिवकारुण्यरहितेन केनापि न लभ्यत इत्यर्थः ॥ ९ ॥

इति शिक्षागुरुस्थलम् ॥

अर्थ–॥ ९ ॥ उत्तमतऱ्हेचें अद्वैत ज्ञानरूप उत्तमतऱ्हेच्या औषधदानानें संसाररूपरोग दूर करणारा देशिक (गुरु) कोणाला मिळणार? असा देशिक मिळणें दुर्मिळ आहे.

अथ ज्ञानगुरुस्थलम् ॥

अवतरणिका–अथ "शिवरूपानुसंधायि ज्ञानं येनोपदिश्यते ॥ मुमुक्षोर्मोक्षसिद्ध्यर्थं स ज्ञानगुरुरुच्यते" इति वातुलोत्तरवचना-नुसारेण ज्ञानगुरुस्थलं निरूपयति—

श्लोकः–उपदेष्टोपदेशानां संशयच्छेदकारकः ॥
सम्यग्ज्ञानप्रदस्साक्षादेष ज्ञानगुरुः स्मृतः ॥ १ ॥

व्याख्यानं—उपदेशानां रहस्यार्थानां उपदेष्टा उपदेशकृत् संशयच्छेदकारकः शिष्यसंदेहवारक एषः शिक्षागुरुरेव सम्यक् साक्षात् ज्ञानवदः प्रत्यक्षीभूतशिव-ज्ञानप्रदः सन् ज्ञानगुरुरिति स्मृत इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ उपदेश करावयाच्या ज्ञानाचा (रहस्यार्थाचा) उपदेश कर-णारा, शिष्यजनांचे संशय दूर करणारा, उत्तमरीतीच्या ज्ञानाचा उपदेश करणारा हा देशिक ज्ञानगुरुच होय.

अवतरणिका–ननु शिवज्ञानं कीदृशं तत्कथं प्रत्यक्षीकरोत
त्यत्राह—

श्लोकः–निरस्तविश्वसंभेदनिर्विकारं चिदंबरम् ॥
साक्षात्करोति यो युक्त्या स ज्ञानगुरुरुच्यते ॥ २ ॥

व्याख्यानं—निरस्तविश्वसंभेदं न किंचिदवेदिषमिति शून्यप्रतीतिबलात् निर कृतविश्वभेदं विकाररहितं चिदाकाशं चिद्व्योम युक्त्या स्फुटतरभासमाननी सुखादिप्रमात्रन्वेषणद्वारा पारमार्थिकप्रमातृलाभ इहोपदिश्यत इति शिवाद्वैतश स्वोक्तस्वानुभवयुक्त्या यः प्रत्यक्षीकरोति स ज्ञानगुरुरित्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ ज्याचे अनेकप्रकारचे निराळेपणा नाहींसे झाले असून ज्या कोणताही विकार राहिलेला नाहीं, तें चैतन्यस्वरूप (ज्ञानाकाश) आपल युक्तीच्या गोष्टी सांगून जो अनुभवास आणून देतो त्यास ज्ञानगुरु ह्मणावें.

अवतरणिका- अथ शिवज्ञानं प्रस्तौति सूत्रद्वयेन—

श्लोकः–कलंकवानसौ चंद्रः क्षयवृद्धिपरिप्लुतः ॥
निष्कलंकस्थितो ज्ञानचंद्रमा निर्विकारवान् ॥ ३ ॥

व्याख्यानं—क्षयवृद्धिपरिप्लुतः क्षयवृद्धिपीड्यमानः असौ चंद्रः कलंकव निर्विकारवान् विकाररहितः ज्ञानचंद्रमाः चिच्चंद्रः निष्कलंकस्थितः कलंकरहि सन् तिष्ठतीत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ हा आकाशांतील चंद्र कलंकी आहे त्याची शुक्लपक्षांत व होत जाते व कृष्णपक्षांत क्षय होत जातो, हा देशिकानें शिष्यास सांगित ज्ञानचंद्र निष्कलंक असून त्यांस क्षयवृद्धि होण्याची मुळींच भीति नाहीं.

पार्श्वस्थतिमिरं हंति प्रदीपो मणिनिर्मितः ॥
सर्वगामि तमो हंति बोधदीपो निरंकुशः ॥ ४ ॥

व्याख्यानं—मणिनिर्मितः रत्ननिर्मितः दीपः पार्श्वस्थांधकारं निवा निरंकुशः अनर्गलः बोधदीपः चित्प्रदीपः सर्वगामितमः सर्वत्र व्रियमानं निवारयतीत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ रत्नाचा दीप असला तर तो आजुबाजूचा आंधार न करितो देशिकापासून प्राप्त झालेला ज्ञानदीप सर्वजगांत जितकें अज्ञान (अंध पसरलेलें असेल तितकें सर्व दूर करितो व त्यास कोठेंही प्रतिबंध होत

अवतरणिका–अथ शिवज्ञानोपदेशतत्परं श्रीगुरुं सूत्र प्रस्तौति—

श्लोकः–सर्वार्थसाधकज्ञानविशेषादेशतत्परः ॥
ज्ञानाचार्यस्समस्तानामनुग्रहकरः शिवः ॥ ५ ॥

व्याख्यानं—भोगमोक्षलक्षणसर्वप्रयोजनसाधकशिवज्ञानविशेषोपदेशासक्तः ज्ञानगुरुरेव समस्तानां मुमुक्षूणां अनुग्रहकरः साक्षाच्छिव इत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ आचार्य सर्वप्रकारचे अर्थ सहजरीतीनें समजतील असें विशेष ज्ञान (शिवरहस्याचें ज्ञान) करून देण्यांत नेहमीं तत्पर असतो, सारांश, आचार्य हा सर्वजगावर उपकार करणारा प्रत्यक्ष शंकर आहे.

श्लोकः–कटाक्षचंद्रमा यस्य ज्ञानसागरवर्धनः ॥
संसारतिमिरच्छेदी स गुरुर्ज्ञानपारगः ॥ ६ ॥

व्याख्यानं—यस्याचार्यस्य कटाक्षचंद्रमाः शिवज्ञानोदधिवर्धनः संसारतिमिरच्छेदी स गुरुः श्रीगुरुः ज्ञानपारगः परापरज्ञानपारंगत इत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ या आचार्याचा नेत्रकटाक्ष (कृपाकटाक्ष)रूप चंद्र शिष्याच्या ज्ञानरूपसमुद्रास भरती आणतो, संसाररूप आंधाराचा नाश करितो, तो गुरुश्रेष्ठ ज्ञानाच्या पारंगत (परिपूर्णज्ञानी) होय ह्यांत शंका नाहीं.

अवतरणिका–अथ तमेव गुरुं भानुत्वेन वर्णयन् ततोऽप्याधिक्यं प्रतिपादयति—

श्लोकः–बहिस्तिमिरविच्छेत्ता भानुरेष प्रकीर्तितः ॥
बहिरंतस्तमश्छेदी विभुर्देशिकभास्करः ॥ ७ ॥

व्याख्यानं—एष भानुः बहिस्तिमिरविच्छेत्ता बाह्यांधकारनिवारकः विभुः चिद्व्यापकः देशिकभास्करः ज्ञानाचार्यसूर्यः बहिरंतस्तमश्छेदी नायं शिव इति विषयगतमज्ञानं नाहं शिव इत्यंतर्गताज्ञान [illegible] प्रकीर्तितः ॥ ७ ॥

अर्थ–॥ ७ ॥ सूर्य हा फक्त जगांतील बाहेरील आंधार दूर करितो परंतु गुरुरूप सूर्य आपल्या शिष्यांच्या मनांतील अज्ञान (आंधार) आणि सूर्याप्रमाणें बाहेर दिसणारा आंधार दूर करितो त्यामुळें आकाशांत प्रकाशमान दिसणाऱ्या सूर्यापेक्षां देशिकसूर्य श्रेष्ठ आहे.

अवतरणिका–अथ शिववेदकं शिवज्ञानं सूचयित्वा ज्ञानगुरुस्थलं सूत्रद्वयेन समापयति—

श्लोकः–कटाक्षलेशमात्रेण विनाध्यानादिकल्पनम् ॥
शिवत्वं भावयेद्यत्र स वेदः शांभवो मतः ॥ ८ ॥

C. N. Kalburgi

व्याख्यानं—ध्यानधारणादिसंकल्पं विना श्रीगुरोः कृपापांगदर्शनमात्रेण शिवत्वं भावयेत् स्फुटं भवेत् स वेदः शांभव इति मतः संमत इत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ जो वेदध्यानधारणादि संकल्पावांचून फक्त गुरूच्या कृपाकटाक्षानेंच शिवपणाची भावना करून देतो तो वेद शंकराचा आहे असें समजावें.

शिववेदकरे ज्ञाने दत्ते येन सुनिर्मले ॥
जीवन्मुक्तो भवेच्छिष्यस्स गुरुर्ज्ञानसागरः ॥ ९ ॥

व्याख्यानं—येन श्रीगुरुणा शिववेदकरे स्वात्मशिवतास्फुटीकरणप्रवीणे निर्मले शिवज्ञाने दत्ते सति शिष्यो जीवन्नपि मुक्तः स्यात् स गुरुः शिवज्ञानसागर इत्यर्थः ॥ ९ ॥

इति ज्ञानगुरुस्थलम् ॥

अर्थ–॥ ९ ॥ ज्या गुरूनें आपल्या शिष्यास निष्पापरीतीचें शिवाच्या यथार्थ रूपाचें ज्ञान करून दिल्यामुळें शिष्य जीवन्मुक्त होतो तो गुरु तर ज्ञानाचा समुद्रच समजावा.

अथ क्रियालिंगस्थलम् ॥

अवतरणिका–अथ "इष्टमूर्जं तपसानुयच्छति" इत्याथर्वणी श्रुतिः एतद्विवरणरूपेण "सकलद्वकलाग्राह्यमिष्टलिंगस्थलं महत्॥ इष्टावाप्तिकरं साक्षादनिष्टपरिहारकम् ॥ इष्टमूर्जं स्वभक्तानामनुयच्छति सर्वदा ॥ इष्टलिंगमिति प्राह तस्मादाथर्वणी श्रुतिः" ॥ इति वातुलतंत्रवचनेन ज्ञानगुरूपदिष्टक्रिया यत्र लयं गच्छति तत्क्रियालिंगस्थलमिति सप्तभिः सूत्रैः प्रतिपादयति—

श्लोकः–गुरोर्विज्ञानयोगेन क्रिया यत्र विलीयते ॥
तत्क्रियालिंगमाख्यातं सर्वैरागमपारगैः ॥ १ ॥

व्याख्यानं—गुरोः ज्ञानगुरोः विज्ञानयोगेन विशेषज्ञानयोगेन क्रिया यत्र यस्मिन्नधिकरणे विलीयते तत्क्रियालिंगं क्रियार्थकमिष्टलिंगमित्यागमपारगैः शिवसिद्धांतपारंगतैः सर्वैर्वीरशैवाचार्यैराख्यातं प्रोक्तमित्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ गुरुश्रेष्ठानें शिकविलेल्या शिवज्ञानामुळें ज्यामध्यें क्रिया लय पावते तें क्रियालिंगस्थल होय असें आगमांत पारंगत असणारे ज्ञानी लोक ह्मणतात.

अवतरणिका–ननु किं तत्स्वरूपमित्यत्राह—

सी. एन. कलबुर्गी.

श्लोकः—परानंदचिदाकारं परब्रह्मैव केवलम् ॥
लिंगं सद्रूपतापन्नं लक्ष्यते विश्वसिद्धये ॥ २ ॥

व्याख्यानं—नित्यानंदस्वरूपं सत् अंतर्मुखज्ञानस्वरूपं सत् अस्तितारूपंगतं केवलं परब्रह्मैव विश्वसिद्धये समस्तसत्क्रियासिध्यर्थं लिंगं इष्टलिंगमिति लक्ष्यत इत्यर्थः ॥ २ ॥

अर्थ– ॥ २ ॥ क्रियालिंग हें अतिशय आनंद देणारें व चित्स्वरूप आहे तें प्रत्यक्ष परब्रह्मस्वरूपच आहे. तें देहधारी (इष्टलिंगाच्या रूपानें स्पष्ट दिसतें तें फक्त विश्वांतील सर्व लोकांनीं पूजा वगैरे करून भक्तिमार्ग वाढवावा इतक्या-करितांच आहे, बाकी वास्तविक पाहतां लिंग हें परब्रह्मस्वरूपच आहे.

अवतरणिका—अथ सा सिद्धिः कथं भवतीत्यत्राह—

श्लोकः—लिंगमेव परं ज्योतिर्भवति ब्रह्मकेवलम् ॥
तस्मात्तत्पूजनादेव सर्वकर्मफलोदयः ॥ ३ ॥

व्याख्यानं—परंज्योतिस्वरूपं केवलं परब्रह्मैव क्रियार्थलिंगं तस्मात्तत्पूजनादेव सर्वकर्मफलोदयः सकलसत्कर्मफलाविर्भावः भवति जायत इत्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ इष्टलिंग हें श्रेष्ठ तेज आहे, तें परब्रह्मस्वरूप मानलें गेलें आहे, ह्मासाठीं त्याचें पूजन केलें ह्मणजे सर्वप्रकारानें आपले मनोरथ पूर्ण होऊन सुख लागतें.

अवतरणिका—तस्मालिंगमेव श्रेष्ठमित्याह—

श्लोकः—परित्यज्य क्रियाः सर्वा लिंगपूजैकतत्पराः ॥
वर्तंते योगिनः सर्वे तस्माल्लिंगं विशिष्यते ॥ ४ ॥

व्याख्यानं—सर्वे योगिनः सनकादिसमस्तयोगिनः सर्वाः क्रियाः समस्त-योगादिक्रियाः परित्यज्य इष्टलिंगपूजैकतत्पराः संतो वर्तंते तस्मात् लिंगं क्रियालिंगं विशिष्यत इत्यर्थः ॥ ४ ॥

अर्थ—॥ ४ ॥ सर्व योगसाधन करणारे योगी लोक लिंगपूजनाखेरीज इतर सर्वप्रकारच्या क्रिया करावयाच्या सोडून देऊन इष्ट लिंगपूजनच एकाग्रमनानें करितात त्यावरून इष्टलिंगपूजन श्रेष्ठ होय हें उघड आहे.

अवतरणिका—ननु सनकादीनां यज्ञादिक्रियापरित्यागः किं-निबंधन-इत्यत्राह—

सी. एन. कलबुर्गी.

श्लोकः–यज्ञादयः क्रियाः सर्वा लिंगपूजांशसंमिताः ॥
इति यत्पूज्यते सिद्धैस्तत्क्रियालिंगमुच्यते ॥ ५ ॥

व्याख्यानं—यज्ञादयः क्रियाः सर्वाः लिंगपूजालेशभाजिन इति मत्वा सनकादिभिः सिद्धैर्यल्लिंगं पूज्यते तस्मात्क्रियालिंगं सकलक्रियार्थलिंगमित्युच्यत इत्यर्थः ॥५॥

अर्थ–॥ ५ ॥ यज्ञ याग वगैरे जीं इतर कर्में आहेत ती इष्टलिंगाच्या पूजनाचें अंशभूत असल्यासारखे आहेत सनकादि ज्याची पूजा करितात तें इष्टलिंग (क्रियालिंग) होय असें ह्मणतात.

अवतरणिका–तस्माल्लिंगपूजासंपन्नस्य कापि क्रिया मास्त्वित्याह—

श्लोकः–किं यज्ञैरग्निहोत्राद्यैः किं तपोभिश्च दुश्चरैः ॥
लिंगार्चनरतिर्यस्य स सिद्धः सर्वकर्मसु ॥ ६ ॥

व्याख्यानं—सर्वकर्मसु सकलकर्मविषये सिद्धः सिद्धिमानित्यर्थः शिष्टं स्पष्टं ॥६॥

अर्थ–॥ ६ ॥ यज्ञ करणें नकोत, अग्निहोत्र घेणें नको, करण्यास कठीण अशीं अनेक खडतर तपें करावयास नकोत ज्याला लिंगपूजन करावयाची आवड आहे. त्याला सर्व कर्में केल्याचें फळ मिळतें.

अवतरणिका–अथ किमुत ब्रह्मादयोऽपीष्टलिंगपूजामहिम्नैव जगन्निर्माणादिक्रियासिद्धिमंतः संतः स्वस्वस्थानेषु लसंतीत्युक्त्वा क्रियालिंगस्थलं समापयति—

श्लोकः–ब्रह्मविष्णवादयः सर्वे विबुधा लिंगमाश्रिताः ॥
सिद्धाः स्वस्वपदे भांति जगत्तंत्राधिकारिणः ॥ ७ ॥

व्याख्यानं—सिद्धाः प्रसिद्धाश्चेत्यर्थः जगत्तंत्राधिकारिणः जगन्निर्माणादिक्रियाधिकारिण इत्यर्थः शिष्टं स्पष्टं ॥ ७ ॥

इति क्रियालिंगस्थलम् ॥

अर्थ–॥ ७ ॥ ब्रह्मदेव विष्णु वगैरे देव इष्टलिंगाचाच आश्रय करून इष्टलिंगाचें पूजन करितात त्यामुळें त्यांस हरएक कामांत यश येऊन ते आपआपले अधिकार योग्यरीतीनें चालवीत आहेत.

अथ भावलिंगस्थलम् ॥

अवतरणिका–अथ "भावग्राह्यमनीलाख्यं भावभावकरं परम् ॥ कल्पसर्गकरं देवं ये विदुस्ते जहुस्तनुं" इति श्वेताश्वतर-

श्रुत्यनुसारेण "निष्कलं भावलिंगं स्याद्भावग्राह्यं परात्परं" इति वातुलतंत्रवचनानुसारेण च क्रियेव भावोऽपि यत्र लयं गच्छति तद्भावलयकारणीभूतप्राणलिंगमिति भावलिंगस्थलं निरूपयति—

श्लोकः—क्रिया यथा लयं प्राप्ता तथा भावोऽपि लीयते ॥
यत्र तद्देशिकैरुक्तं भावलिंगमिति स्फुटम् ॥ १ ॥

व्याख्यानं—यथा क्रियालयस्थानं क्रियालिंगं तथा भावलयस्थानं भावलिंगं भावलयकारणीभूतं प्राणलिंगमिति देशिकैः स्फुटमुक्तमित्यर्थः ॥ १ ॥

अर्थ—॥ १ ॥ ज्याप्रमाणें क्रिया लय पावली त्याचप्रमाणें जेथें भाव देखील लय पावतो त्या स्थलास देशिकांनीं (गुरूंनीं, ज्ञात्यांना) भावलिंगस्थल असें ह्मटलें आहे.

अवतरणिका—अथानयोः किंविशिष्टमित्यत्र भावलिंगं सूत्रद्वयेन विशेषयति—

श्लोकः—भावेन गृह्यते देवो भगवान् परमः शिवः ॥
किं तेन क्रियते तस्य नित्यपूर्णो हि संस्मृतः ॥ २ ॥

व्याख्यानं—भगवान् षड्गुणैश्वर्यसंपन्नः परमेश्वरः भावेन गृह्यते निर्मलांतःकरणवृत्त्या प्रकाश्यत इति तेन बाह्यक्रियालयेन किं किं प्रयोजनम् न किंचित्प्रयोजनमित्यर्थः कुत इत्यत्राह सः परमेश्वरः हि यस्मात्कारणात् नित्यपूर्णः नित्यतृप्त इति स्मृतः तस्मात्कारणात् क्रियापूजनेन प्रयोजनं नास्तीत्यर्थः ॥ २ ॥

अर्थ—॥ २ ॥ भगवान् शंकर श्रेष्ठ देव आहे, तो भक्तीनें वश होतो, त्याला स्वतःला त्या भक्तीचा काडीमात्र उपयोग होत नाहीं, त्या भक्तीचा भक्ताला मात्र उपयोग होतो कांतर तो शंकर नित्यतृप्त आहे त्याला कोणत्याही वस्तूची अपेक्षा राहिलेली नाहीं.

अखंडपरमानंदबोधरूपः परः शिवः ॥
भक्तानामुपचारेण भावयोगात्प्रसीदति ॥ ३ ॥

व्याख्यानं—अपरिच्छिन्नपरमानंदचिद्रूपः परमेश्वरः शिवभक्तानां भक्तिपूर्वकमानसोपचारेण भावयोगात् मनस्सन्निवेशात् प्रसीदति प्रसन्नो भवतीति भावलिंगं प्रशस्तमिति भावः ॥ ३ ॥

अर्थ—॥ ३ ॥ शंकर हा श्रेष्ठ आहे, तो अखंड आनंदस्वरूप व बोधस्वरूप आहे. तो भक्तांच्या (शिवभक्तांच्या) सेवेमुळें (भक्तिपूर्वक मानसोपचारामुळें) प्रसन्न होतो.

अवतरणिका–तस्मात् भावलिंगमेव प्रशस्तमिति कंठोक्त्यै-वाह—

श्लोकः–मृच्छिलाविहिताल्लिंगाद्भावलिंगं विशिष्यते ॥
निरस्तसर्वदोषत्वात् ज्ञानमार्गप्रवेशनात् ॥ ४ ॥

व्याख्यानं—मृच्छिलादिनिर्मिताल्लिंगाद्भावलिंगं भावलयकारणीभूतप्राणलिंगं विशिष्यते विशिष्टं भवति कुत इत्यत्राह निरस्तसर्वदोषत्वात् छेदनभेदनादिदोषरहित्वात् ज्ञानमार्गप्रवेशनादिति ॥ ४ ॥

अर्थ–॥ ४ ॥ माती किंवा दगड ह्यांनीं तयार केलेल्या लिंगापेक्षां भावलिंग हें श्रेष्ठ आहे कांतर भावलिंगास कोणत्याही तऱ्हेचा दोष नसून उलट त्यापासून ज्ञानमार्ग आपणास दिसावयास लागतो (आपलें ज्ञान ज्यास्त ज्यास्त वाढतें)

अवतरणिका–अथ भावलिंगिनं कथयति—

श्लोकः–विहाय बाह्यलिंगानि चिल्लिंगं मनसि स्मरन् ॥
पूजयेद्भावपुष्पैर्यो भावलिंगीति कथ्यते ॥ ५ ॥

व्याख्यानं—यः मृच्छिलादिनिर्मितबाह्यलिंगानि परित्यज्य तत्प्राणेष्वंतर्मनसो लिंगमाहुरित्याथर्वणश्रुतिप्रसिद्धचिन्मयप्राणलिंगं मनसि हृत्कमले स्मरन् सन् भावपुष्पैः भावकल्पिताहिंसाद्यष्टपुष्पैः पूजयेत् सः भावलिंगीति भावगोचरीभूत प्राणलिंगवानिति कथ्यत इत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ बाह्यलिंगांचें (मातीचे किंवादगडाच्या लिंगाचें) पूजन न करितां चित्स्वरूप लिंगाची मनामध्यें कल्पना करून भावरूप पुष्पांनीं त्या लिंगाचें जो भक्त पूजन करितो त्यास भावलिंगी असें ह्मणावें.

अवतरणिका–अथ तत्प्राणलिंगपूजक एव शिवयोगीति कथयति—

श्लोकः–मूलाधारेऽथवा चित्ते भ्रूमध्ये वा सुनिर्मलम् ॥
दीपाकारं यजन् लिंगं भावद्रव्यैः स योगवान् ॥ ६ ॥

व्याख्यानं—मूलाधारे मूलकमले अथवा चित्ते मध्यहृदये भ्रूमध्ये ऊर्ध्वहृदये वा दीपाकारं "हृदयकमलमध्ये दीपवद्वेदसारं प्रणवमयमतर्क्यं योगिभिर्ध्यानगम्यं" इति योगशास्त्रप्रसिद्धदीपोपमं अत्यंतनिर्मलं लिंगं प्राणलिंगं भावद्रव्यैः पूर्वोक्तभावपुष्पैः यः पूजयेत्सः योगवान् शिवयोगवानित्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ मूलाधार कमलाच्या ठिकाणीं किंवा मनांत किंवा दोन्ही भों-

वृयांच्या मध्यें निर्दोष व प्रदीपासारखें. तेजोमय असें शिवलिंगकल्पना करून भावरूप द्रव्यांनीं पूजा करितो त्यास शिवयोगी ह्मणावें.

अवतरणिका–अथ भावपूजामेव विशेषयित्वा शिवयोगी क्रियालिंगनिष्ठो नेति कथयति—

श्लोकः–स्वानुभूतिप्रमाणेन ज्योतिर्लिंगेन संयुतः ॥
शिलामृद्दारुसंभूतं न लिंगं पूजयत्यसौ ॥ ७ ॥

व्याख्यानं—असौ शिवयोगी स्वानुभूतिप्रमाणेन अहमस्मीत्यकर्मकस्वानुभवप्रमाणेन ज्योतिर्लिंगेन चिन्मयप्राणलिंगेन संयुक्तः सन् पाषाणमृत्काष्ठनिर्मितं लिंगं न पूजयेत् नार्चयतीत्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ आपल्या अनुभवास येऊन ज्याचें प्रमाण समजून चुकलें आहे अशा चित्स्वरूपलिंगाचें पूजन करणारा मनुष्य दगड, माती, लांकूड ह्यांनीं तयार केलेल्या लिंगाची पूजा कधींही करीत नाहीं.

अवतरणिका–अथ भावसिद्धज्योतिर्लिंगपूजां विशिष्टीकृत्य भावलिंगस्थलं समापयति—

श्लोकः–क्रियारूपा तु या पूजा सा ज्ञेया स्वल्पसंविदाम् ॥
अंतरा भावपूजा तु शिवस्य ज्ञानिनां मता ॥ ८ ॥

व्याख्यानं—शिवस्य शिवलिंगस्य क्रियारूपा तु या पूजा कर्मकांडप्रसिद्धक्रियास्वरूपिणी या पूजास्ति सा स्वल्पसंविदाम् अज्ञानिनामेव मता संमता सती ज्ञेया । अंतरा भावपूजा तु ज्ञानकांडप्रसिद्धांतःपूजा ज्ञानिनां परिपूर्णशिवज्ञानिनां मता संमता ॥ ८ ॥

इति भावलिंगस्थलम् ॥

अर्थ–॥ ८ ॥ क्रियारूपा (कर्मकांडांत सांगितलेली) जी पूजा करावयाची ती पूजा अज्ञान (अल्पज्ञानी) लोकांकरितां सांगितलेली आहे शिवाची ज्ञानकांडांत सांगितलेली जी पूजा करावयाची ती भावपूजा होय ती ज्ञानी लोकां करितां सांगितली आहे.

अथ ज्ञानलिंगस्थलम् ॥

अवतरणिका–अथ "अचिंत्यं चाप्रमेयं च व्यक्ताव्यक्तं परं च यत् ॥ सूक्ष्मात्सूक्ष्मतरं ज्ञानं तन्मे मनः शिवसंकल्पमस्तु" इति श्रुत्यनुसारेण "परात्परं तु यत्प्रोक्तं तृप्तिलिंगं तदुच्यते ॥ भावना-

तीतमव्यक्तं परं ब्रह्मशिवाभिधं" इति प्रवृत्तवातुलोत्तरवचनानुसारेण च भावलिंगप्रकाशकज्ञानलयस्थानं तृप्तिलिंगापरपर्यायं ज्ञानलिंगस्थलं निरूपयति—

श्लोकः—तद्भावज्ञापकज्ञानं लयं यत्र समश्नुते ॥
तज्ज्ञानलिंगमाख्यातं शिवतत्त्वार्थकोविदैः ॥ १ ॥

व्याख्यानं—तद्भावज्ञापकज्ञानं तद्भावलिंगप्रकाशकज्ञानम् यत्र लयं गच्छति तत् ज्ञानलिंगं ज्ञानाश्रयीभूततृप्तिलिंगमिति शिवतत्त्वरहस्यार्थवेदिभिर्वीरशैवैराख्यातमित्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ भावलिंगाच्या पूजनामुळें उत्पन्न झालेलें ज्ञान ज्या स्थळांत लय पावतें तें ज्ञानलिंगस्थळ होय असें शिवरहस्य जाणणाऱ्यांनीं मानलें आहे,

अवतरणिका-अथ तदेव विशदयति—

श्लोकः—त्रिमूर्तिभेदनिर्मुक्तं त्रिगुणातीतवैभवम् ॥
ब्रह्म यद्बोध्यते तत्तु ज्ञानलिंगमुदाहृतम् ॥ २ ॥

व्याख्यानं—ब्रह्मविष्णुरुद्रलक्षणमूर्तित्रयभेदरहितं सत्वरजस्तमोरूपगुणत्रयोत्तीर्णतुर्यतुर्यातीतसंपत्तिमद्ब्रह्म बोध्यते श्रुतिगुरुस्वानुभवैः प्रकाश्यते तज्ज्ञानलिंगं ज्ञानस्याश्रयीभूततृप्तिलिंगमित्युच्यत इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ ज्या ज्ञानलिंगांत ब्रह्मा विष्णु, महेश अशा तीन मूर्ति मानलेल्या नसतात, तसेंच त्या ज्ञानलिंगांत सत्वगुण, रजोगुण, तमोगुण ह्यांचा संबंध नसतो केवळ परब्रह्मरूपाचाच ज्यामुळें बोध होतो तें ज्ञानलिंग होय असें ह्मटलें आहे.

अवतरणिका-अथ तत् ज्ञानलिंगं सूत्रद्वयेन विशेषयति—

श्लोकः—स्थूले क्रियासमापत्तिस्सूक्ष्मे भावस्य संभवः ॥
स्थूलसूक्ष्मपदातीते ज्ञानमेव परात्मनि ॥ ३ ॥

व्याख्यानं—स्थूले स्थूलरूपेष्टलिंगे क्रियारूपपूजासंपत्तिः सूक्ष्मे प्राणलिंगे भावोद्भवः निर्मलत्वमित्यर्थः ॥ स्थूलसूक्ष्मपदातीते परात्मनि तृप्तिलिंगरूपपरमात्मनि ज्ञानमेव ॥ ३ ॥

अर्थ-॥ ३ ॥ स्थूललिंगाचें (इष्टलिंगाचें) पूजन करणें झाल्यास गंधफूल वगैरे सामान सामुग्री लागते, सूक्ष्मलिंगाची पूजा करतेवेळीं भाव (मनोनैर्मल्य) उत्पन्न व्हावा लागतो व स्थूल सूक्ष्माच्याही पलीकडे असणाऱ्या तृप्तिलिंगस्वरूप

परमात्म्यामध्यें ज्ञानच व्हावें लागतें. (इष्टलिंगाचें पूजन क्रियेनें होतें, सूक्ष्मलिंगाचें पूजन भावानें होतें व परमेश्वर लिंगाचें पूजन ज्ञानानें होतें.)

अवतरणिका–ननु उपासनार्थं स्थूलसूक्ष्मरूपाणि शिवस्यावश्यमपेक्षणीयानीत्यत्राह—

श्लोकः–कल्पितानि हि रूपाणि स्थूलानि परमात्मनः ॥
सूक्ष्माण्यपि च तैः किं वा परबोधं समाचरेत् ॥ ४ ॥

व्याख्यानं—परमात्मनः स्थूलसूक्ष्मरूपाणां मायाकल्पितत्वेन केवलमुमुक्षूणां तैः प्रयोजनाभावात् परबोधं परब्रह्ममयतृप्तिलिंगमेव समाचरेत् उत्कृष्टत्वेन जानीयादित्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ परमेश्वराचीं (शिवाचीं) स्थूल आणि सूक्ष्म हीं दोन्हींरूपें मायेनें कल्पिलेलीं आहेत, त्यांच्याशीं मुमुक्षूंस कांहींएक कर्तव्य नाहीं त्यानें फक्त ज्ञानलिंगाची (ब्रह्मस्वरूप तृप्तिलिंगाची) उपासना केली पाहिजे.

अवतरणिका–अथ उत्कृष्टपरबोधाभिज्ञ एव ज्ञानलिंगीति कथयति—

श्लोकः–परात्परं तु यद्ब्रह्म परमानंदलक्षणम् ॥
शिवाख्यं ज्ञायते येन ज्ञानलिंगीति कथ्यते ॥ ५ ॥

व्याख्यानं—परात्परं विश्वापेक्षया परमुत्कृष्टशक्तितत्वं तदाश्रयत्वात्ततोऽप्युत्कृष्टं परमानंदलक्षणं शिवाख्यं यत्परब्रह्म तत् येन ज्ञायते स ज्ञानलिंगीति भण्यत इत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ परब्रह्मस्वरूप श्रेष्ठापेक्षांही श्रेष्ठ आहे, अतिशय आनंद हें त्याचें लक्षण आहे, त्याला शिव असें नांव आहे, तें परब्रह्मस्वरूप ज्यानें ओळखिलें त्यास ज्ञानलिंगी असें ह्मणावें.

अवतरणिका–अथ ज्ञानलिंग्येव परमुक्त इत्युक्त्वा ज्ञानलिंगस्थलं समापयति—

श्लोकः–बाह्यक्रियां परित्यज्य चिंतामपि च मानसीम् ॥
अखंडज्ञानरूपत्वं यो भजेन्मुक्त एव सः ॥ ६ ॥

व्याख्यानं—यः बाह्यक्रियां इष्टलिंगसंबंधिनीम् बाह्यक्रियापूजां मानसीं चिंतामपि च प्राणलिंगसंबंधिनीमान्तरध्यानिपूजां च परित्यज्य अखंडज्ञानरूपत्वं परिपूर्णतृप्तिलिंगं भजेत् सः मुक्त एवेत्यर्थः ॥ ६ ॥

इति ज्ञानलिंगस्थलम् ॥

अर्थ-॥ ६ ॥ बाहेरील (प्रपंचांतील व शरीराविषयींची) सर्वचिंता सोडून व मनांतली सर्वप्रकारची चिंता सोडून अखंड ज्ञानरूपपणाला जो पावतो तोच मुक्त होय असें समजावें.

अथ स्वयस्थलम् ॥

अवतरणिका-अथ "परंज्योतिरूपं संपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः तत्र पर्येति" इति छांदोग्यश्रुतेः"प्राणलिंगपरिज्ञानानंदस्स शिवलांछनः ॥ बाह्यकर्मपरित्यागी स स्वयं लिंगमुच्यत" इति वातुलोत्तरवचनाच्च ज्ञानलिंग्येव स्वयस्थलसंपन्न इति निरूपयति—

श्लोकः-तद्भावज्ञापकज्ञानं यत्र ज्ञाने लयं व्रजेत् ॥
तद्वानेष समाख्यातः स्वाभिधानो मनीषिभिः ॥ १ ॥

व्याख्यानं—तद्भावज्ञापकज्ञानलयस्थानवानेष ज्ञानालिंगी स्वाभिधानः स्वयलिंगाभिधान इति मनीषिभिः शिवज्ञानिभिः समाख्यात इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ तें भाव सुचविणारें ज्ञान ज्यांत लय पावतें तशा अवस्थेस जाऊन पोंचलेल्या भक्तास स्वयलिंग असें विद्वान् लोक ह्मणतात.

अवतरणिका-अथ तदाचारं प्रकाशयति सूत्रचतुष्टयेन—

श्लोकः-स्वच्छंदाचारसंतुष्टो ज्योतिर्लिंगपरायणः ॥
आत्मस्थसकलाकारः स्वाभिधो मुनिसत्तमः ॥ २ ॥

व्याख्यानं—ज्योतिर्लिंगपरायणः बाह्यलिंगवैमुख्येन चिल्लिंगनिष्ठः स्वैराचारसंतुष्टः शिवात्मनि विद्यमानसकलाकारवान् मुनिश्रेष्ठ एव स्वयं लिंगाभिधानवानित्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ जो स्वतंत्र असून सदाचार पाळण्यामुळें नेहमीं संतुष्ट असतो बाह्यलिंगाच्या पूजनांत विमुख होऊन ज्ञानालिंगाच्या स्वरूपांत निमग्न असतो, आत्मस्वरूपांत सर्व विश्व राहतें असें मानतो तो स्वयं नांवाचा (अधिकाराचा मुनीश्वर होय.

निर्ममो निरहंकारो निरस्तक्लेशपंचकः ॥
भिक्षाशी समबुद्धिश्च मुक्तप्रायो मुनिर्भवेत् ॥ ३ ॥

व्याख्यानं—विषयेषु ममताशून्यः शरीरादिष्वहमित्यभिमानशून्यः अविद्या-

C. N. Kalburgi

दिपंचक्लेशरहितः भिक्षान्नभोक्ता लोष्टाश्मकांचनेषु समबुद्धिमान् मुनिः स्वयं लिंगाभिधानवान् यतिः मुक्तप्रायः परमुक्तसदृशः स्यात् चरमदेहत्वात् इति ॥ ३ ॥

अर्थ-॥ ३ ॥ त्याला ममता (मीपणा,) ही वस्तु माझी आहे अशी स्वार्थपणाची बुद्धि) नसते, त्याला अभिमान नसतो, त्याला अविद्या वगैरे पांच प्रकारचे क्लेश मुळींच नसतात, तो भिक्षामागून आपला उदरनिर्वाह करितो, त्याला हा माझा मित्र हा माझा शत्रु असा भेदभाव मुळींच नसतो, बहुधा तो मुक्त झाल्याप्रमाणें असतो त्यास स्वयंमुनि असें ह्मणावें.

C. N. Kalburgi

यदृच्छालाभसंतुष्टो भस्मनिष्ठो जितेंद्रियः ॥
समवृत्तिर्भवेद्योगी भिक्षुके वा नृपेऽथ वा ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥

अर्थ-॥ ४ ॥ तो सहजगतीनें (कोणास त्रास न देतां) सहज रीतीनें जें काय मिळेल त्यावरच संतुष्ट असतो, त्याची भस्मावर मोठी श्रद्धा असते, त्यानें आपलीं सर्व इंद्रियें आपल्या स्वाधीन ठेविलेलीं असतात. त्याला राजा सारखाच आणि रंक सारखाच अशी त्याची स्थिति असते. त्यास स्वयं योगी असें ह्मणावें.

पश्यन् सर्वाणि भूतानि संसारस्थानि सर्वशः ॥
स्मयमानः परानंदे लीनात्मा वर्तते सुधीः ॥ ५ ॥

व्याख्यानं—सुधीः शोभनबुद्धिमान् स्वयलिंगयतिः सर्वशः सर्वत्र संसारस्थानि संसारचक्रस्थितानि सर्वाणि भूतानि पश्यन् स्मयमानः सन् विस्मयवान् सन् परानंदे परमानंदमयमहालिंगे लीनात्मा लयं गतः सन् वर्तत इत्यर्थः ॥ ५ ॥

अर्थ-॥ ५ ॥ सर्वठिकाणचे प्राणिमात्र संसारसुखांत निमग्न झालेले पाहून त्याचे मनास मोठें आश्चर्य वाटतें तरी तो बुद्धिमान् स्वतः अतिशय आनंद असणाऱ्या सच्चिदानंदस्वरूपांत निमग्न झालेला असतो. (निमग्न असतो).

अवतरणिका–अथ तस्य यतीश्वरस्य नित्यकर्मोक्त्वा स्वयस्थलं समापयति—

श्लोकः–ध्यानं शैवं तथा ज्ञानं भिक्षा चैकांतशीलता ॥
यतेश्चत्वारि कर्माणि न पंचममिहेष्यते ॥ ६ ॥

व्याख्यानं—शिवज्ञानं शिवाधिक्यज्ञानं शिवध्यानं भिक्षाहारः एकांतशीलत्वं यतेः स्वयलिंगशिवयोगिनः एतानि चत्वारि कर्माणि पंचमकर्म नेच्छाविषयीक्रियते ॥ ६ ॥

इति स्वयस्थलं ॥

अर्थ-॥ ६ ॥ नेहमीं शिवचिंतन करणें, शिवरहस्याचें ज्ञान असणें, भिक्षा आणि एकांताची जागा ह्या चार गोष्टी संन्याशास अगदीं जरूर आहेत, ह्याखेरीज आणखी ज्यास्त त्यास कांहीं नको.

अथ चरस्थलं ॥

अवतरणिका-अथ "आत्मरतिरात्मक्रीड आत्ममिथुनमात्मानंदः सः स्वराड् भवति तस्य स सर्वेषु लोकेषु कामचारो भवति" इति छांदोग्यश्रुतेः ॥ "अहं ममत्वशून्यात्मा निजबोधैकरूपदृक् ॥ स्वयमेव स्वयं भूत्वा चरतीति चरः स्मृतः" इति वातुलोत्तरवचनाच्च स स्वयलिंगसंपन्न एव स्वयं भूत्वा संचरतीति चरलिंगस्थलरूप इति कथयति—

श्लोकः-स्वरूपज्ञानसंपन्नो ध्वस्ताहंममताकृतिः ॥
स्वयमेव स्वयं भूत्वा चरतीति चराभिधः ॥ १ ॥

व्याख्यानं—स्वयलिंगीति शेषः निरस्ताहंकारममकारवान् स्वस्वरूपज्ञानसंपन्नः स्वयलिंगी स्वयमेव स्वयंभूत्वा चरतीति चरलिंगाभिधानवानित्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ ज्याला परब्रह्मस्वरूपाचें यथार्थज्ञान झालें आहे, ज्याचा मीपणा आणि आपपरभाव नाहींसा झालेला आहे असा स्वयंपदास (अधिकारास) पावल्यानंतर स्वतः तशा स्थितींत देशपर्यटन करितो त्यास चर असें ह्मणतात.

अवतरणिका-अथ तस्य चरलिंगस्याचार पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः-कामक्रोधादिनिर्मुक्तः शांतिदांतिसमन्वितः ॥
समबुद्ध्या चरेद्योगी सर्वत्र शिवबुद्धिमान् ॥ २ ॥

व्याख्यानं—स्पष्टं ॥ २ ॥

अर्थ-॥ २ ॥ ज्याला काम क्रोध, लोभ, मद, मत्सर वगैरे सहा शत्रु नसतात. शांति, दांति, दया, क्षमा वगैरे सर्व गुण परिपूर्णपणानें ज्याच्या आंगांत भरलेले असतात, सर्वजग शिवमय आहे अशा समजुतीनें तो चर योगीश्वर सर्वांशीं समता ठेवून जगांत वागत असतो.

श्लोकः-इदं मुख्यमिदं हीनमिति चिंतामकल्पयन् ॥
सर्वत्र संचरेद्योगी सर्वं ब्रह्मेति भावयन् ॥ ३ ॥

व्याख्यानं—योगी शिवयोगीत्यर्थः शिष्टं स्पष्टं ॥ ३ ॥

अर्थ-॥ ३ ॥ हें मुख्य आहे, हें कनिष्ठ आहे. अशी कल्पना चरयोग्याच्या मनांत मुळींच नसते. सर्वत्र परब्रह्मस्वरूपच व्यापलें आहे अशी मनाची समज होऊन चरयोगी सर्वठिकाणीं संचार करीत असतो.

श्लोकः-न सन्मानेषु संप्रीतिं नावमानेषु च व्यथाम् ॥
कुर्वाणः संचरेद्योगी कूटस्थे स्वात्मनि स्थितः ॥ ४ ॥

व्याख्यानं—कूटस्थे स्वात्मनि तुर्यसाक्षिकप्रत्यगात्मलक्षणनिजरूपे विद्यमानः शिवयोगी सन्मानेषु संप्रीतिं अवमानेषु दुःखं च न कुर्वाणः अकुर्वाणः सन् संचरेत् ॥ ४ ॥

अर्थ-॥ ४ ॥ चरलिंगयोग्याचा कोणी सन्मान केला तर त्यास संतोष होत नाहीं व कोणी अपमान केला तर त्याबद्दल त्यास दुःखही होत नाहीं. तो कूटस्थ परमेश्वराकडे आपलें लक्ष्य लाऊन नेहमीं सर्वत्र समभाव ठेवून विहार करीत असतो.

श्लोकः-अप्राकृतैर्गुणैः स्वीयैः सर्वं विस्मापयन् जनम् ॥
अद्वैतपरमानंदमुदितो देहिवच्चरेत् ॥ ५ ॥

व्याख्यानं—शिवाद्वैतोद्भूतपरमानंदसंतोषितः शिवयोगी अप्राकृतैः लोकोत्तरैः स्वकीयैर्गुणैः सर्वजनं विस्मययुक्तं संतं कुर्वन् सन् शरीरीव चरेत् चरतीत्यर्थः ॥५॥

अर्थ-॥ ५ ॥ तो चरलिंगयोगी आपल्या स्वतःच्या अलौकिक गुणांनीं सर्व लोकांस आश्चर्यचकित करितो व आपण अद्वैतसुखाच्या आनंदांत निमग्न होऊन संतुष्ट होऊन देहधारी मनुष्याप्रमाणें वर्तन करीत असतो.

श्लोकः-न प्रपंचे निजे देहे न धर्मे न च दुष्कृते ॥
गतवैषम्यधीर्धीरो यतिश्चरति देहिवत् ॥ ६ ॥

व्याख्यानं—गतवैषम्यधीः विधिनिषेधादिषु विगतविषमबुद्धिः धीरः स्थिरचित्तः यतिः शिवयोगी निजे देहे सति देहिवत् प्राकृतवत् प्रपंचे न चरति धर्मे पुण्यकृत्ये पापकृत्येऽपि न चरतीत्यर्थः ॥ ६ ॥

अर्थ-॥ ६ ॥ त्या चरलिंगसंन्यासास स्वतः शरीर असूनही त्यास प्रपंचाची काळजी नसते, आपल्या शरीराची काळजी नसते, धर्माची काळजी नसते,

पातकाची काळजी नसते, त्याच्या मनास चिंता कशी असते तें मुळींच माहीत नसतें.

अवतरणिका-अथ चरलिंगस्थलं समापयति—

श्लोकः-प्राकृतैश्वर्यसंपत्तिपराङ्मुखमनःस्थितिः ॥
चिदानंदनिजात्मस्थो मोदते मुनिपुंगवः ॥ ७ ॥

व्याख्यानं—प्रकृतितत्त्वसमुद्भूतब्रह्मविष्ण्वाद्यैश्वर्यसंपत्तिविमुखीभूतचित्तवृत्तिः यतिश्रेष्ठः चिदानंदस्वरूपनिष्ठः सन् मोदते सुखमनुभवन्नास्त इत्यर्थः ॥ ७ ॥

अर्थ-॥ ७ ॥ तरी तो चरयोगीश्वर सामान्यलोकांच्या ऐश्वर्याच्या संपत्तीविषयीं निरिच्छ असून चिदानंदस्वरूप आत्मस्वरूपांत सुखानें राहतो.

इति चरस्थलम् ॥

अथ परस्थलम् ॥

अवतरणिका-अथ "तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते परं" इति अमृतबिंदुश्रुतेः "स्वयं स्वयत्वमासाद्य चरतो न परः स्मृतः॥ असौ ततोऽतीतवर्णाश्रमत्वेन परः स्मृतः" इति वातुलोत्तरवचनाच्च स्वरूपसिद्धत्वेन चरतस्तस्य शिवयोगीश्वरस्य परं नास्तीति ज्ञानस्य परलिंगस्थलं सप्तभिः सूत्रैः प्रतिपादयति—

श्लोकः-स्वयमेव स्वयं भूत्वा चरतः स्वस्वरूपतः ॥
परं नास्तीति बोधस्य परत्वमभिधीयते ॥ १ ॥

व्याख्यानं—स्वयमेव स्वयं भूत्वा चरतस्तस्य शिवयोगिनः स्वस्वरूपतः परं नास्तीति ज्ञानस्य परलिंगत्वमभिधीयत इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ आपल्या स्वरूपाचें यथार्थज्ञान झाल्यामुळें स्वयंसिद्ध झालेला योगी संचार करीत असतो, त्याला त्याच्या पुढें जाणावयाचें कांहींएक राहिलें नसतें, त्या स्थितींत त्यास परस्थल असें ह्मणतात.

अवतरणिका-अथ तस्य वर्तनाप्रकारमाह—

श्लोकः-स्वतंत्रः सर्वकृत्येषु स्वं परत्वेन भावितः ।
तृणीकुर्वन् जगज्जालं वर्तते शिवयोगिराट् ॥ २ ॥

व्याख्यानं—स्वं परत्वेन विश्वाधिकत्वेन भावितः परामृष्टः शिवयोगिराट् शिवयोगीश्वरः सर्वकृत्येषु स्वतंत्रः सन् जगज्जालं जगत्समूहं तृणीकुर्वन् सन् वर्तत इत्यर्थः ॥ २ ॥

C. N. Kalburgi

अर्थ-॥ २ ॥ तो परलिंग शिवयोगी स्वतंत्र असतो, सर्वकृत्यांमध्यें आपणच परमेश्वर आहों असें समजून जगांतील अनेकप्रकारच्या विषयसुखास कसपटाप्रमाणें तुच्छ मानून जगांत वागत असतो.

C. N. Kalburgi

अवतरणिका-अथ स कथं मोदत इत्यत्राह—

श्लोकः-वर्णाश्रमसमाचारमार्गनिष्ठापराङ्मुखः ॥
सर्वोत्कृष्टं स्वमात्मानं पश्यन् योगी तु मोदते ॥ ३ ॥

व्याख्यानं—योगी शिवयोगीत्यर्थः शिष्टं स्पष्टं ॥ ३ ॥

अर्थ-॥ ३ ॥ चार वर्ण, चार आश्रम ह्यांत सांगितलेल्या सदाचारांवर त्याचा कधींही विश्वास बसत नाहीं. तो परयोगी सर्वोत्कृष्ट परमेश्वराचें चैतन्यस्वरूप पाहून सुख मानितो.

अवतरणिका-अथ किमिदं सर्वोत्कृष्टत्वं इत्यत्राह—

श्लोकः-विश्वातीतं परं ब्रह्म शिवाख्यं चित्स्वरूपकम् ॥
तदेवाहमिति ज्ञानी सर्वोत्कृष्टः स उच्यते ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥

अर्थ-॥ ४ ॥ शिव नांवाचें परब्रह्म चैतन्यस्वरूप सर्व जगापेक्षां श्रेष्ठ आहे, तें चैतन्यस्वरूप मीच आहें असें समजून तो सर्वांपेक्षां श्रेष्ठ असा परयोगी जगांत वागत असतो.

अवतरणिका-ननु ब्रह्मस्वरूपत्वे ब्रह्मवन्मुक्त एव स्यादित्यत्राह—

श्लोकः-अचलं ध्रुवमात्मानमनुपश्यन्निरंतरम् ॥
निरस्तविश्वविभ्रांतिर्जीवन्मुक्तो भवेन्मुनिः ॥ ५ ॥

व्याख्यानं—अचलमचंचलं ध्रुवं नित्यमात्मानं स्वस्वरूपं निरंतरमखंडितत्वेन अनुपश्यन् अनन्यत्वेन पश्यन् मुनिः शिवयोगी निरस्तविश्वविभ्रांतिः निराकृतप्रापंचिकभ्रांतिवान् सन् जीवन्मुक्तः आहारव्यवहारादिना जीवन्नपि पुनर्जन्मांतराभावान्मुक्त इत्यर्थः ॥ ५ ॥

अर्थ-॥ ५ ॥ आत्मस्वरूप (परमात्म्याचें चैतन्यस्वरूप) निश्चल आहे. अविनाशी आहे असा आपल्या मनांत नेहमीं विचार करून जगाची यथार्थ स्थिति (सर्व जग मायामय आहे असें) त्यास समजली असल्यामुळें त्याला

कोणत्याही तऱ्हेची भ्रांति पडत नाहीं, तो चरलिंगयोगी जीवन्मुक्त होऊन वागत असतो.

अवतरणिका-ननु वर्णाश्रमगतसमाचारपरित्यागेन कर्मदेवताः कुपिता भवंतीति कथं जीवन्मुक्त इत्यत्राह—

श्लोकः-ब्रह्माद्याः किं नु कुर्वंति देवताः कर्ममार्गगाः ॥
कर्मातीतपदस्थस्य स्वयंब्रह्मस्वरूपिणः ॥ ६ ॥

व्याख्यानं—स्वयं स्वयमेव ब्रह्मस्वरूपिणः ब्रह्मस्वरूपवान् सन् कार्मातीतपदस्थस्य पुण्यपापादिकर्मकांडोत्तीर्णस्थानगतस्य शिवयोगिनः कर्ममार्गगा ब्रह्मविष्ण्वाद्याः देवताः किं नु कुर्वंति न किमपि कर्तुं कुशला इत्यर्थः ॥ ६ ॥

अर्थ-॥ ६ ॥ तो परलिंगयोगी कर्माच्या पार गेलेला असल्यामुळें त्याच्या हातून यज्ञयागादिकर्में मुळींच घडत नाहींत, तरी तो स्वतः परब्रह्मस्वरूप झालेला असल्यामुळें कर्ममार्गानें प्रसन्न होणाऱ्या ब्रह्मदेव विष्णु वगैरे देवता त्या परयोग्यावर रागावल्या तरी त्यांच्या हातून त्याचें कांहीं नुकसान होत नाहीं.

अवतरणिका-पुनरयं शिवयोग्येवाज्ञानं विमोचयतीत्याह—

श्लोकः-स्वेच्छया संचरेद्योगी विमुंचन् देहमानिताम् ॥
दर्शनैः स्पर्शनैः सर्वानज्ञानपि विमोचयेत् ॥ ७ ॥

व्याख्यानं—देहमानिताम् देहाभिमानं विमुंचन् शिवयोगी स्वेच्छया संचरन्नपि स्वैराचारसंपन्नोऽपि दर्शनस्पर्शनाभ्यां सर्वानज्ञान् प्राकृतजनान् विमोचयेत् मुक्तान् कुर्यादित्यर्थः ॥ ७ ॥

अर्थ-॥ परलिंगयोगी देहाविषयीं कांहीं एक अभिमान ठेवीत नाहीं, तो जगामध्यें स्वच्छंदपणानें वागत असतो. व अज्ञानलोकांस आपलें दर्शन देऊन त्यांच्यावर कृपादृष्टि करून त्यांच्या मस्तकांवर आपला वरदहस्त ठेवून त्यांस संसारदुःखांतून सोडवितो.

अवतरणिका-अथ "निरंजनः परमं साम्यमुपैति दिव्यं" इति श्रुतेः परलिंगरूपशिवयोगीश्वर एव शिवभावसंपन्नत्वाज्जीवन्मुक्त इत्युक्त्वा परस्थलं समापयति—

वृत्तम्-नित्ये निर्मलभावने निरुपमे निर्धूतविश्वभ्रमे
सत्तानंदचिदात्मके परशिवे साम्यं गतः संयमी ॥

प्रध्वस्ताश्र धर्मनिगलः स्वच्छंदसंचारवान्
देहीवाद्भ भवो विजयते जीवन्विमुक्तः सुधीः ॥ ८ ॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण विरचिते सिद्धान्तशिखामणौ लिंगस्थले भक्तस्थलगतनवविधलिंगप्रसंगो नाम पंचदशीयः परिच्छेदः समाप्तः ॥

व्याख्यानं—नित्ये निर्मलस्वरूपे उपमातीते निरस्तसमस्तदोषे सच्चिदानंदात्मके परशिवे ज्ञातृत्वकर्तृत्वयोगात्साम्यं गतः प्रध्वस्तचतुर्वर्णचतुराश्रमधर्मशृंखलः स्वच्छंदाचारवान् स्वेच्छाचारवान् जीवन्मुक्तः सुधीः परलिंगरूपशिवयोगी देहीव देहवानपि अद्भुतवैभवः सन् आश्चर्यभूतमहत्वसंपत्तिमान् सन् विजयते सर्वोत्कर्षेण वर्तत इत्यर्थः ॥ ८ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां पंचदशीयः परिच्छेदः ।

अर्थ–॥ ८ ॥ श्रेष्ठशिवाचें चैतन्यस्वरूप सत्ता आणि आनंदरूप आहे, तसेंच अक्षय (नेहमीं राहणारें) असून त्याचें ध्यान पातकाचा नाश करणारें आहे, तें निरुपम असून जगासंबंधाचा अज्ञानाचा भ्रम दूर करितें, त्या सच्चिदानंदस्वरूपांत परयोगी साम्य पावतो. (तद्रूप बनतो) त्या परयोग्यास आश्रमधर्म आणि वर्णधर्म पाळण्याची जरूर नसते, तो इतर प्राणिमात्रासारखाच दिसतो तरी स्वतंत्र असतो, त्याचें सामर्थ्य लोकोत्तर असतें, अशा त्या बुद्धिमान् जीवन्मुक्त परयोग्याचा विजय असो.

ह्याप्रमाणें वीरशैवधर्माचा निर्णय असलेल्या सिद्धान्तशिखामणिग्रंथांतील लिंगस्थलापैकीं भक्तस्थलांत समावेश होणाऱ्या नऊ प्रकारच्या लिंगाचे स्थलाचें वर्णन असलेला हा पंधरावा भाग संपला.

श्रीशिवाय नमः ।

अथ षोडशीयः परिच्छेदः

अथ क्रियागमस्थलम्

अवतरणिका–अथागस्त्यप्रश्नः अगस्त्य उवाचेति—

श्लोकः–स्थलानां नवकं प्रोक्तं भक्तस्थलसमाश्रयम् ॥
माहेश्वरस्थले सिद्धं स्थलभेदं वदस्व मे ॥ १ ॥

व्याख्यानं–स्पष्टं ॥ १ ॥

अर्थ–॥ १ ॥ अगस्त्य ह्मणतात—भक्तस्थलास अनुसरून असणारीं नऊ स्थलें रेवणसिद्धांत, तूं मला सांगितलींस, आतां माहेश्वरस्थलांत जे निरनिराळे स्थलभेद आहेत ते मला सांग; असा अगस्त्याचा प्रश्न ऐकून

अवतरणिका–श्रीरेणुकः प्रत्युत्तरं वक्ति रेणुक उवाचेति—

श्लोकः–माहेश्वरस्थले संति स्थलानि नव तापस ॥
क्रियागमस्थलं पूर्वं ततो भावागमस्थलम् ॥ २ ॥
ज्ञानागमस्थलं चाथ सकायस्थलमीरितम् ॥
ततोऽकायस्थलं प्रोक्तं परकायस्थलं ततः ॥ ३ ॥
धर्माचारस्थलं चाथ भावाचारस्थलं ततः ॥
ज्ञानाचारस्थलं चेति क्रमादेषां भिदोच्यते ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ २ ॥ ३ ॥ ४ ॥

अर्थ–॥ २ ॥ रेवणसिद्ध ह्मणतात—अगस्त्यऋषे, माहेश्वरस्थलांत नऊ पोटभेद आहेत ते असे १ क्रियागमस्थल २ भावागमस्थल ॥ ३ ॥ ३ ज्ञानागमस्थल ४ सकायस्थल ५ अकायस्थल ६ परकायस्थल ॥ ४ ॥ ७ धर्माचारस्थल ८ भावाचारस्थल ९ ज्ञानाचारस्थल हीं नऊ स्थलें झालीं; आतां क्रमाक्रमानें त्या प्रत्येकस्थलाचे भेद सांगतों.

अवतरणिका–अथ "यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि" इति श्रुतेः "अल्पक्रिया बहुफलं वीरशैवं महेश्वरि" इति वातुलतंत्रवचनाच्च पूर्वोक्तपरस्थलसंपन्नः शिव-

योगीश्वर एव शिवः तस्य पूजैव क्रिया तत्परागम एव क्रियागम इति क्रियागमस्थलं निरूपयति—

श्लोकः—शिवो हि परमः साक्षात्पूजा तस्य क्रियोच्यते ॥
तत्परा आगमा यस्मात्तदुक्तोऽयं क्रियागमः ॥ ५ ॥

व्याख्यानं—परमः पूर्वोक्तपरलिंगशिवयोगीश्वर एव साक्षाच्छिवो हि प्रत्यक्षीभूतः शिवः तस्य पूजा क्रियोच्यते क्रियेत्युच्यत इत्यर्थः आगमाः यस्मात्कारणात् तत्पराः क्रियाप्रधानाः तत् तस्मात्कारणात् अयं क्रियागम इत्युच्यत इत्यर्थः ॥ ५ ॥

अर्थ—॥ ५ ॥ शंकर हा सर्वांहून श्रेष्ठ आहे, त्याच्या पूजेस क्रिया ह्मणतात ती क्रिया ज्या आगमांत सविस्तररीतीनें सांगितलेली आहे त्यांस क्रियागम ह्मणतात.

अवतरणिका—अथ तत्पूजाक्रियामेव पंचभिः सूत्रैर्विशेषयति—

श्लोकः—प्रकाशते यथा नाग्निररण्यां मथनं विना ॥
क्रियां विना तथांतस्थो न प्रकाशो भवेच्छिवः ॥ ६ ॥

व्याख्यानं—अरण्यां दारुपात्रे वन्हिः मंथनं विना यथा न प्रकाशते तथा पूजा क्रियां विना अंतस्थः लिंगमध्यस्थः शिवः प्रकाशो न भवेदित्यर्थः ॥ ६ ॥

अर्थ—॥ ६ ॥ अरणींत अग्नि असतो खरा, परंतु तो मंथन केल्यावांचून जसा बाहेर पडत नाहीं तसाच शिव प्रत्येक प्राणिमात्राच्या हृदयांत आहे तरीपण तो क्रियेवांचून (पूजेवांचून) प्रत्यक्ष (प्रसन्न) होत नाहीं.

अवतरणिका—अथ सा पूजा कथं कर्तव्येत्यत्राह—

श्लोकः—न यथा विधिलोपः स्याद्यथा देवः प्रसीदति ॥
यथागमः प्रमाणं स्यात्तथा कर्म समाचरेत् ॥ ७ ॥

व्याख्यानं—विधिलोपः इतिकर्तव्यतालक्षणनियमलोप इत्यर्थः विधेर्लोपे शिवो न प्रसीदति तथागमस्याप्रामाण्यं प्राप्नुयात् तस्मात् यथा विधेर्लोपो न भवति तथा पूजा कर्तव्येत्यर्थः ॥ ७ ॥

अर्थ—॥ ७ ॥ शिवाची पूजा अशारीतीनें करावी कीं, पूजेचे जे प्रकार आहेत ते पूर्णपणें पाळले जावे, शंकर प्रसन्न व्हावा व पूजा आगमास अनुसरून असावी.

अवतरणिका—ननु शिवपूजा किमर्थं कर्तव्येत्यत्राह—

श्लोकः–विधिः शिवनियोगोऽयं तस्माद्विहितकर्मणि ॥
शिवाराधनबुद्ध्यैव निरतः स्याद्विचक्षणः ॥ ८ ॥

व्याख्यानं—विहितकर्मणि शास्त्रोक्तकर्मण्ययं विधिः शिवपूजा कर्तव्येति विधिः शिवनियोगः शिवस्याज्ञारूपः तस्मात् विचक्षणः प्रवीणः शिवाराधनबुद्धौ निरतः आसक्तः स्यात् अन्यथा शिवाज्ञालंघने नरकं व्रजेदित्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ जें कर्तव्यकर्म मनुष्यास अवश्य करावयाचें असतें, त्यांत शिवपूजा करावी असा एक नियम आहे; व तशी शंकराची आज्ञाही आहे; ह्यासाठीं शहाणा मनुष्य शिवपूजन करण्याचीच बुद्धि मनांत ठेवितो.

अवतरणिका–अथ शिवपूजाप्रकारः कथं ज्ञातव्य इत्यत्राह–

श्लोकः–गुरोरादेशमासाद्य पूजयेत्परमेश्वरम् ॥
पूजिते परमेशाने पूजिताः सर्वदेवताः ॥ ९ ॥

व्याख्यानं—गुरूपदिष्टप्रकारेण शिवलिंगं पूजयेत् तस्मिन्पूजिते सर्वे देवाः पूजिताः स्युः शिवलिंगस्य सर्वदेवमयत्वेन सर्वदेवाः प्रसन्नाः स्युरित्यर्थः ॥ ९ ॥

अर्थ–॥ ९ ॥ गुरूची आज्ञा घेऊन शंकराची पूजा करावी, शंकराची पूजा केली ह्मणजे सर्व देवांची पूजा केली असें होतें.

अवतरणिका–ननु शिवपूजनस्य किं फलमित्यत्राह—

श्लोकः–सदाशिवार्चनोपायसामग्रीव्यग्रमानसः ॥
शिवयोगरतो योगी मुच्यते नात्र संशयः ॥ १० ॥

व्याख्यानं—सर्वदा शिवलिंगपूजासाधनसामग्रीसंपादनरूपशिवयोगनिष्ठः शिवयोगी मलमायादिपाशमुक्तो भवत्यस्मिन्नर्थे संशयो नास्तीत्यर्थः ॥ १० ॥

अर्थ–॥ १० ॥ जो भक्त नेहमीं शिवपूजनास लागणारें सामानसुमान मिळविण्यांत गुंतलेला असतो व नेहमीं शिवयोगसमाधींत आपला कालक्षेप करितो तो मोक्षास जातो ह्यांत शंका नाहीं.

अवतरणिका–ननु "ज्ञानादेव तु कैवल्यं" इत्यादि वचनैर्ज्ञानस्यैव मोक्षसाधनत्वं प्रतीयते न कर्मण इत्याशंक्य ॥ "न क्रियारहितं ज्ञानं न ज्ञानरहिता क्रिया ॥ अपश्यन्नंधको दग्धोऽगच्छन्पंगुश्च दह्यते" इति शिवरहस्यवचनानुसारेण समाधत्ते—

श्लोकः–अंधपंगुवदन्योन्यसापेक्षे ज्ञानकर्मणोः ॥
फलोत्पत्तौ विरक्तस्य तस्मात्तद्द्वयमाचरेत् ॥ ११ ॥

व्याख्यानं—ज्ञानकर्मणोः ज्ञानक्रिययोः अंधपंगुवदन्योन्यसापेक्षे सति तद्वयं ज्ञानक्रियाद्वयं तस्मात् फलोत्पत्तौ परापरमुक्तिरूपफलोत्पत्तौ विरक्त आचरेदित्यर्थः ॥११॥

अर्थ-॥ ११ ॥ आंधळा आणि पांगळा असे दोघे जर एखाद्या संकटांत सांपडले तर ते दोघे एक विचाराचे असल्यास कदाचित् दोघेही बचावतील. नाहीं पेक्षां दोघेही खास मरतील. त्याप्रमाणें वैराग्य पावलेल्या भक्तास ज्ञान आणि क्रिया हीं दोन्हीं पाहिजेत. नुसत्या ज्ञानानें किंवा नुसत्या क्रियेनें कांहीं-एक फळ मिळत नाहीं, ह्यासाठीं विरक्तास ज्ञान आणि क्रिया हीं दोन्हीं पाहिजेत.

अवतरणिका-ननु सिद्धज्ञानिनां कर्मणा प्रयोजनं नास्तीत्यत्राह—

श्लोकः-ज्ञाने सिद्धेऽपि विदुषां कर्मापि विनियुज्यते ॥
फलाभिसंधिरहितं तस्मात्कर्म न संत्यजेत् ॥ १२ ॥

व्याख्यानं—"न कर्मणि" इति श्रुतेः काम्यकर्मपरत्वात् विदुषां ज्ञाने सिद्धेऽपि वेदांते अग्निहोत्रवत् फलापेक्षारहितं कर्म विधीयत एव तत्तदाश्रमविहितकर्मपरित्यागे प्रत्यवायात् ॥ ज्ञानं प्रधानं न तु कर्महीनं कर्मप्रधानं न तु चिद्विहीनं ॥ तस्माद्द्वयोरेव भवेत्प्रसिद्धिर्न ह्येकपक्षो विहगः प्रयाति ॥ इत्यभियुक्तोक्तेश्च निष्कामकर्मानुष्ठानं न संत्यजेदित्यर्थः ॥ १२ ॥

अर्थ-॥ १२ ॥ विद्वानास ज्ञान असलें तरी त्यानें कर्म केलेंच पाहिजे. नाहीं-पेक्षां फलप्राप्ति होणार नाहीं, त्यानें करावयाचें कर्म फळ मिळण्याच्या इच्छेनें करूं नये, निष्कामपणानें करावें.

अवतरणिका-अथाचारस्याधिक्यं प्रतिपादयति—

श्लोकः-आचार एव सर्वेषामलंकाराय कल्प्यते ॥
आचारहीनः पुरुषो लोके भवति निंदितः ॥ १३ ॥

व्याख्यानं—स्पष्टं ॥ १३ ॥

अर्थ-॥ १३ ॥ आचार हा सर्व लोकांस भूषण आहे, जो मनुष्य आचारभ्रष्ट (दुराचारी) आहे तो मनुष्य लोकांत उपहासास पात्र होतो.

अवतरणिका-तस्मात्सत्कर्माचरणवान्भवेदित्युक्त्वा क्रियागमस्थलं समापयति—

श्लोकः-ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः ॥
तस्मादाचारवान्ज्ञानी भवेदादेहपातनम् ॥ १४ ॥

व्याख्यानं—स्पष्टं ॥ १४ ॥

इति क्रियागमस्थलं ॥

अर्थ–॥ १४ ॥ ज्ञान असून आचरण ही चांगलें असेल तर शंकर प्रसन्न होतो. ह्यासाठींच सदाचारसंपन्न आणि ज्ञानसंपन्न मनुष्य मुक्त होतो. हें उघड आहे.

अथ भावागमस्थलम् ॥

अवतरणिका–अथ "यं यथोपासते तदेव भवति यद्भावं तद्भवति यथाकारि तथाचारि तथा भवति" इति बृहदारण्यकश्रुतेः "शिवभावानुसंधानाच्छिवो भावे प्रकाशते" इति योगजागमस्थितेश्च निष्कामकर्मानुष्ठानवतो विरक्तस्य भावचिन्हमेव भावागमस्थलमिति निरूपयति—

श्लोकः–भावचिन्हानि विदुषो यानि संति विरागिणः ॥
तानि भावागमत्वेन वर्तंते सर्वदेहिनाम् ॥ १ ॥

व्याख्यानं—विरागिणः असत्क्रियाफलविरक्तस्य विदुषः ज्ञानिनः शिवयोगिनः यानि भावचिन्हानि संति, तानि सर्वदेहिनां प्राकृतानां भावागमत्वेन वर्तंत इत्यर्थः॥१॥

अर्थ–॥ १ ॥ वैराग्यवान् विद्वानाला जीं भावाचीं लक्षणें असतात तींच लक्षणें भावागमाला अनुसरून सर्व प्राणिमात्रांस असतात.

अवतरणिका–अथ पूर्वोक्तज्ञानाचारापेक्षया भाव एव विशिष्ट इति सूत्रद्वयेन कथयति—

श्लोकः–शिवोऽहमिति भावोऽपि शिवतापत्तिकारणम् ॥
न ज्ञानमात्रं नाचारो भावयुक्तः शिवो भवेत् ॥ २ ॥

व्याख्यानं—शिवोऽहमिति भावः शिवत्वप्राप्तिकारणं ज्ञानमात्रं न शिवतापत्तिकारणं न भवतीत्यर्थः आचारः केवलसत्क्रियाचारोऽपि न शिवत्वप्राप्तिकारणं न किंतु भावयुक्तः शिवोऽहमिति भावेन संयुक्त एव शिवः शिवस्वरूपो भवेदित्यर्थः॥२॥

अर्थ–॥ २ ॥ मी शिव आहें असा भाव (निश्चय) असणें हेंच शिवपणा मिळण्याला कारण आहे, ज्ञान हें एकटें शिवपणा येण्यास कारण नाहीं, किंवा फक्त आचारच शिवपणा येण्यास कारण नाहीं. मीच शिव आहें असा ज्याचा निश्चय असेल तोच शिव होईल.

अवतरणिका–ननु ज्ञानभावयोः को भेद इत्यत्राह—

श्लोकः—ज्ञानं वस्तुपरिच्छेदो ध्यानं तद्भावकारणम् ॥
तस्मात् ज्ञाते महादेवे ध्यानयुक्तो भवेत्सुधीः ॥ ३ ॥

व्याख्यानं—वस्तुपरिच्छेदः इदमेतादृशीति वस्तुस्वरूपनिर्णायकम् ज्ञानं तद्भावकारणम् निर्णीतस्य वस्तुनो भावस्य धर्मलाभस्य कारणं ध्यानं तदेवाहमिति मननं तस्मात् शिवे ज्ञाते सति सुधीः सुज्ञानी ध्यानयुक्तः भावेन संयुक्तः भवेत् स्यादित्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ ज्ञानापासून वस्तु कशी आहे इतकेंच समजतें, आणि ध्यानापासून आपणास त्याच्यासारखें होतां येतें, ह्यासाठीं महादेवाचें यथार्थज्ञान झाल्यावर बुद्धिमान् मनुष्य त्या महादेवाचें ध्यान करितो.

अवतरणिका—अथ कथं भावयेदित्यत्राह—

श्लोकः—अंतर्बहिश्च सर्वत्र परिपूर्णं महेश्वरम् ॥
भावयेत्परमानंदलब्धये पंडितोत्तमः ॥ ४ ॥

व्याख्यानं—अंतर्बहिश्च शरीरांतर्बहिश्चेत्यर्थः शिष्टं स्पष्टं ॥ ४ ॥

अर्थ—॥ ४ ॥ विद्वान् मनुष्य असें मानतो कीं, शंकर हा आंत आहे, बाहेर आहे, सर्वठिकाणीं परिपूर्णपणानें भरलेला आहे. शंकराविषयीं अशा रीतीची त्याची समजूत शिवानंदाची प्राप्ति करून देते.

अवतरणिका—अथ सा क्रिया पूजाभावरहिता चेद्वृथेति सदृष्टांतं सूत्रद्वयेनाह—

श्लोकः—अर्थहीना यथा वाणी पतिहीना यथा सती ॥
श्रुतिहीना यथा बुद्धिर्भावहीना तथा क्रिया ॥ ५ ॥

व्याख्यानं—श्रुतिहीना वेदश्रुतिसंमतिरहिता बुद्धिर्ज्ञानमित्यर्थः ॥ ५ ॥

अर्थ—॥ ५ ॥ ज्यांत अर्थ नाहीं असें बोलणें जसें शोभत नाहीं, नवरा नसणारी बायको जशी शोभत नाहीं, वेदाला अनुसरून नसणारी बुद्धि जशी शोभत नाहीं, तशीच भावावांचून (भावाखेरीज) पूजा (क्रिया) शोभत नाहीं.

श्लोकः—चक्षुर्हीनो यथा रूपं न किंचिद्वीक्षितुं क्षमः ॥
भावहीनस्तथा योगी न शिवं द्रष्टुमीश्वरः ॥ ६ ॥

व्याख्यानं—ईश्वरः समर्थ इत्यर्थः शिष्टं स्पष्टं ॥ ६ ॥

अर्थ—॥ ६ ॥ ज्या मनुष्यास दृष्टि नाहीं त्यास रूप जसें पाहतां येत नाहीं, तसाच भाव नसणारा योगी शंकरास यथार्थरीतीनें जाणूं शकत नाहीं.

श्लोकः–भावशुद्धेन मनसा पूजयेत्परमेष्ठिनम् ॥
भावहीनां न गृण्हाति पूजां सुमहतीमपि ॥ ७ ॥

व्याख्यानं—भावशुद्धेन ध्यानशुद्धेनेत्यर्थः सः स परमेश्वर इत्यर्थः शिष्टं स्पष्टं ॥ ७ ॥

अर्थ–॥ ७ ॥ भावामुळें निष्पाप झालेल्या शुद्धमनानें शंकराची पूजा करावी, भाव नसतांना मोठ्या समारंभानें पूजा केली तरी ती शंकरास प्रिय होत नाहीं.

अवतरणिका–अथ "भ्रमद्भ्रमरचिंतायां कीटोऽपि भ्रमरायते । शिवचिंतासमाक्रांतश्शिवरूपी भवेद्ध्रुवं" इति वीरागमवचनानुसारेण भावमहत्त्वं प्रकाशयति—

श्लोकः–नैरंतर्येण संपन्ने भावे ध्यातुं शिवं प्रति ॥
तद्भावो जायते यद्वत्क्रिमेः कीटस्य चिंतनात् ॥ ८ ॥

व्याख्यानं—क्रिमेः कीटस्य भ्रमरस्य चिंतनात् यद्वत् यथा तद्भावः भ्रमरकीटभावः जायते तथाभावे चित्ते चित्तविशिष्टे शिवं ध्यातुं नैरंतर्येण संपन्ने सति तद्भावः शिवस्वरूप एव जायते शिवं प्रतीयत इत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ शिवाचें ध्यान करण्याविषयीं दृढभाव झाला म्हणजे (नेहमीं शिवचिंतन करण्याचाच व्यासंग असला) म्हणजे कुंभारीण नांवाच्या (भुंग्याच्या आकाराच्या) किड्यानें आपल्या घरांत खाण्याकरितां म्हणून आणून ठेविलेल्या आळीप्रमाणें तो ध्यान करणारा भक्तही कांहीं दिवसांनीं शिवस्वरूपच होतो. (आळी नेहमी त्या किड्याचाच ध्यास लागल्यामुळें कांहीं दिवसांनीं ती स्वतः किडा होऊन उडून जाते त्याप्रमाणें शिवभक्तही शिवध्यानानें शिवस्वरूप होतो.

अवतरणिका–अथ निष्कलशिवचिंतने यद्यसमर्थः तद्विभूतिं वा चिंतयेदित्युक्त्वा भावागमस्थलं समापयति—

श्लोकः–निष्कलंकं निराकारं परब्रह्म शिवाभिधम् ॥
निर्ध्यातुमसमर्थोऽपि तद्विभूतिं विभावयेत् ॥ ९ ॥

व्याख्यानं—तद्विभूतिं सर्वज्ञत्वादिमहदैश्वर्यमित्यर्थः शिष्टं स्पष्टं ॥ ९ ॥

इति भावागमस्थलं ॥

अर्थ–॥ ९ ॥ परब्रह्मस्वरूप कलंकरहित आहे, आकाररहित आहे, त्याला शंकर असें नांव आहे, त्याचें यथार्थरीतीनें ध्यान करण्यास ध्यान करणारा भक्त असमर्थ झाल्यास त्यानें त्या परब्रह्माच्या ऐश्वर्याचें (विभूतीचें) ध्यान करावें.

C. N. Kalburgi

अथ ज्ञानागमस्थलम् ॥

अवतरणिका–अथ "ज्ञानी विज्ञानतत्परः" इत्यमृतबिंदुश्रुतेः "ज्ञानमेतच्छैवसंस्थं" इति पतिपरातंत्रवचनाच्च तद्भावागमसंपन्नस्य परयोगिनः ज्ञानचिन्हमेव ज्ञानागमस्थलमिति प्रतिपादयति—

श्लोकः–परस्य ज्ञानचिन्हानि यानि संति शरीरिणाम् ॥
तानि ज्ञानागमत्वेन प्रवर्तंते विमुक्तये ॥ १ ॥

व्याख्यानं—परस्य भावागमसंपन्नस्य परमशिवयोगिनः ज्ञानचिन्हान्येव प्राकृतानां पशुजनानां विमुक्तये सद्गतये ज्ञानागमत्वेन प्रवर्तंत इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ भावज्ञान असणाऱ्या श्रेष्ठ शिवयोग्याचीं जीं जीं चिन्हें असतात, तीं तीं चिन्हें प्राणिमात्रांच्या ज्ञानागमपणामुळें मोक्षप्राप्तीकरितां प्रवृत्त होतात.

अवतरणिका–अथ "यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते ज्ञात्वा देवं मृत्युपाशान् छिनत्ति" इति श्रुत्यनुसारेण पूर्वोक्तकेवलभावकर्मभ्यां फलं नास्तीत्युक्त्वा ज्ञानमेव पंचभिः सूत्रैर्विशेषयत्ति—

श्लोकः–भावेन किं फलं पुंसां कर्मणा वा किमिष्यते ॥
भावकर्मसमायुक्तं ज्ञानमेव विमुक्तिदम् ॥ २ ॥

व्याख्यानं—अहं ब्रह्मास्मीत्यपरोक्षज्ञानं ज्ञानमित्यर्थः शिष्टं स्पष्टं ॥ २ ॥

अर्थ—॥ २ ॥ नुसता भाव असला तर मनुष्यास त्याचा उपयोग नाहीं, किंवा फक्त यज्ञयागादिकर्म करीत राहिलें तरी त्याचा कांहीं उपयोग होत नाहीं, यासाठीं मोक्षप्राप्ति व्हावयाला भाव कर्म आणि ज्ञान हीं तीन पाहिजेत. तरच मोक्षप्राप्ति होते.

श्लोकः–केवलं कर्ममात्रेण जन्मकोटिशतैरपि ॥
नात्मनां जायते मुक्तिर्ज्ञानं मुक्तेर्हि कारणम् ॥ ३ ॥

व्याख्यानं—"हि न कर्मणेति तरति शोकमात्मवित्" इत्यादि बहुश्रुत्यादिप्रसिद्धोऽयमर्थः शिष्टं स्पष्टं ॥ ३ ॥

अर्थ–॥ ३ ॥ फक्त कर्मच (यज्ञयागादि) करीत राहिलें तर कोट्यावधि जन्म घेतले तरी प्राण्यांस मोक्षप्राप्ति होत नाहीं, मोक्षप्राप्ति होण्याला ज्ञान मूळ आहे. (ज्ञान असेल तर मनुष्याला मोक्षप्राप्ति होते.)

अवतरणिका—अथ कर्मणा मुक्तिर्नास्ति इत्येतदेव न किंतु कर्म ज्ञानहीनं चेत् पुनः संसारकारणमित्याह—

श्लोकः—ज्ञानहीनं सदा कर्म पुंसां संसारकारणम् ॥
तदेव ज्ञानयोगेन संसारविनिवर्तकम् ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥

अर्थ—॥ ४ ॥ प्राणी नेहमीं ज्ञान असल्यावांचून जीं जीं कर्में करितात तीं तीं त्यांस संसारदुःख वाढविण्यास कारण होतात. तींच कर्में ज्ञान असून केलीं तर संसारदुःखांतून सोडविण्यास कारण होतात.

अवतरणिका—अथ ज्ञानहीनं कर्म कथं पुनः संसारकारणमित्यत्राह—

श्लोकः—फलं क्रियावतां पुंसां स्वर्गाद्यं नश्वरं यतः ॥
तस्मात्स्थायिफलप्राप्त्यै ज्ञानमेव समभ्यसेत् ॥ ५ ॥

व्याख्यानं—"ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति" इत्यादिवचनबलात् केवलक्रियानिष्ठानां पुंसां स्वर्गाद्यं फलं नश्वरं नाशशीलं तस्मात् स्थायिमोक्षफलप्राप्त्यै ज्ञानमेव सम्यगभ्यसेदित्यर्थः ॥ ५ ॥

अर्थ—॥ ५ ॥ यज्ञ यागादि कर्म करणाऱ्यांस स्वर्गसुख मिळतें खरें परंतु तें नाशिवंत आहे, ह्यासाठीं चिरकाल टिकणारें मोक्षसुख मिळवावयाचें असेल तर ज्ञानाचाच अभ्यास केला पाहिजे.

अवतरणिका—ननु तत् ज्ञानं कथमभ्यसनीयमित्यत्राह—

श्लोकः—शास्त्राभ्यासादियत्नेन सद्गुरोरुपदेशतः ॥
ज्ञानमेव समभ्यस्येत्किमन्येन प्रयोजनम् ॥ ६ ॥

व्याख्यानं—शास्त्राभ्यासादियत्नेन निगमागमशिरःसिद्धवीरशैवशास्त्राभ्यासादिप्रयत्नेन सद्गुरोः उपदेशतः अनुग्रहात् ज्ञानमेव शिवज्ञानमेव समभ्यसेत् सम्यगभ्यासं कुर्यात् अन्येन पाशवहविर्भक्षणोपयुक्तपूर्वमीमांसादिशास्त्रेण किंप्रयोजनं नकिंचित्प्रयोजनमित्यर्थः ॥ ६ ॥

अर्थ—॥ ६ ॥ शास्त्राभ्यासाची खटपट करून व श्रीगुरूची कृपा संपादन करून ज्ञानाचाच अभ्यास करावा दुसऱ्या गोष्टीचें आपणास मुळींच कारण नाहीं.

अवतरणिका—अथ तज्ज्ञानमहत्वं सूत्रद्वयेन प्रकाशयति—

श्लोकः-ज्ञानं परशिवाद्वैतपरिपाकविनिश्चयः ॥
येन संसारसंबंधविनिवृत्तिर्भवेत्सताम् ॥ ७ ॥

व्याख्यानं—परब्रह्मलिंगादन्यन्नास्तीति परिपक्वनिश्चय एव ज्ञानं येन ज्ञानेन सतां संसारबाधानिवृत्तिर्भवेदिति ॥ ७ ॥

अर्थ-॥ ७ ॥ श्रेष्ठ अशा शंकराच्या अद्वैतशास्त्राचा यथार्थरीतीनें बोध होणें हेंच ज्ञान होय तें ज्ञान झालें असतां सज्जन मनुष्यांची संसारदुःखांतून सुटका होते.

अवतरणिका-अथ तदेव विशदयति—

श्लोकः-शिवात्मकमिदं सर्वं शिवादन्यन्न विद्यते ॥
शिवोऽहमिति या बुद्धिस्तदेव ज्ञानमुत्तमम् ॥ ८ ॥

व्याख्यानं—स्पष्टं ॥ ८ ॥

अर्थ-॥ ८ ॥ हें सर्व जग शिवस्वरूप आहे, शिवस्वरूपाखेरीज ह्या जगामध्यें दुसरें कांहीं नाहीं मी देखील शिव आहें अशी जी बुद्धि होणें त्यालाच ज्ञान असें ह्मणतात.

अवतरणिका-अथ तज्ज्ञानमहत्वं सूत्रद्वयेन प्रकाशयति—

श्लोकः-अंधो यथा पुरस्थानि वस्तूनि च न पश्यति ॥
ज्ञानहीनस्तथा देही नात्मस्थं वीक्षते शिवम् ॥ ९ ॥

व्याख्यानं—स्पष्टं ॥ ९ ॥

अर्थ-॥ ९ ॥ जसें एखादा आंधळ्यापुढें पुष्कळप्रकारचे पदार्थ आणून ठेविले तरी त्याला त्यांतलें कांहींएक दिसत नाहीं, तसेंच आत्मज्ञान नसणाऱ्या मनुष्याला त्याच्याच हृदयांत असणारा शंकर त्याला दिसत नाहीं.

अवतरणिका-ननु शिवदर्शनेन किमित्यत्राह—

श्लोकः-शिवस्य दर्शनात्पुंसां जन्मरोगनिवर्तनम् ॥
शिवदर्शनमप्याहुस्सुलभं ज्ञानचक्षुषाम् ॥ १० ॥

व्याख्यानं—अत्र स्यादिति शेषः जन्मरोगनिवर्तनं स्यादिति संबंधः शिष्टं स्पष्टं ॥ १० ॥

अर्थ-॥ १० ॥ शिवाचें दर्शन झालें असतां मनुष्यांचा जन्ममरणरूपरोग चुकतो तें शिवदर्शन ज्ञानदृष्टि मनुष्यांस सहजरीतीनें होतें.

अवतरणिका–तस्मात् ज्ञानेन विना अज्ञाननिवृत्तिर्नास्तीत्युक्त्वा ज्ञानागमस्थलं समापयति—

श्लोकः–दीपं विना यथा गेहे नांधकारो निवर्तते ॥
ज्ञानं विना तथा चित्ते मोहोऽपि न निवर्तते ॥ ११ ॥

व्याख्यानं—ज्ञानं विना शिवज्ञानं विनेत्यर्थः ॥ मोहोऽज्ञानं शिष्टं स्पष्टं ॥११॥

इति ज्ञानागमस्थलम् ॥

अर्थ–॥ ११ ॥ दिवा लावल्याखेरीज जसा घरांतील आंधार नाहींसा होत नाहीं तसाच बोध (शिवज्ञान) झाल्यावांचून मनुष्यांच्या मनांतील अज्ञान नाहींसें होत नाहीं.

॥ अथ सकायस्थलम् ॥

अवतरणिका–अथ "शरीरमाद्यं खलु धर्मसाधनं" इति वचनानुसारेण तच्छिवज्ञानसंपन्नस्य योगिनः शरीरस्य क्रियाभावज्ञानकारणत्वेनात्मत्वनिरूपणादयं लोकः सकाय इति षड्भिः सूत्रैः सकायस्थलं प्रतिपादयति—

श्लोकः–परस्य या तनुर्ज्ञेया देहकर्माभिमानिनः ॥
तया सकायो लोकोऽयं तदात्मत्वनिरूपणात् ॥ १ ॥

व्याख्यानं—अदेहकर्माभिमानिनः स्थूलोऽहमहंकरोमीति लौकिकवद्देहकर्माभिमानशून्यस्य परस्य पूर्वोक्तज्ञानसंपन्नस्य योगिनः परैर्ज्ञेया या तनुरस्ति तया तन्वा तदात्मत्वनिरूपणात् तच्छरीरस्य आत्मत्वनिरूपणात् अयं लोकः सकाय इति कायेन सहित इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ मी करितों, माझा देह असा अभिमान नसणाऱ्या श्रेष्ठ शिवयोग्याचें त्या शरीरालाच आत्मस्वरूप मानलें आहे ह्मणून हे शिवयोगी लोक काय आहेत.

अवतरणिका–ननु देहाभिमानशून्यस्य परयोगिनः कायापेक्षा किमर्थमित्यत्राह—

श्लोकः–कायं विना समस्तानां न क्रिया न च भावना ॥
न ज्ञानं यत्ततो योगी कायवानेव संचरेत् ॥ २ ॥

व्याख्यानं—यद्यस्मात् कारणात् समस्तानां च कायं विना क्रियाध्यानशून्यत्वात् शिवज्ञानसंपन्नः शिवयोगी कायवानेव संचरेदिति ॥ २ ॥

अर्थ-॥ २ ॥ कोणताही प्राणी असो, शरीरावांचून त्याच्याकडून शिवपूजा होत नाहीं, भावना होत नाहीं व ज्ञानही होत नाहीं. ह्यासाठीं तो शिवयोगी शरीराच्या साह्यानेंच पृथ्वीवर संचार करीत असतो.

अवतरणिका-नन्वस्य योगिनः शिवज्ञानसंपन्नत्वात् किमिति कायापेक्षेत्यत्राह—

श्लोकः-शिवैकज्ञानयुक्तस्य योगिनोऽपि महात्मनः ॥
काययोगेन सिद्ध्यंति भोगमोक्षादयस्सदा ॥ ३ ॥

व्याख्यानं—मोक्षस्य ज्ञानमूलत्वात् ज्ञानस्य कायमूलत्वादिति भावः ॥ ३ ॥

अर्थ-॥ ३ ॥ जरी शिवयोगी मोठ्या मनाचा महासामर्थ्यवान् असला व त्यास शिवज्ञान परिपूर्ण झालेलें असलें तरी त्याला विषयसुख आणि मोक्षसुख शरीराच्या साधनानेंच प्राप्त होतें (शरीर नसलें तर त्याला सुखप्राप्ति मुळींच व्हावयाची नाहीं.)

अवतरणिका-अत्र दृष्टांतमाह—

श्लोकः-काष्ठं विना यथा वह्निर्जायते न प्रकाशवान् ॥
मूर्तिं विना तथा योगी नात्मतत्वप्रकाशवान् ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥

अर्थ-॥ ४ ॥ विस्तव असला तरी त्याच्यावर लांकडें आणून घातलीं तर तो पेटून लखलखीत दिसतो त्याखेरीज दिसत नाहीं तसेंच शिवयोग्यास त्याचें शरीर असेल तरच आत्मतत्वाचा प्रकाश होईल त्याखेरीज होणार नाहीं.

अवतरणिका-पुनश्च दृष्टांतरमाह—

श्लोकः-मूर्त्यात्मनैव देवस्य यथा पूज्यत्वकल्पना ॥
तथा देहात्मनैवास्य पूज्यत्वं परयोगिनः ॥ ५ ॥

व्याख्यानं—स्पष्टं ॥ ५ ॥

अर्थ-॥ ५ ॥ परमेश्वराची मूर्ति पाहिली ह्मणजे जशी पूजा करावी अशी बुद्धि उत्पन्न होते त्याप्रमाणें शरीरामुळें शिवयोग्यास आत्म्याचें पूज्यपण समजून येतें शरीरच नसेल तर आत्म्याचें महत्व मुळींच समजलें नसतें.

अवतरणिका-किमुत शिवोऽपि मूर्त्यात्मनैव सृष्ट्यादीन् करोतीत्याह—

श्लोकः-निष्कलो हि महादेवः परिपूर्णः सदाशिवः ॥
जगत्सृष्ट्यादिसंसिद्धौ मूर्तिमानेव भासते ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ६ ॥

अर्थ-॥ ६ ॥ महादेव हा कलाहीन (निष्कल) निर्मायिक आहे नेहमीं आत्मानंदामुळें परिपूर्ण आहे, त्याला सदाशिव असें ह्मणतात. तो पृथ्वी उत्पन्न करणें पृथ्वीचें रक्षण करणें पृथ्वीचा संहार करणें, वगैरे कामाकरितां शरीर धारण करितो असें दिसून येतें.

अवतरणिका-अथ ब्रह्मादिदिव्यज्ञानिनोऽपि कायवंत एवेत्याह—

श्लोकः-ब्रह्माद्या देवताः सर्वा मुनयोऽपि मुमुक्षवः ॥
कायवंतो हि कुर्वंति तपः सर्वार्थसाधकम् ॥ ७ ॥

व्याख्यानं—स्पष्टं ॥ ७ ॥

अर्थ-॥ ७ ॥ ब्रह्मदेव, विष्णुवगैरे देवांस देखील शरीर आहे, मोक्षप्राप्तीची इच्छा करणारे मुमुक्षुलोक शरीर आहे ह्मणूनच शरीराच्या साधनानें सर्वप्रकारचे अर्थ प्राप्त करून देणारी तपश्चर्या करितात शरीर नसतें तर त्यांच्या हातून तपश्चर्या झाली नसती.

अवतरणिका-अथ "वैराग्येण वपुस्त्यागो नैव कार्यं मनीषिभिः" इति देवीकालोत्तरवचनानुसारेण शरीरस्य सकलसिद्धिमूलत्वात् न तत्परित्यागो युक्त इत्युक्त्वा सकायस्थलं समापयति—

श्लोकः-तपो हि मूलं सर्वासां सिद्धीनां यज्ञगह्वये ॥
तपस्तत्कायमूलं हि तस्मात्कायं न संत्यजेत् ॥ ८ ॥

व्याख्यानं—सर्वासां सिद्धीनां तपः कारणं तपसः शरीरं कारणं तस्मात्कायं वैराग्येण परित्यजेदिति ॥ ८ ॥

इति सकायस्थलम् ॥

अर्थ-॥ ८ ॥ तपश्चर्या केली ह्मणजे ह्या जगांतील अनेक प्रकारच्या सिद्धि प्राप्त होतात, ती तपश्चर्या शरीर सुदृढ असेल तरच शिवयोग्याकडून होईल त्या खेरीज होणार नाहीं ह्यासाठीं शरीराकडे दुर्लक्ष्य करूं नये.

॥ अथ अकायस्थलम् ॥

अवतरणिका-"अथाच्छायमशरीरं" इति श्रुतेः परयोगिनश्चौपचारिकदेहित्वादकाय इति पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः—औपचारिकदेहित्वाज्जगदात्मत्वभावनात् ॥
मायासंबंधराहित्यादकायो हि परः स्मृतः ॥ १ ॥

व्याख्यानं—परः उक्तलक्षणसकायः परयोगी औपचारिकदेहित्वात् देहाभिमानशून्यत्वात् जगदात्मत्वभावनात् स्वशक्तिप्रचयो विश्वमिति शिवसूत्रस्थितेः सर्वं विश्वं शिवस्वभावभूतचित्क्रियाशक्तिमयं तद्विषयत्वात् अन्यथा तद्बाह्यत्वेनाप्रमेयकार्यं स्यादिति चिंतनात् मायासंबंधराहित्यात् अतएवान्योन्यभावलक्षणभेदबुद्धिराहित्यात् अकाय इति स्मृतः हि प्रसिद्ध इत्यर्थः ॥ १ ॥

अर्थ—॥ १ ॥ श्रेष्ठ शिवयोगी देहधारी असल्यासारखा (इतर लोकांसारखाच) दिसून येतो खरा तरी त्याचें शरीरावर ममत्व मुळीं उपचारासाठीं असतें इतकेंच, ह्या त्याच्या गुणांमुळें, सर्व जग परमेश्वराचेंच स्वरूप आहे अशी त्याची समजूत असल्यामुळें व त्याला मायेचा संबंध मुळींच नसल्यामुळें त्यालाच अकाय (विदेही) असें ह्मणतात.

अवतरणिका—नन्वस्य देहाभिमानशून्यत्वेनाकायत्वेऽपि देहसंबंधस्य विद्यमानत्वात् तत्कृतविकारोऽस्ति किमित्यत्राह—

श्लोकः—परस्य देहयोगेऽपि न देहाश्रयविक्रिया ॥
शिवस्येव यतस्तस्मादकायोऽयं प्रकीर्तितः ॥ २ ॥

व्याख्यानं—शिवस्य देहयोगेऽपि यथा शरीरप्रयुक्तकामादिविकारो नास्ति तथा परयोगिनः शिवतुल्यत्वात् देहप्रयुक्तविकारो नास्तीत्यर्थः ॥ २ ॥

अर्थ—॥ २ ॥ श्रेष्ठशिवयोग्याला शरीर आहे ही गोष्ट खरी परंतु त्या शरीरामुळें इतर प्राणिमात्रांस जसे मनोविकार होतात. तसे शिवयोग्यास नाहींत कां तर इतर लोकांप्रमाणें त्याची शरीरावर ममता नसते वास्तविक तो शंकरच होय. ह्मणून त्याला अकाय (विदेही) असें ह्मणतात.

अवतरणिका—नन्वकायसकायत्वेन भासनं किंप्रयुक्तमित्यत्राह—

श्लोकः—परलिंगे विलीनस्य परमानंदचिन्मये ॥
कुतो देहेन संबंधो देहिवद्भासनं भ्रमः ॥ ३ ॥

व्याख्यानं—द्रष्टॄणां भ्रम इत्यर्थः ॥ शिष्टं स्पष्टं ॥ ३ ॥

अर्थ—॥ ३ ॥ परलिंग हें श्रेष्ठ असून परमानंदरूप आणि चैतन्यस्वरूप आहे त्या स्वरूपीं निमग्न असणाऱ्या शिवयोग्यास शरीराचा काय संबंध आहे ?

ते इतर प्राणिमात्रांसारखे शरीरावर प्रेम करितात असें दिसतें परंतु तो निव्वळ भ्रम आहे.

अवतरणिका-अथ देहसंबंधे सत्यपि तेन बाधकं नास्तीत्याह—

श्लोकः-देहाभिमानहीनस्य शिवभावे स्थितात्मनः ॥
जगदेतच्छरीरं स्याद्देहेनैकेन का व्यथा ॥ ४ ॥

व्याख्यानं—देहाभिमानशून्यत्वेन शिवभावे स्थितस्वरूपवतः एतत्परयोगिनः शिववद्विश्वं शरीरं स्यादित्येकेन शरीरेण का व्यथा न कापीत्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ ज्या शिवयोग्याला शरीरावर अभिमान मुळींच नसतो नेहमीं शिवस्वरूपांत त्याचें मन गढून गेलें असतें त्याचें शरीर पाहिलें तर सर्व जग त्याचें शरीर असल्यामुळें त्याच्या लौकिकदृष्टीनें मात्र दिसणाऱ्या एका शरीरास दुःख झालें म्हणून त्यास काय दुःख होणार आहे दिसतच आहे.

अवतरणिका-अथ शिववत्स्वातंत्र्याभावात्कस्मान्नास्तीत्यत्राह—

श्लोकः-शिवज्ञानैकनिष्ठस्य नाहंकारभवभ्रमः ॥
न चेंद्रियभवं दुःखं त्यक्तदेहाभिमानिनः ॥ ५ ॥

व्याख्यानं—शिवाहंभावनिष्ठस्य परिच्छिन्नशरीराहंकारशून्यत्वात् नाहमीश्वर इति तत्कृतभ्रांतिरिंद्रियजन्यं दुःखं च नास्तीत्यर्थः ॥ ५ ॥

अर्थ-॥ ५ ॥ ज्याचा शिवज्ञानावर पूर्ण विश्वास आहे व त्याला आपल्या शरीराविषयीं अभिमान पण राहिला नाहीं त्या श्रेष्ठशिवयोग्याला अहंकार नाहीं, संसाराच्या फेऱ्यांत पडावें लागत नाहीं व इंद्रियांसंबंधाचें दुःखही त्यास भोगावें लागत नाहीं.

अवतरणिका-अथोक्तार्थमेव स्फुटीकृत्याकायस्थलं समापयति—

श्लोकः-न मनुष्यो न देवोऽहं न यक्षो नैव राक्षसः ॥
शिवोऽहमिति यो बुध्यात्तस्य किं देहकर्मणा ॥ ६ ॥

व्याख्यानं—तस्य कायस्य शारीरककर्मणा किं किं प्रयोजनं न किमपीत्यर्थः शिष्टं स्पष्टं ॥ ६ ॥

इत्यकायस्थलं ॥

अर्थ-॥ ६ ॥ शिवयोगी आपल्या मनांत नेहमीं असें समजत असतो कीं, मी मनुष्य नव्हे, देव नव्हे. राक्षस नव्हे किंवा यक्षही नव्हे मी प्रत्यक्ष शंकर आहें, अशी त्याची स्वतःची समजूत असल्यामुळें त्याला शरीराची तरी पीडा काय होणार? आणि कर्माची तरी पीडा काय होणार? त्यास कर्माची व देहाची मुळींच पीडा होत नाहीं.

॥ अथ परकायस्थलम् ॥

अवतरणिका-"स एवैतत्परमं ब्रह्मधाम" इति मुंडकश्रुतेः अकायपरयोगी प्रकृतिमायातीत इति परब्रह्मशरीरत्वात् परकाय इति पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः-वशीकृतत्वात्प्रकृतेर्मायामार्गातिवर्तनात् ॥
परकायोऽयमाख्यातस्सत्यज्ञानसुखात्मकः ॥ १ ॥

व्याख्यानं—अयमकायः शिवयोगी प्रकृतेर्वशीकृतत्वात् वशीकृतेर्मायामार्गोल्लंघनात् सत्यज्ञानसुखात्मकः सच्चिदानंदस्वरूपवान्परकाय इत्याख्यात इत्यर्थः ॥१॥

अर्थ-॥ १ ॥ ज्यानें प्रकृतीस (मायेस) जिंकून आपल्यावश केलें, मायेच्या (अज्ञानपणाच्या) मार्गाच्या जो पारंगत झालेला आहे जो सत्यस्वरूप, ज्ञानस्वरूप आणि सुखस्वरूप आहे त्याला परकाय ह्मणतात.

अवतरणिका-नन्वेवं परकायत्वे कथितेऽपि स्थूलशरीरस्य विद्यमानत्वात्कथमधुनैव परकायत्वमित्यत्राह—

श्लोकः-परब्रह्मवपुर्यस्य प्रबोधानंदभासुरम् ॥
प्राकृतेन शरीरेण किमेतेनास्य जायते ॥ २ ॥

व्याख्यानं—चिदानंदाभ्यां प्रकाशमानं परब्रह्म यस्य वपुः शरीरं जायते अस्य परकायस्य प्राकृतेन शरीरेण किं अन्योन्यभेदाभावबुद्धिरूपमायामार्गोल्लंघनेन तत्कार्यरूपप्रकृतितत्वस्य वशीकरणात् सागरतरंगन्यायेन स्वाधीनीकरणात् प्रकृतिसंभवेन शरीरेण किं बाधकं न किमपि बाधकमित्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ त्या परकायाचें शरीर परब्रह्मस्वरूप आहे व त्यामुळें शिवज्ञान आणि शिवानंद ह्यानें परिपूर्ण झालें असल्यामुळें नेहमीं शोभत आहे त्या परकाय शिवयोग्याचें शरीर जरी इतर प्राणिमात्रांच्या शरीराप्रमाणें दिसलें तरी त्या शरीरापासून त्याला बाधा काय होणार आहे? त्याला त्यापासून कांहींएक पीडा होत नाहीं.

अवतरणिका-ननु तथापि शरीरमेव प्रतिबंधकमित्यत्राह—

श्लोकः-सम्यग्ज्ञानाग्निसंदग्धजन्मबीजकलेवरः ॥
शिवतत्वावलंबी यः परकायः स उच्यते ॥ ३ ॥

व्याख्यानं—सम्यग्ज्ञानाग्निना दृढतरशिवाद्वैतज्ञानाग्निना संदग्धं पुनरुत्पत्तिशंका यथा न भवति तथा सम्यग्दग्धं जन्मैव बीजं यस्य तादृशः कलेवरो भवांतरकारणीभूतसूक्ष्मशरीरो यस्य स तथाविधः शिवतत्वावलंबी परशिवस्वरूपवान् योऽस्ति सः परकाय इत्युच्यत इत्यर्थः जन्मरोगप्रवर्तकस्य सूक्ष्मशरीरस्य नष्टत्वात् स्थूलशरीरे सत्यपि बाधकं नास्तीति भावः ॥ ३ ॥

अर्थ-॥ ३ ॥ सम्यग्ज्ञान (वास्तविक रीतीचें शिवज्ञान) रूप अग्नीमध्यें ज्याच्या शरीराचें जन्ममरणरूप बीज जळून गेल्यामुळें पुन्हा त्यास जन्ममरणाची भीति राहिलेली नसते व त्याचें शरीरावर प्रेमही नसतें, तो फक्त शिवतत्वाच्या चिंतनांत निमग्न असतो, त्याला परकाय असें ह्मणतात.

अवतरणिका-ननु शरीरस्य विद्यमानत्वेनेंद्रियव्यापारानुवृत्तेर्बाधकमेवेत्यत्राह—

श्लोकः-इंद्रियाणि मनोवृत्तिवासनाः कर्मसंभवाः ॥
यत्र यांति लयं तेन सकायोऽयं परात्मना ॥ ४ ॥

व्याख्यानं—कर्मसंभवाः कर्मपाशसंभूताः मनोवृत्तिवासनाः इंद्रियार्थवासनाः इंद्रियाणि च दशेंद्रियव्यापाराः यत्र लयं यांति तेन परमात्मना परब्रह्मणा अयं एष परकायः सकायः कायेन सहितः सन् वर्तते एतत्कायस्यापि ब्रह्ममयत्वादिति भावः ॥ ४ ॥

अर्थ-॥ ४ ॥ पांच कर्मेंद्रियांचे व्यापार आणि पांच ज्ञानेंद्रियांचे व्यापार मनाच्या प्रवृत्तीची वासना कर्मापासून उत्पन्न होणाऱ्या अनेकप्रकारच्या वासना ज्यांत लय पावतात त्या परब्रह्माच्या संबंधानें परकाययोगी सकाय योग्याप्रमाणें दिसतो.

अवतरणिका-ननु शरीरस्य कथं ब्रह्ममयत्वमित्यत्राह—

श्लोकः-पराहंतामनुप्राप्य पश्येद्विश्वं चिदात्मकम् ॥
सदेहोऽतिभ्रमस्तस्य निश्चिता हि शिवात्मता ॥ ५ ॥

व्याख्यानं—पराहंतां परब्रह्मपरशिवपरात्मपर्यायपरतत्वमेव स्वयमिति भावमनुप्राप्य विश्वं सकलजगज्जालं चिदात्मकं परब्रह्मस्वभावभूतचित्क्रियांतर्गतत्वात्तन्मयमिति यः पश्यति तस्य सदेहः देहेन सहवर्तमानत्वं अतिभ्रमः पृ[illegible]यतां प्राकृ-

त्तानां भ्रमः निश्चिता हि शिवात्मता किंतु तस्य शरीरस्य शिवात्मता निश्चिता शक्तिमयत्वादिति॥ ५ ॥

अर्थ–॥ ५ ॥ तो परमेश्वर मी स्वतः आहें अशा दृढ समजूतीनें सकल जग चित्स्वरूप आहे असें मानणारा सदेह (देहधारी) पाहावें दिसतो तो फक्त भ्रम आहे, शिवस्वरूप हें मात्र खरें आहे.

अवतरणिका–तर्हि स परकायः शिववदकायस्सन् परममुक्त एव स्यादित्यत्राह—

श्लोकः–स्वस्वरूपं चिदाकारं ज्योतिस्साक्षाद्विचिंतयन् ॥
देहवानपि निर्देहो जीवन्मुक्तो हि साधकः ॥ ६ ॥

व्याख्यानं—स्वस्वरूपं साक्षाच्चिदाकारं ज्योतिरिति चिंतयन् साधकः देहवानपि पुनर्देहांतराभावान्निर्देहः जीवन्मुक्त इति हि प्रसिद्धमित्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ आत्मस्वरूप चैतन्याकार आहे, तें प्रत्यक्ष तेजोमय आहे, असें ध्यान करणारा (शिवयोगी) देहधारी असला तरी विदेही आहे व साधक (मुमुक्षु) असला तरी जीवन्मुक्त आहे असें समजावें.

अवतरणिका–तदेवोपपादयति—

C. N. Kalburgi

श्लोकः–देहस्तिष्ठतु वा यातु योगिनः स्वात्मबोधिनः ॥
जीवन्मुक्तिर्भवेत्सद्यश्चिदानंदप्रकाशिनी ॥ ७ ॥

व्याख्यानं—स्पष्टं ॥ ७ ॥

अर्थ–॥ ७ ॥ ज्या शिवयोग्याला आत्मस्वरूपाचें ज्ञान झालेलें आहे त्याचें शरीर असो किंवा नसो, त्याला चित्स्वरूपाचें यथार्थज्ञान करून देणारी जीवन्मुक्ति होतेच होते.

C. N. Kalburgi

अवतरणिका–अत्र दृष्टांतमाह—

श्लोकः–आत्मज्ञानावसानं हि संसारपरिपीडनम् ॥
सूर्योदयेऽपि किं लोकस्तिमिरेणोपरुद्ध्यते ॥ ८ ॥

व्याख्यानं—उपरुध्यते व्याप्यत इत्यर्थः ॥ शिष्टं स्पष्टं ॥ ८ ॥

अर्थ–॥ ८ ॥ आत्मज्ञान होईपर्यंत संसाराची पीडा भोगावी लागते, आत्मज्ञान होतांच ती पीडा नाहींशी होते, सूर्योदय होईपर्यंत लोकांस आंधाराचा उपद्रव होतो मग होत नाहीं.

अवतरणिका–अथ परकायस्थलं समापयति—

श्लोकः–देहाभिमाननिर्मुक्तः कलातीतपदाश्रयः ॥
कथं याति परिच्छेदं शरीरेषु महाबुधः ॥ ९ ॥

व्याख्यानं—शरीरकलाभिमानशून्यः सन् शरीरस्य पांचभौतिकत्वात् तत्कारणीभूतनिवृत्त्यादिकलातीतपरब्रह्मपदाश्रितः महाबुधः परमज्ञानी परकायः शरीरेषु परिच्छेदं परिमितत्वं कथं केन प्रकारेण याति न केनापि यातीत्यर्थः ॥ ९ ॥

इति परकायस्थलं ॥

अर्थ–॥ ९ ॥ ज्याचा शरीराविषयीं अभिमान सर्व नाहींसा झाला आहे, व परब्रह्मस्वरूपाचा ज्यानें आश्रय केला आहे, त्या ज्ञानवान् परकाय योग्यास हें शरीर माझें हें शरीर दुसऱ्याचें असा भेदभाव (समजूत) कोठून असणार? मुळींच असावयाचा नाहीं.

अथ धर्माचारस्थलम् ॥

अवतरणिका–अथ "यद्विदविद्यादिगमः स्वधर्मस्यानुचरणं स्वाश्रमेष्वेवानुकरणं स्वधर्म एव संवर्धते स्तंभशाखेवेतराण्यनेनोर्ध्वभाग्भवत्यन्यथा पतति" इति मैत्रेयश्रुतेः तस्य परकायस्याचार एव सर्वजनानां धर्माचार इति धर्माचारस्थलं प्रतिपादयति—

श्लोकः–तस्यैव परकायस्य समाचारो य इष्यते ॥
स धर्मः सर्वलोकानामुपकाराय कल्प्यते ॥ १ ॥

व्याख्यानं—तस्य परब्रह्मकायस्य शिवयोगिनः यः आचारः इच्छाविषयीक्रियते सधर्मः सन् समस्तजनानां उपकाराय कल्प्यत इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ त्या परकाय योग्याचें जसें सद्वर्तन असतें तोच धर्म होय त्या धर्माप्रमाणें लोकांनीं आपापलें वर्तन ठेविलें म्हणजे त्यांचें कल्याण होतें, त्याचें वर्तन लोकावर उपकार करण्यासारखेंच होय.

अवतरणिका–अथ तद्धर्माचारं सूत्रत्रयेण कथयति—

श्लोकः–अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दया क्षमा ॥
दानं पूजा जपो ध्यानमिति धर्मस्य संग्रहः ॥ २ ॥

व्याख्यानं—दानं सहजदानं पूजा शिवलिंगपूजा ध्यानं शिवलिंगचिंतनम् जपः शैवपंचाक्षराभ्यास इत्यर्थः ॥ शिष्टं स्पष्टं ॥ २ ॥

अर्थ–॥ २ ॥ जीवांचा नाश न करणें, खरें बोलणें, चोरी न करणें, ब्रह्म-

चर्य पाळणें, दया करणें, मनांत क्षमा असणें, दान देणें, पूजा करणें, जप करणें, ध्यान करणें, ह्या सर्व गोष्टी आपल्या शक्तीप्रमाणें करणें हाच धर्म-संग्रह करणें होय.

अवतरणिका–नन्विदं धर्माचरणं किमर्थं कर्तव्यमित्यत्राह–

श्लोकः–शिवेन विहितो यस्मादागमैर्धर्मसंग्रहः ॥
तस्मात्तमाचरन्विद्वान् तत्प्रसादाय कल्प्यते ॥ ३ ॥

व्याख्यानं—आगमैः शिवेन धर्मसमूहो विहित इति विधेय एव तस्माद्धर्माचारवान् शिवप्रसादाय समर्थो भवति अन्यथा शिवप्रसादशून्यः सन् नरकं व्रजेदित्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ धर्म अमुक प्रकारचा असा आहे असें शिवांनीं सांगितलें असून आगमांनींही तसेंच सांगितलें आहे, ह्यासाठीं विद्वान मनुष्यानें त्या धर्माप्रमाणें वागावें ह्मणजे त्यावर शंकराची कृपा होते.

अवतरणिका–ननु स धर्मः कथं कर्तव्य इत्यत्राह—

श्लोकः–अधर्मं न स्पृशेत्किंचिद्विहितं धर्ममाचरेत् ॥
तं च कामविनिर्मुक्तं तमपि ज्ञानपूर्वकम् ॥ ४ ॥

व्याख्यानं—विहितमहिंसादिरूपमित्यर्थः ॥ शिष्टं स्पष्टं ॥ ४ ॥

अर्थ–॥ ४ ॥ ज्ञानी मनुष्य अधर्माप्रमाणें मुळींच वागत नाहीं. सदाचारानें वागून धर्माचा संग्रह करितो, तो धर्मसंग्रह निष्कामपणानें आणि ज्ञानपूर्वक करितो. गैरसमजुतीनें वागत नाहीं.

अवतरणिका–अथ तत् ज्ञानं कीदृशमित्यत्र "मातृवत्परदारांश्च परद्रव्याणि लोष्टवत् । आत्मवत्सर्वभूतानि यः पश्यति स धर्मिराट्" इति श्रुत्यनुसारेण सूत्रद्वयेनाह—

श्लोकः–आत्मवत्सर्वभूतानि संपश्येद्योगवित्तमः ॥
जगदेकात्मताभावान्निग्रहादिविरोधतः ॥ ५ ॥

व्याख्यानं—योगवित्तमः योगीश्वरः जगदेकात्मताभावात् जगतः प्रकाशैकरूपत्वचिंतनात् निग्रहादिविरोधतः निग्रहानुग्रहयोरवकाशाभावात् सर्वभूतानि आत्मवत् स्वात्मवत् संपश्येत् अपक्षपातेन पश्येदित्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ आत्मज्ञानी मनुष्य आपल्याप्रमाणेंच इतर लोकांसही समजतो सर्व त्रैलोक्य शिवस्वरूप असल्यामुळें तो कोणावर कृपा करीत नाहीं व कोणाला

शिक्षा करीत नाहीं. कां तर त्याला सर्व जग अगदीं सारखें आहे. कोणी त्याला प्रिय नाहीं, कोणी अप्रिय नाहीं.

अवतरणिका–एवं पश्यतः ममकारो नैवेत्याह—

श्लोकः–एक एव शिवः साक्षाज्जगदेतदिति स्फुटम् ॥
पश्यतः किं न जायेत ममकारो हि विभ्रमः ॥ ६ ॥

व्याख्यानं—शिव एक एवैतज्जगदिति स्फुटं साक्षात्पश्यतः किं न जायेत सर्वं स्यादेव तस्मिन् जगति ममकारः प्रतिनियतमस्तु ममेत्यभिमानः विभ्रमः नास्तीत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ हें सर्व जग मिळून एक शिवस्वरूप आहे, हें उघड आहे, असा प्रत्यक्ष अनुभव घेणाऱ्या शिवयोग्यास सर्व जग माझेंच अशी बुद्धि कां होणार नाहीं. ?

अवतरणिका–अथ तद्धर्माचारं विरक्तोऽपि न त्यजेदित्याह–

श्लोकः–धर्म एव समस्तानां यतः संसिद्धिकारणम् ॥
निस्पृहोऽपि महायोगी धर्ममार्गं च न त्यजेत् ॥ ७ ॥

व्याख्यानं—संसिद्धिकारणं भोगमोक्षकारणमित्यर्थः ॥ शिष्टं स्पष्टं ॥ ७ ॥

अर्थ–॥ ७ ॥ ज्या अर्थी धर्म हा सर्व प्राणिमात्रांचे मनोरथ परिपूर्ण करितो व त्यास सर्वप्रकारच्या सिद्धि प्राप्त करून देतो ह्यासाठींच योगीश्वर मोठा निस्पृह असला तरी धर्ममार्ग सोडीत नाहीं.

अवतरणिका–ननु ज्ञानिनां किं धर्माचरणेनेत्यत्राह—

श्लोकः–ज्ञानामृतेन तृप्तोऽपि योगी धर्मं न संत्यजेत् ॥
आचारं महतां दृष्ट्वा प्रवर्तन्ते हि लौकिकाः ॥ ८ ॥

व्याख्यानं—ज्ञानामृतेन शिवज्ञानामृतेन तृप्तोऽपि महायोगी लोकहितार्थं धर्माचारं न परित्यजेदित्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ शिवयोगी ज्ञानामृतानें (शिवज्ञानानें) संतुष्ट असला तरी सदाचार सोडीत नाहीं, कांतर श्रेष्ठ लोकांचें आचरण पाहून सामान्य मनुष्य तसेच वागतात. तीच जर दुराचारानें वागेल तर इतर लोकांस वाईट मार्गास लाविलें असें होईल ह्मणून त्यास सदाचारानेंच वागावें लागतें.

C. N. Kalburgi

अवतरणिका–अथ कारणांतरमप्याह–

श्लोकः–सदाचारप्रियः शंभुः सदाचारेण पूज्यते ॥

सदाचारं विना तस्य प्रसादो नैव जायते ॥ ९ ॥

व्याख्यानं—ज्ञानिनोऽपि शिवप्रसादसिद्ध्यर्थं अहिंसादिधर्माचरणमावश्यकमिति भावः ॥ ९ ॥

इति धर्माचारस्थलम् ॥

अर्थ–॥ ९ ॥ शंकराला सद्वर्तन फार आवडतें ह्मणून सद्वर्तनानें वागून शंकराची पूजा करावी. सद्वर्तन असल्याखेरीज शंकराची कृपा होत नाहीं.

अथ भावाचारस्थलम् ॥

अवतरणिका–अथ "ज्योतिरूपं शिवं पूर्णं विश्वतेजोनिवर्तकम् ॥ आशयं भासयंतं च भावयंस्तन्मयो भवेत्" इति कामिकवचनानुसारेण धर्माचारसंपन्नस्य शिवयोगिनो भाव एव सर्वेषां भावाचार इत्युपपादयति—

श्लोकः–भाव एवास्य सर्वेषां भावाचारः प्रकीर्तितः ॥

भावो मानसचेष्टात्मा परिपूर्णः शिवाश्रयः ॥ १ ॥

व्याख्यानं—अस्य धर्माचारसंपन्नस्य शिवयोगिनः भाव एव सर्वेषां प्राकृतानां भावाचार इति परिकीर्तितः। भावो नामक इत्यत्राह मानसेति मनोव्यापाररूपः सन् परिपूर्णशिवाश्रयः अंतर्बहिश्च पूर्णशिव एव आश्रयो यस्य तादृशस्तु विशेषणभाव इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ शिवयोग्याचा भाव (दृढ निश्चय) हाच सर्व प्राणिमात्रांचा भावाचार होय असें मानलें आहे, मनांतील चेष्टा हेंच भावाचें स्वरूप आहे, (मनांतील विचारांपासूनच भाव होतो). तो पूर्ण असून शिवाचा आश्रय करितो (शिवावर त्याचा आधार असतो.)

अवतरणिका–अथ भावयुक्तकर्म सूत्रयद्वयेन विशेषयति—

श्लोकः–भावनाविहितं कर्म पावनादपि पावनम् ॥

तस्माद्भावनया युक्तं परधर्मं समाचरेत् ॥ २ ॥

व्याख्यानं—स्पष्टं ॥ २ ॥

अर्थ–॥ २ ॥ भावना (भक्ति) पुरःसर केलेलें शिवपूजा वगैरे कृत्य पवित्राहून पवित्र आहे. ह्यास्तव कोणतेंही धर्मकृत्य करणें झालें तर भावनापूर्वक करावें.

अवतरणिका–ननु भावेन किमित्यत्राह—

श्लोकः–भावेन हि मनःशुद्धिर्भावशुद्धिश्च कर्मणा ॥
इति संचिंत्य मनसा योगी भावं न संत्यजेत् ॥ ३ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥

अर्थ–॥ ३ ॥ भाव असला तर मन शुद्ध होतें, आणि कर्मामुळें (पूजा यज्ञ याग वगैरेमुळें भावशुद्धि होते हें मनांत आणून योगीश्वर भाव (श्रद्धा) कधींही सोडीत नाहीं.

अवतरणिका–ननु भावेन कर्मसिद्धिश्चेत्प्रतिबंधकं स्यादित्यत्राह—

श्लोकः–शिवभावनया सर्वं नित्यनैमित्तिकादिकम् ॥
कुर्वन्नपि महायोगी गुणदोषैर्न बाध्यते ॥ ४ ॥

व्याख्यानं—शिव एव कर्तेति शिवभावनया कुर्वन् योगी गुणदोषैः न लिप्यत इत्यर्थः ॥ शिष्टं स्पष्टं ॥ ४ ॥

अर्थ–॥ ४ ॥ शिवयोग्यानें शिवावर दृढ निश्चय ठेवून नित्य करावयाचीं कर्में आणि कांहीं विशेष कारणांमुळें करावयाचीं कर्में तीं सर्व केलीं तरी त्यांपासून त्याला चांगुलपणा किंवा वाईटपणा येत नाहीं.

अवतरणिका–ननु परयोगीश्वरस्य नित्यनैमित्तिककर्मसंगाभावात्कथं तदाचरणमंगीकृतमित्यत्राह—

श्लोकः–अंतःप्रकाशमानस्य संवित्सूर्यस्य संततम् ॥
भावेन यदुपस्थानं तत्संध्यावंदनं विदुः ॥ ५ ॥

व्याख्यानं—अंतः ऊर्ध्वे हृत्कमले निरंतरम् भासमानस्य चिदादित्यस्य भावेन यदुपस्थानं अनुवर्तनं तत् संध्यावंदनमिति वीरशैवाचार्याः जानंतीत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ मनामध्यें प्रत्यक्ष रीतीनें प्रकट झालेल्या ज्ञानरूप सूर्याचें नेहमीं भक्तिभावानें आराधन करणें त्यास संध्यावंदन म्हणतात.

अवतरणिका–तर्हि होमोऽप्यावश्यक इति स कीदृश इत्यत्राह—

श्लोकः–आत्मज्योतिषि सर्वेषां विषयाणां समर्पणम् ॥
अंतर्मुखेन भावेन होमकर्मेति गीयते ॥ ६ ॥

व्याख्यानं—आत्मज्योतिषि चिदग्नौ अंतर्मुखेन भावेन अबहिर्मुखेन भावेन सर्वेषां विषयाणां यत्समर्पणं सागरतरंगन्यायेन लयचिंतनं तदेकलोलीभावचिंतनं यदस्ति तत् होमकर्मेति गीयते कथ्यत इत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ अंतर्मुख वृत्ति होऊन (आत्मस्वरूपाकडे लक्ष्य लाऊन) आत्मस्वरूपामध्यें (चिदग्नींत) सर्वप्रकारचे विषय समर्पण करणें ह्यास होमकर्म ह्मणतात.

अवतरणिका–एवं नित्यनैमित्तिककर्माणि भावयन् संगरहितः स्यादित्याह—

श्लोकः–भावयेत्सर्वकर्माणि नित्यनैमित्तिकानि च ॥
शिवप्रीतिकराण्येव संगराहित्यसिद्धये ॥ ७ ॥

व्याख्यानं—संसारसंबंधनिवृत्त्यर्थं नित्यनैमित्तिकानि सर्वाणि कर्माणि शिवप्रीतिकराण्येवेति भावयेदित्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ वैराग्य दृढ होण्यासाठीं सर्वप्रकारचीं नित्य कर्में आणि नैमित्तिककर्में शिवाला संतुष्ट करण्याकरितांच मीं केलीं आहेत अशी कल्पना करावी.

अवतरणिका–ननु कर्मणः संगहेतुत्वात् कथं संगराहित्यं स्यादित्यत्राह—

श्लोकः–शिवे निवेश्य सकलं कार्याकार्यं विवेकतः ॥
वर्तते यो महाभागः स संगरहितो भवेत् ॥ ८ ॥

व्याख्यानं—विवेकतः कर्ता कारयिता कर्म तत्फलं च शिव एवेति विवेकतः कार्याकार्यं कर्तुं योग्यमयोग्यं च शिवे निवेश्य समर्प्य यो महाभागः महापुरुषः वर्तते सः संगरहितः भवसंगरहित इत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ सत्कृत्य असो किंवा दुष्कृत्य असो तें सर्व शिवाला अर्पण करून जो दैवशाली शिवयोगी वागत असतो त्यास वैराग्य प्राप्त होतें.

अवतरणिका–ननु भवसंगराहित्यं शिवदर्शनेन विना न संभवतीत्यत्राह—

श्लोकः–आत्मानमखिलं वस्तु शिवमानंदचिन्मयम् ॥
एकभावेन सततं संपश्यन्नेव पश्यति ॥ ९ ॥

व्याख्यानं—आत्मानं स्वात्मानं अखिलं वस्तु सर्वं विश्वं आनंदचिन्मयं परशिवं च एकभावेन एकत्वेन सततं पश्यन्नेव चिद्रूपत्वाच्छिवजीवैक्यं शिवस्वभावभूत-

चित्क्रियाव्याप्तत्वात्तदबाह्यत्वेन सर्वं विश्वं शिवात्मकमिति पश्यन्नेव प्रश्यति शिवं पश्यतीत्यर्थः ॥ ९ ॥

इति भावाचारस्थलं ॥

अर्थ–॥ ९ ॥ आपण स्वतःच सर्व जगांतील वस्तुसमुदाय आहोंत व शंकर हा आनंदी व सच्चिदानंदस्वरूप आहे असें दृढ निश्चयानें जो पुरुष नेहमीं पाहतो तोच मात्र यथार्थ रीतीनें पाहतो असें ह्मणावें.

अथ ज्ञानाचारस्थलम् ॥

अवतरणिका–अथ "सत्यं ज्ञानमनंतं ब्रह्म" इति श्रुतेः तस्य भावाचारसंपन्नस्य शिवयोगिनः ज्ञानाचार एव सर्वदेहिनां ज्ञानाचार इति ज्ञानाचारस्थलं निरूपयति—

श्लोकः–अस्य ज्ञानसमाचारो योगिनः सर्वदेहिनाम् ॥
ज्ञानाचारो यदुक्तोऽयं ज्ञानाचारः स कथ्यते ॥ १ ॥

व्याख्यानं—भावाचारसंपन्नस्यास्य योगिनः ज्ञानसमाचार एव सर्वदेहिनां ज्ञानाचार इति यद्यस्मात्कारणादुक्तः तस्मात्कारणात् सोऽयं ज्ञानाचार इति कथ्यत इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ शिवयोग्याला जें ज्ञान असतें व त्या ज्ञानाला अनुसरून तो आपलें स्वतःचें असें वर्तन ठेवितो तोच इतर लोकांचा ज्ञानाचार होय.

अवतरणिका–अथ तज्ज्ञानाचारमेव लक्षणपूर्वकं सूत्रत्रयेण कथयति—

श्लोकः–शिवाद्वैतपरं ज्ञानं ज्ञानमित्युच्यते बुधैः ॥
सिद्धेन वाप्यसिद्धेन फलं ज्ञानांतरेण किम् ॥ २ ॥

व्याख्यानं—शिवाद्वैतमेव परं प्रधानं यस्य तादृशं ज्ञानं बुधैः ज्ञानमित्युच्यते शास्त्रसिद्धेन वा तदसिद्धेन वा ज्ञानांतरेण भिन्नज्ञानेन किं फलं न किमपीत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ ज्या ज्ञानांत शिवाचें अद्वैतशास्त्र मुख्यत्वेंकरून वर्णिलें असतें त्यालाच ज्ञाते लोक ज्ञान असें ह्मणतात. दुसरीं शास्त्रसिद्ध व अशास्त्रसिद्ध ज्ञानें घेऊन काय करावयाचें आहे.

अवतरणिका–अथ तत्कथमित्यत्राह—

श्लोकः–निर्मलं हि शिवज्ञानं निःश्रेयसकरं परम् ॥
रागद्वेषादिकलुषं भूयः संसृतिकारणम् ॥ ३ ॥

व्याख्यानं—शिवज्ञानं शिवाद्वैतज्ञानं निर्मलं आणवादिमलसंगरहितं सत् परं निःश्रेयसकारणं सर्वोत्कृष्टमोक्षप्रदमित्यर्थः तद्व्यतिरिक्तभेदज्ञानं रागद्वेषादि कलुषं कामक्रोधादिमिश्रं सत् भूयः पुनः पुनः संसृतिकारणम् यातायातकारणमिति हि प्रसिद्धमित्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ शिवज्ञान हें निर्दोष आहे, श्रेष्ठ आहे, आणि मोक्षप्राप्ति करून देणारें आहे. शिवज्ञानाखेरीज दुसरें ज्ञान राग आणि द्वेष हे मिसळले गेल्यामुळें सदोष आहे आणि त्यापासून संसारदुःख मात्र जास्त वाढतें.

अवतरणिका–एवं ज्ञानस्वरूपमुक्त्वा तदाचारस्वरूपं कथयति—

श्लोकः–परिपूर्णं महाज्ञानं परतत्वप्रकाशकम् ॥
अवलंब्य प्रवृत्तो यो ज्ञानाचारः स उच्यते ॥ ४ ॥

व्याख्यानं—परतत्वप्रकाशकं परिपूर्णं अपरिच्छिन्नं महाज्ञानं शिवाद्वैतज्ञानं अवलंब्य धृत्वा य आचारः प्रवृत्तः स ज्ञानाचार इत्युच्यत इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ शिवज्ञान परिपूर्ण आहे त्यांत कांहीं न्यून (कमीपणा, दोष) नाहीं,– तें परब्रह्मस्वरूप दाखवून देतें, त्याचा आश्रय करून (त्याच्या अनुरोधानें जो वागतो तो ज्ञानाचार होय.

अवतरणिका–अथ तज्ज्ञानाचारिणं प्रकाशयति—

श्लोकः–निर्विकल्पे परे धाम्नि निष्कले शिवनामनि ॥
ज्ञानेन योजयेत्सर्वं ज्ञानाचारी प्रकीर्तितः ॥ ५ ॥

व्याख्यानं—निष्कले निरवयवे निर्विकल्पे भेदरहिते शिवनामनि शिव इत्यभिधानवति परे धाम्नि परब्रह्माधारे सर्वं जगज्जालं ज्ञानेन अभेदज्ञानेन यो योजयेत् स ज्ञानाचारीति कीर्तित इत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ शिवज्ञानास विकल्प (कुतर्क) नाहींत, तें श्रेष्ठ असून तेजःपुंज आहे, त्यास शिव असें नांव असून तें निष्कल (अवयवरहित) आहे, त्या शिवस्वरूपांत ज्ञान करून देऊन सर्व जगाला जो शिवयोगी नेऊन मिळवितो त्यास ज्ञानाचारी असें ह्मणावें.

अवतरणिका–अथ तस्य ज्ञानाचारिणः कर्मकार्पण्यं नास्तीति सूत्रद्वयेन कथयति—

श्लोकः–ज्ञानं मुक्तिप्रदं प्राप्य गुरुदृष्टिप्रसादतः ॥
कः कुर्यात्कर्मकार्पण्ये वांछां संसारवर्धने ॥ ६ ॥

व्याख्यानं—मुक्तिप्रदं परापरमोक्षप्रदं शिवज्ञानं गुरुकृपादृष्टिप्रसन्नतावशात् प्राप्य संसारवर्धने कर्मकार्पण्ये वांच्छां इच्छां कः कुर्यात् न कोऽपि कुर्यादित्यर्थः ॥६॥

अर्थ–॥ ६ ॥ सद्गुरूच्या कृपादृष्टीच्या प्रसादामुळें मोक्षप्राप्ति करून देणारें शिवज्ञान मिळाल्यावर संसार वाढविणाऱ्या यज्ञयागादि कर्माची खटपट करण्याची इच्छा कोण शहाणा करील? कोणी करणार नाहीं.

अवतरणिका–कुत इत्यत्राह—

श्लोकः–कर्म ज्ञानाग्निना दग्धं न प्ररोहेत्कथंचन ॥

यदाहुः संसृतेर्मूलं प्रवाहानुगतं बुधाः ॥ ७ ॥

व्याख्यानं—यत्कर्म बुधाः संसृतेर्मूलं मूलकारणं सत् प्रवाहानुगतं जलप्रवाहन्यायेनानादित्वेन श्रुतेरनुगतं सत् आहुः तत्कर्मबंधनं शिवज्ञानाग्निना दग्धं सत् कथंचन केनापि प्रकारेण न प्ररोहेत् नांकुरेदित्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ कर्म हें संसाराचें मूळ आहे व तें जलप्रवाहन्यायानें अनादिकालापासून चालत आलें आहे, तें संसाराचें मूळ कारण (कर्म) शिवज्ञानरूप अग्नीनें जळून गेल्यावर पुन्हा उगवत नाहीं असें ज्ञानी लोक म्हणतात.

अवतरणिका–तर्हि कर्मबंधनं कस्येत्यत्राह—

श्लोकः–ज्ञानेन हीनः पुरुषः कर्मणा बध्यते सदा ॥

ज्ञानिनः कर्मसंकल्पा भवंति किल निष्फलाः ॥ ८ ॥

व्याख्यानं—"यथा पुष्करपलाशं आपो न श्लिष्यंते एवंविधपापकर्म न श्लिष्यते स उत्तमः पुरुषः" इति छांदोग्यश्रुतेः । "अद्वैतभक्तियुक्तस्य योगिनः सकलाः क्रियाः । संति दग्धपटन्यायात्क्रियामात्रा हि न क्रिया" इति वीरागमोक्तेश्च ज्ञानिनः कर्मपाशो नास्तीत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ ज्या मनुष्यास शिवज्ञान नाहीं तो कर्माच्या फेऱ्यांत सांपडून बांधला जातो, ज्ञानी लोक कर्म करण्याचे विचार करून कर्मेंही करितात परंतु ते तीं कर्में फलाच्या आशेनें करीत नसल्यामुळें त्यांस इतर अज्ञान मनुष्यांच्या कर्माप्रमाणें बंध होत नाहीं.

अवतरणिका–अथ ज्ञानाचारस्थलं समापयति—

श्लोकः–शुद्धाचारे शुद्धभावो विवेकी ज्योतिः पश्यन्सर्वतश्चैवमेकम् ॥

ज्ञानध्वस्तप्राकृतात्मप्रपंचो जीवन्मुक्तश्चेष्टते दिव्ययोगी ॥ ९ ॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण विरचिते

सिद्धान्तशिखामणौ माहेश्वरस्थलाश्रितनवलिंगप्रसंगो नाम षोडशीयः परिच्छेदः समाप्तः ॥

व्याख्यानं—शुद्धाचारे निर्मलज्ञानाचारे शुद्धभावः निर्मलभाववान्विवेकी एवं प्रतियोगिरहितं शैवं तेजः सर्वतः पश्यन् ज्ञानध्वस्तप्राकृतात्मप्रपंचः शिवाद्वैतज्ञाननाशितप्रकृतिजन्यदेहप्रपंचवान् दिव्ययोगी स्वयंप्रकाशरूपः शिवयोगी जीवन्मुक्तः सन् चेष्टते लौकिकवद्व्यवहरतीत्यर्थः ॥ ९ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां माहेश्वरस्थलाश्रितनवलिंगप्रसंगो नाम षोडशीयः परिच्छेदः समाप्तः ॥ १६ ॥

अर्थ—॥ ९ ॥ ज्ञानाचारी शिवयोग्याचें निष्पाप अशा ज्ञानाचारावर निष्कपट प्रेम ठेवणारा, निर्मल भावाचा, ज्ञानी, शिवयोगी हा उपमारहित असें शिवाचें तेज सर्व ठिकाणीं पाहून त्या ज्ञानानें आपल्या प्राकृत प्रपंचाचा उध्वंस करून शिवाद्वैतज्ञानानें प्रकृतीपासून उत्पन्न होणाऱ्या देहरूपी प्रपंचाचा नाश करून उत्तम योगी असा ह्मणवून घेऊन स्वयंप्रकाशस्वरूपी होऊन जीवन्मुक्त होऊन लौकिकाचाराप्रमाणें जगांत व्यवहार करतो.

ह्याप्रमाणें वीरशैव धर्माचा निर्णय असलेल्या सिद्धान्तशिखामणि ग्रंथांतील माहेश्वरस्थलास अनुसरून असणाऱ्या नऊ लिंगस्थलांचें वर्णन असलेला हा सोळावा परिच्छेद संपला.

अथ सप्तदशीयः परिच्छेदः ।

प्रसादिस्थलप्रारंभः ।

अवतरणिका—अथागस्त्यप्रश्नः अगस्त्य उवाचेति—

श्लोकः—स्थलानि तानि चोक्तानि यानि माहेश्वरस्थले ॥
वदस्व स्थलभेदं मे प्रसादिस्थलसंश्रितम् ॥ १ ॥

व्याख्यानं—वदस्व उपदिशेत्यर्थः शिष्टं स्पष्टं ॥ १ ॥

अर्थ—॥ १ ॥ अगस्त्य ह्मणतात—रेवणसिद्धा, तूं माहेश्वरस्थलाचीं पोटभेद अशीं जीं स्थलें होतीं तीं मला सांगितलींस आतां प्रसादिस्थलाचीं जीं पोटभेदस्थलें आहेत तीं मला सांग; असा अगस्त्याचा प्रश्न ऐकून,

श्रीरेणुक उवाच ॥

स्थलभेदा नव प्रोक्ताः प्रसादिस्थलसंश्रिताः ॥
कायानुग्रहणं पूर्वमिंद्रियानुग्रहं ततः ॥ २ ॥

प्राणानुग्रहणं पश्चात्ततः कायार्पितं मतम् ॥
करणार्पितमाख्यातं ततो भावार्पितं मतम् ॥ ३ ॥
शिष्यस्थलं ततः प्रोक्तं शुश्रूषास्थलमेव च ॥
ततः सेव्यस्थलं चैषां क्रमशः श्रृणु लक्षणम् ॥ ४ ॥

अर्थ-॥ २ ॥ रेवणसिद्ध ह्मणतात—प्रसादिस्थलाच्या अंगभूत असणाऱ्या स्थलांचे नऊ भेद आहेत. ते असे- १ कायानुग्रहस्थल २ इंद्रियानुग्रहस्थल ॥ ३ ॥ ३ प्राणानुग्रहस्थल ४ कायार्पितस्थल ५ करणार्पितस्थल ६ भावार्पितस्थल ॥ ४ ॥ ७ शिष्यस्थल ८ शुश्रूषास्थल आणि ९ सेव्यस्थल हीं नऊ स्थलें झालीं, आतां प्रत्येकाचें क्रमाक्रमानें लक्षण सांगतों तें ऐक.

अथ कायानुग्रहस्थलम् ॥

अवतरणिका–"अथ शुचिः समग्रीवशिरः शरीर इति" कैवल्यश्रुतेः स ज्ञानाचारवान् शिवयोगी स्वरूपशरीरं दर्शयन् अनुगृह्णातीति कायानुग्राहक इति सूत्रत्रयेण निरूपयति—

श्लोकः–अनुगृह्णाति यल्लोकान् स्वंकायं दर्शयन्नसौ ॥
तस्मादेव समाख्यातः कायानुग्रहनामकः ॥ ५ ॥

व्याख्यानं—असौ ज्ञानाचारसंपन्नः शिवयोगी यद्यस्मात् कारणात् स्वकायं दर्शयन् सन् लोकान् प्राकृतान् अनुगृह्णात्यनुग्रहं करोति तस्मादेषः कायानुग्रहनामकः कायानुग्रह इत्यभिधानवानिति समाख्यात इत्यर्थः ॥ ५ ॥

अर्थ-॥ ५ ॥ ज्या अर्थी शिवयोगी आपलें शरीर लोकांस दाखवून लोकांवर उपकार करितो ह्मणून त्यास कायानुग्रह असें ह्मणतात.

अवतरणिका–तत्कथमित्यत्र दृष्टांतमाह—

श्लोकः–यथा शिवोऽनुगृह्णाति मूर्तिमाविश्य देहिनः ॥
तथा योगी शरीरस्थः सर्वानुग्राहको भवेत् ॥ ६ ॥

व्याख्यानं—शिवो यथा चंद्रशेखरादिमूर्तिमाविश्य देहिनः प्राणिनः अनुग्रहं करोति तथा योगी शरीरस्थः सन् शिवदीक्षासंस्कृतदिव्यशरीरस्थः सन् सर्वानुग्राहकः स्यादित्यर्थः ॥ ६ ॥

अर्थ-॥ ६ ॥ जसा शंकर स्वतः शरीर घेऊन प्राणिमात्रांवर उपकार करितो

त्याप्रमाणें शिवयोगी शिवदीक्षेनें पवित्र झालेल्या दिव्यशरीरांत राहून सर्वांवर उपकार करितो.

अवतरणिका–अथ शिववंदसंगश्चेत्याह—

श्लोकः–शिवः शरीरयोगेऽपि यथा संगविवर्जितः ॥
तथा योगी शरीरस्थो निःसंगो वर्तते सदा ॥ ७ ॥

व्याख्यानं—सुखदुःखादिसंगरहित इत्यर्थः ॥ शिष्टं स्पष्टं ॥ ७ ॥

अर्थ–॥ ७ ॥ जसा शंकर शरीर धारण केलें तरी निःसंग असतो त्याप्रमाणेंच शिवयोगी शरीर असणारा (देहधारी) दिसला तरी नेहमीं निःसंग असतो.

अवतरणिका–एवं शिवयोगिनः शिवसमानत्वमुक्त्वा तस्य मायाप्रपंचदर्शनं नास्तीति शिव एवेति पंचभिः सूत्रैर्दृष्टांतपूर्वकं उपपादयति—

श्लोकः–शिवभावनया युक्तः स्थिरया निर्विकल्पया ॥
शिवो भवति निर्धूतमायावेशपरिप्लवः ॥ ८ ॥

व्याख्यानं—अत्र शिवयोगीति शेषः भेदरहितया दृढया शिवोऽहंभावनया युक्तः निवारितमायावेशोपप्लवः सन् शिव एव भवतीत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ जिला कोणत्याही तऱ्हेचा विकल्प नाहीं, अशी दृढ शिवभावना करणारा शिवयोगी, मायेचा पसारा समूळ नाहींसा करणारा शंकरच होतो.

अवतरणिका–ननु कथं तस्य मायावेशोपप्लवो नास्तीत्यत्राह—

श्लोकः–चित्तवृत्तिषु लीनासु शिवे चित्सुखसागरे ॥
अविद्याकल्पितं वस्तु नान्यत्पश्यति संयमी ॥ ९ ॥

व्याख्यानं—ज्ञानानंदयोः समुद्रस्थानापन्ने परमशिवे चित्तवृत्तिषु मनोव्यापारेषु लयं गतेषु सत्सु शिवयोगी मायाकल्पितवस्त्वंतरं न पश्यतीत्यर्थः ॥ ९ ॥

अर्थ–॥ ९ ॥ शंकर हा चित्सुखाचा समुद्र आहे, त्या शिवस्वरूपांत योगीश्वराच्या चित्तवृत्ति लीन झाल्या असतां त्याचें अविद्येपासून उत्पन्न झालेल्या इतर गोष्टींकडे लक्ष्यच जात नाहीं. (मायेपासून उत्पन्न झालेलें जग त्यास दिसत नाहीं. सर्व शिवमयच दिसतें)

अवतरणिका-अत्र दृष्टांतमाह—

श्लोकः-नेदं रजतमित्युक्ते यथा शुक्तिः प्रकाशते ॥
नेदं जगदिति ज्ञाते शिवतत्वं प्रकाशते ॥ १० ॥

व्याख्यानं—उक्ते ज्ञात इत्यर्थः शिष्टं स्पष्टं ॥ १० ॥

अर्थ-॥ १० ॥ हें रुपें नव्हे असें सांगितल्याबरोबर ती जशी शिंप आहे ह्मणून समजते तसेंच हें जग नव्हे असें यथार्थ ज्ञान झाल्याबरोबर शिवतत्व आपोआप समजून येतें. (मायेचा निरास झाल्याबरोबर आपोआप शिवज्ञान होतें.)

अवतरणिका-अथ पुनर्दृष्टांतमाह—

श्लोकः-यथा स्वप्नकृतं वस्तु प्रबोधेनैष शाम्यति ॥
तथा शिवस्य विज्ञाने संसारं नैव पश्यति ॥ ११ ॥

व्याख्यानं—एष शिवयोगीत्यर्थः शिष्टं स्पष्टम् ॥ ११ ॥

अर्थ-॥ ११ ॥ जशी एखाद्यानें स्वप्नांत एखादी वस्तु पहावी ती वस्तु तोच मनुष्य जागा झाल्याबरोबर जशी त्यास खोटी वाटूं लागते, तसेंच शिवतत्वाचें यथार्थ ज्ञान झाल्याबरोबर सर्व संसार नाहींसारखाच वाटूं लागतो.

अवतरणिका-अथ पुनर्दृष्टांतमाह—

श्लोकः-अज्ञानमेव सर्वेषां संसारभ्रमकारणम् ॥
तन्निवृत्तौ कथं भूयः संसारभ्रमदर्शनम् ॥ १२ ॥

व्याख्यानं—यथा शुक्त्यज्ञानं रजतभ्रांतिकारणं तथा शिवविषयकमज्ञानं संसारभ्रांतिकारणं तन्निवृत्तौ शुक्त्यज्ञाननिवृत्तौ यथा रजतभ्रमो निवर्तते तथा शिवविषयकाज्ञाननिवृत्तौ सांसारिकभेदभ्रांतिदर्शनं नास्तीत्यर्थः यथा शुक्तिरेव रजतं तथा शिव एव विश्वमिति भावः ॥ १२ ॥

अर्थ-॥ १२ ॥ सर्व प्राणिमात्रांस संसाराची भ्रान्ति उत्पन्न करण्यास अज्ञानच कारण आहे, त्या अज्ञानाचा समूळ नाश झाल्यावर संसाराच्या भ्रांती पुन्हा कधींही दृष्टीस पडत नाहींत. पुन्हा संसाराचा भ्रम होत नाहीं.

अवतरणिका-तस्मादयं शिवयोगी जीवन्मुक्त इति वदन् कायानुग्रहस्थलं समापयति—

श्लोकः-गलिताहंकृतिग्रंथिः क्रीडाकल्पितविग्रहः ॥
जीवन्मुक्तश्चरेद्योगी देहवन्निरुपाधिकः ॥ १३ ॥

व्याख्यानं—निवृत्तपरिच्छिन्नशरीराद्यहंकारवान् क्रीडार्थं स्वेच्छापरिकल्पितकले-

वरः अतएव निरुपाधिकः प्रतिबंधरहित इत्यर्थः जीवन्मुक्तः सन् देहिवत् देहवानिव लोकानुग्रहार्थं संचरेदित्यर्थः ॥ १३ ॥

इति कायानुग्रहस्थलम् ॥

अर्थ-॥ १३ ॥ ज्या शिवयोग्याची अभिमानरूपी ग्रंथि नाहींशी झाली आहे, मौजेखातर ज्यानें देह धारण केल्याप्रमाणें दिसतें, तो शिवयोगी देहधारी असल्याप्रमाणें दिसतो तरी, त्यास कोणतीही उपाधि नसते, तो जीवन्मुक्त असल्याप्रमाणें वागतो.

अथ इंद्रियानुग्रहस्थलम् ॥

अवतरणिका-अथ "त्रिरुन्नतं स्थाप्य समं शरीरं हृदिंद्रियाणि मनसा संनिवेश्य" इति श्वेताश्वतरश्रुत्यनुसारेण तस्य कायानुग्रहसंपन्नस्य शिवयोगिनः इंद्रियविवेचनमेव सर्वेषामिंद्रियानुग्रहस्थलमिति निरूपयति—

श्लोकः-दर्शनात्परकायस्य करणानां विवेकतः ॥
इंद्रियानुग्रहः प्रोक्तः सर्वेषां तत्ववेदिभिः ॥ १ ॥

व्याख्यानं—परकायस्य सर्वोत्कृष्ठकायानुग्रहसंपन्नस्य शिवयोगिनः दर्शनात् करणानामिंद्रियाणां विवेकतः सर्वेषां प्राकृतानां इंद्रियानुग्रह इति तत्ववेदिभिः तत्वज्ञानिभिः प्रोक्तः कथित इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ परकायाच्या दर्शनामुळें व इंद्रियांच्या विचारामुळें सर्व प्राणिमात्रांस इंद्रियानुग्रह होतो असें तत्ववेत्ते ह्मणतात.

अवतरणिका-अथ तत्कथमित्यत्र तदिंद्रियव्यापारं पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः-इंद्रियाणां समस्तानां स्वार्थेषु सति संगमे ॥
रागो वा जायते द्वेषस्तौ योगी परिवर्जयेत् ॥ २ ॥

व्याख्यानं—लोके समस्तानां श्रोत्रादींद्रियाणां स्वस्वविषयेषु संबंधे सति रागो वा द्वेषो वा जायते योगी शिवयोगी तौ रागद्वेषौ परिवर्जयेत् परित्यजेतेत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ सर्व इंद्रियांचा आपापल्या विषयोपभोगाच्या वस्तूंमध्यें लय झाला असतां (ती वस्तु त्या इंद्रियास मिळाली असतां) एखादेवेळीं सुख वाटतें; एखादेवेळीं त्रास होतो त्या दोन्हीही गोष्टी शिवयोगी मुळींच सोडून देतो. (त्यास सुख दुःख मुळींच वाटत नाहीं.)

अवतरणिका-एवं च योगींद्रियव्यापारस्य लोकोत्तरत्वादनुग्रहकरत्वमिति भावः—

श्लोकः-इंद्रियाणां बहिर्वृत्तिः प्रपंचस्य प्रकाशिनी ॥
अंतः शिवे समावेशो निष्प्रपंचस्य कारणम् ॥ ३ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥

अर्थ-॥ ३ ॥ इंद्रियांची बाहेरील विषयसुखोपभोगाकडे असणारी प्रवृत्ति ही प्रपंचाचा मार्ग दाखवून देते, व तींच इंद्रियें मनामध्यें शिवाकडे वळविलीं ह्मणजे मोक्षप्राप्तीचें कारण आहे.

अवतरणिका-एवं स्थिते—

श्लोकः-क्षणमंतः शिवं पश्यन् केवलेनैव चेतसा ॥
बाह्यार्थानामनुभवं क्षणं कुर्वन् दृगादिभिः ॥ ४ ॥
सर्वेंद्रियनिरूढोऽपि सर्वेंद्रियविहीनवान् ॥
शिवाहितमना योगी शिवं पश्यति नापरम् ॥ ५ ॥

व्याख्यानं—अंतः अंतर्मुखः सन् केवलेन चेतसा बाह्येंद्रियसंगरहितेन चित्तेन क्षणं शिवं पश्यन् दृगादिभिः चक्षुरादिबाह्येंद्रियैः बाह्यार्थानां शब्दादिबाह्यविषयाणां अनुभवं क्षणं कुर्वन् शिवाहितमनाः योगी शिवे निवेशितचित्तः परयोगी सर्वेंद्रियनिरूढोऽपि सर्वेंद्रियासक्तोऽपि सर्वेंद्रियविहीनवान् सन् शिवं पश्यति अंतर्बहिश्च शिवमेव पश्यति अपरं तदन्यं न पश्यतीति तींद्रियविवेचनमनुग्रहकरमिति भावः ॥ ४ ॥ ५ ॥

अर्थ-॥ ४ ॥ शिवयोगी क्षणभर एकाग्रमनानें हृदयांत शिवस्वरूप पाहतो व क्षणभर आपल्या डोळ्यांनीं जगांतील अनेक प्रकारच्या वस्तु पाहतो. ॥ ५ ॥ शिवयोग्यास सर्व इंद्रियें आहेत तरी पण सर्व इंद्रियें नाहींत अशी त्याची स्थिति आहे; शिवाकडे नेहमीं आपलें लक्ष्य लावणारा शिवयोगी शिवालाच पाहत असतो, त्यास दुसरें कांहीं दिसत नाहीं.

अवतरणिका-नन्वेवमंतर्बहिश्च शिवं पश्यतः शिवयोगिनोऽपि प्राकृतजनवज्जरामरणादिदर्शनात्कथं लोकानुग्राहकत्वमित्यत्राह—

श्लोकः-न जरा मरणं नास्ति न पिपासा न च क्षुधा ॥
शिवाहितेंद्रियस्यास्य निर्मानस्य महात्मनः ॥ ६ ॥

व्याख्यानं—शिवाहितेंद्रियस्य शिवनिवेशितेंद्रियव्यापारवतः निर्मानस्य देहाद्यभिमानशून्यस्य महात्मनः महापुरुषस्य अस्य शिवयोगिनः जरामरणं नास्ति तयोः शरीरधर्मत्वात् क्षुत्पिपासे च न स्तः तयोः प्राणधर्मत्वादिति ॥ ६ ॥

अर्थ—॥ ६ ॥ शिवयोग्यास जन्म नाहीं, मरण नाहीं, तहान नाहीं किंवा भूकही लागत नाहीं, त्याचीं सर्व इंद्रियें शिवस्वरूपांत तल्लीन झालीं असल्यानें तो शिवयोगी मनाचा फार मोठा असतो.

अवतरणिका–"सर्वेषु गात्रेषु शिरः प्रधानं सर्वेंद्रियाणां नयनं प्रधानम् ॥ इंद्रियाणां मनो नाथो मनोनाथस्तु मारुतः" ॥ इति पुराणवचनानुसारेण सर्वेंद्रियव्यापारकारणीभूतमनोमारुतनिग्रहं सूत्रत्रयेण प्रकाशयति—

श्लोकः–मनो यत्र प्रवर्तेत तत्र सर्वेंद्रियस्थितिः ॥
शिवे मनसि सल्लीने क्व चेंद्रियविचारणा ॥ ७ ॥

व्याख्यानं—यत्र मनस्थितिः सर्वेंद्रियस्थितिः मनसि शिवे सल्लीने सति इंद्रियविचारणा इंद्रियव्यापारः क्व नास्तीत्यर्थः ॥ ७ ॥

अर्थ—॥ ७ ॥ जिकडे मन लागतें तिकडेच सर्व इंद्रियें लागतात तें मनच शिवस्वरूपांत लय पावल्यावर इंद्रियांची काय प्रतिष्ठा आहे? इंद्रियें आपापच शिवस्वरूपांत लीन होतीलच.

श्लोकः–यद्यत्पश्यन् दृशा योगी मनसा चिंतयत्यपि ॥
तत्तत्सर्वं शिवाकारं संविद्रूपं प्रकाशते ॥ ८ ॥

व्याख्यानं—योगी शिवयोगी दृशा यद्यत्पश्यति मनसा चिंतयति तत्तत्सर्वं चिद्रूपं शिवाकारं सत् प्रकाशते मनुत इत्यर्थः ॥ ८ ॥

अर्थ—॥ ८ ॥ शिवयोगी आपल्या दृष्टीनें जें जें कांहीं पाहतो किंवा मनामध्यें जे जे कांहीं विचार करितो तें तें सर्व ज्ञानस्वरूप शिवरूपच असतें.

अवतरणिका–अनेनांतर्बाह्येंद्रियनिग्रहप्रकारो दर्शितः अथ प्राणनिग्रहप्रकारं दर्शयति—

श्लोकः–करणैः सहितं प्राणं मनस्याधाय संयमी ॥
योजयेत्स शिवः साक्षाद्यत्र नास्ति जगद्भ्रमः ॥ ९ ॥

व्याख्यानं—करणैः नेत्रादिकरणैः सहितं प्राणं प्राणवायुं मनस्याधाय संस्थाप्य यः संयमी शिवयोगी यत्र ब्रह्मणि योजयेत् नेत्रादिकरणानां मन एव प्राणरूपं

मनो वायुरूपं वेगवत्वात् लोके क्वचिल्लक्ष्ये नेत्रमचंचलं चेत्प्राणवायुनिरोधद्वारा मनोलयस्यानुभूयमानत्वाच्च त्रयाणामैक्यात् सामरस्येन संयोजयेत् स. साक्षाच्छिव एव तस्य जगद्भ्रमः विश्वभेदभ्रांतिः नास्ति चित्तवृत्तिः ब्रह्मणि लीना चेत् बाह्येंद्रियव्यापारो निवर्तते तदभावाद्भिभेदभ्रांतिर्नास्तीत्यर्थः ॥ ९ ॥

अर्थ–॥ ९ ॥ शिवयोगी आपलीं सर्व इंद्रियें आणि प्राण मनामध्यें धरून ज्या स्वरूपाकडे लावितो तोच प्रत्यक्ष शंकर होय; त्या शंकरांत जगाची (मायेची) भ्रांति नसते.

अवतरणिका–अथेंद्रियानुग्रहस्थलं समापयति—

श्लोकः–सर्वेंद्रियप्रवृत्त्या च बहिरंतःशिवं यजन् ॥
स्वच्छंदचारी सर्वत्र सुखी भवति संयमी ॥ १० ॥

व्याख्यानं—संयमी शिवयोगी सर्वेंद्रियप्रवृत्त्या च अंतर्बाह्येंद्रियप्रवर्तनेन शिवं इष्टप्राणरूपशिवलिंगं यजन् पूजयन् सर्वत्र स्वेच्छाचारी भूत्वा सुखी भवति सुखमनुभवन्नास्त इत्यर्थः ॥ १० ॥

इतींद्रियानुग्रहस्थलम् ॥

अर्थ–॥ १० ॥ शिवयोगी पांच ज्ञानेंद्रियें आणि पांच कर्मेंद्रियें ह्यांची सर्व प्रकारची अंतर्बाह्य प्रवृत्ति शिवस्वरूपाकडे लावून शिवाचें ध्यान करितो आणि सुखानें स्वच्छंदपणानें चोहोंकडे संचार करितो.

अथ प्राणानुग्रहस्थलं ॥

अवतरणिका–अथ "प्राणवान्प्रयुज्येह स मुक्तिचेष्टः क्षीणे प्राणनासिकयोः श्वसिति" इति श्वेताश्वतरश्रुत्यनुसारेणेंद्रियानुग्रहसंपन्नस्य शिवयोगिनस्तात्पर्यावलोकनमेव सर्वेषां प्राणानुग्रहस्थलं निरूपयति—

श्लोकः–शिवस्य परकायस्य यत्तात्पर्यावलोकनम् ॥
तत्प्राणानुग्रहः प्रोक्तः सर्वेषां तत्त्वदर्शिभिः ॥ १ ॥

व्याख्यानं—परकायस्य इंद्रियानुग्रहसंपन्नस्य परब्रह्मकायस्य शिवस्य शिवयोगिनः यत्तात्पर्यावलोकनम् प्राणवायुनिरोधेन यत्तात्पर्यावलोकनमस्ति तत्सर्वेषां प्राणानुग्रह इति तत्त्वदर्शिभिः तत्त्वज्ञानिभिः प्रोक्त इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ परकाय असणाऱ्या शिवाचें जें तात्पर्य (सार) पाहणें तेंच सर्व प्राणिमात्रांचें प्राणानुग्रहस्थल होय असें तत्त्ववेत्ते लोक ह्मणतात.

अवतरणिका–अथ तत्तात्पर्यावलोकनं कीदृशमित्याह—

श्लोकः–प्राणो यस्य लयं याति शिवे परमकारणे ॥
कुतस्तस्येंद्रियस्फूर्तिः कुतः संसारदर्शनम् ॥ २ ॥

व्याख्यानं—यस्य शिवयोगिनः प्राणः प्राणवायुः परमकारणे शिवे ब्रह्मादिकारणेशानामपि कारणीभूते परशिवे लयं याति तस्य शिवयोगिनः इंद्रियस्फूर्तिः इंद्रियव्यापारः कुतः नास्तीत्यर्थः । एवं च निष्प्रपंचशिवलिंगदर्शनं तत्तात्पर्यावलोकनमिति भावः ॥ २ ॥

अर्थ–॥ २ ॥ शिव हा श्रेष्ठ कारण आहे त्या स्वरूपांत ज्याचा प्राण लय पावतो त्या शिवयोग्याचीं इंद्रियें चलबिचल तरी कशाला करतील? व त्याला पुनः जन्ममरण तरी कशाला घ्यावें लागेल? तो मुक्तच आहे.

अवतरणिका–अथ तत्कथमित्यत्राह—

C. N. Kalburgi

श्लोकः–करणेषु निवृत्तेषु स्वार्थसंगात्प्रयत्नतः ॥
तैः समं प्राणमारोप्य स्वांते शांतमतिः स्वयम् ॥ ३ ॥

व्याख्यानं—केवलकुंभकेन शिवे प्राणवायौ लयं गते सति करणेषु चक्षुरादिकरणेषु स्वार्थसंगात् शब्दादिस्वविषयसंबंधात् प्रयत्नतः स्वयमेव निवृत्तेषु सत्सु स्वांते मनसि तैरिंद्रियैः समं प्राणमारोप्य संयोज्य शांतमतिः रागद्वेषरहितः स्यात् ॥३॥

अर्थ–॥ ३ ॥ आपापल्या उपभोगाच्या वस्तूंपासून इंद्रियें तृप्त झालीं व त्यांस त्या विषयसुखाची मुळींच प्रीति राहिली नाहीं अशी स्थिति झाल्यावर शिवयोगी इंद्रियांसहित प्राणावर चढून शांत मनानें राहतो.

अवतरणिका–एवं स्थिते—

C. N. Kalburgi

श्लोकः–शांतत्वात्प्राणवृत्तीनां मनः शाम्यति वृत्तिभिः ॥
तच्छांतौ योगिनां किंचिच्छिवादन्यन्न दृश्यते ॥ ४ ॥

व्याख्यानं—प्राणवृत्तीनां रेचकपूरकरूपप्राणवृत्तीनां शांतत्वात् केवलकुंभकेन निवृत्तत्वात् मनः वृत्तिभिः संकल्पविकल्परूपवृत्तिभिः समं शाम्यति तच्छांतौ सत्यां योगिनां शिवादन्यन्न किंचिदपि दृश्यत इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ रेचक पूरक हे प्राणवृत्ति शांत झाल्यावर मन आपल्या वृत्तींसह शांत होतें, तें मन शांत झाल्यावर शिवयोग्यांस शिवाखेरीज दुसरें कांहींच दिसत नाहीं.

अवतरणिका-अथात्र शंकां सूत्रद्वयेनोद्भाव्य तृतीयेन निराकरोति—

श्लोकः-प्राण एव मनुष्याणां देहधारणकारणम् ॥
तदाधारः शिवः प्रोक्तः सर्वकारणकारणम् ॥ ५ ॥

व्याख्यानं—तदाधारा प्राणधारेत्यर्थः येनैव प्राणेनैव जीवश्चेष्टत इति सर्वसंमतत्वेन शिवे प्राणस्य लीनत्वात् देहः कथं तिष्ठतीति शंका अस्योत्तरम् ॥ ५ ॥

अर्थ-॥ ५ ॥ मनुष्यमात्रांस शरीर धारण करण्यास प्राणच कारण आहे. त्या प्राणधारणास सर्व कारणांचा कारण शंकर हा कारण आहे. असें ह्मणतात.

निराधारः शिवः साक्षात्प्राणस्तेन प्रतिष्ठितः ॥
तदाधारा तनुर्ज्ञेया जीवो येनैव चेष्टते ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ६ ॥

अर्थ-॥ ६ ॥ शिव हा निराधार आहे, प्रत्यक्ष हा प्राण त्या शिवाच्याच आधारानें राहतो त्याच्या आधारानें शरीर राहतें. त्या प्राणाच्या आधारानें जीव चलनवलनादि क्रिया करितो.

शिवे प्राणो विलीनोऽपि योगिनो योगमार्गतः ॥
स्वशक्तिवासनायोगाद्धारयंत्येव विग्रहम् ॥ ७ ॥

व्याख्यानं—योगिनः शिवयोगिनः योगमार्गतः केवलकुंभकरूपयोगमार्गात् प्राणः शिवे विलीनोऽपि लयं गतोऽपि स्वशक्तिवासनायोगात् निजशक्ति संस्कारबलात् विग्रहं शरीरं धारयंत्येवेत्यर्थः ॥ ७ ॥

अर्थ-॥ ७ ॥ शिवयोगीलोक योगसाधनानें आपला प्राण शिवस्वरूपांत लीन झाल्यावर आपल्या शक्तीनें व आपल्या वासनांच्या शक्तीनें शरीर धारण करितात.

अवतरणि०-तर्हि स कथं तिष्ठतीत्यत्र सूत्रद्वयेन कथयति—

श्लोकः-स चाभ्यासवशाद्भूयः सर्वतत्वातिवर्तिनि ॥
निष्कलंके निराकारे निरस्ताशेषविक्लवे ॥ ८ ॥

व्याख्यानं—स च जीवात्माश्रयीभूतप्राणवायुः भूयोऽभ्यासवशात् सर्वतत्वातिवर्तिनि भूम्यादिशिवांततत्वोपरिवर्तिनि निष्कलंके जरामरणादिदोषरहिते निराकारे अतएव प्राकृतनीलपीताद्याकाररहिते निरस्ताशेषविक्लवे निवृत्तसमस्तबाधे॥८॥

अर्थ-॥ ८ ॥ शिव हा सर्व तत्वांपेक्षां श्रेष्ठ असून तीं सर्व तत्वें त्यांत राहतात. तो निष्कलंक आणि निराकार आहे, त्याची भक्ति केली असतां सर्व प्रकारचे श्रम दूर होतात.

C. N. Kalburgi

चिद्विलासपरिस्फूर्तिपरिपूर्णसुखाद्वये ॥
शिवे विलीनः सर्वात्मा योगी चलति न क्वचित् ॥ ९ ॥

व्याख्यानं—चिद्विलासबाहुल्येन परिपूर्णसुखाद्वये परिपूर्णानंदस्वरूपेण द्वितीयशून्ये परमशिवे विलीनसर्वात्मा लयीभूतसर्वव्यापारवान् योगी शिवयोगी क्वचित् कुत्रचित् कदापि न चलति न स्पंदत इत्यर्थः ॥ ९ ॥

अर्थ–॥ ९ ॥ चैतन्याच्या विलासाच्या परिपूर्णतेमुळें अद्वैतसुखाचा शंकर हा निधि आहे, त्या शंकराच्या स्वरूपांत शिवयोग्याचें मन समाधीच्या अभ्यासानें लीन झाल्यामुळें पुन्हा इकडे तिकडे त्याचें जात नाहीं. (समाधियोगापासून तो कधींही भ्रष्ट होत नाहीं.)

अवतरणिका–अथ किमिव न चलतीत्यत्राह—

श्लोकः–प्रध्वस्तवासनासंगात् प्राणवृत्तिपरिक्षयात् ॥
शिवैकीभूतसर्वात्मा स्थाणुवद्भाति संयमी ॥ १० ॥

व्याख्यानं—संयमी शिवयोगीश्वरः प्रध्वस्तवासनासंगात् विनष्टविषयवासनासंपर्कात् प्राणवृत्तिक्षयात् प्राकृतवैकृतरूपप्राणव्यापारनाशात् शिवैकीभूतसर्वात्मा शिवलिंगैकरसीभूतसर्वेंद्रियव्यापारवान् सन् स्थाणुवत् काष्टवत् निश्चलत्वेन भातीत्यर्थः ॥ १० ॥

इति प्राणानुग्रहस्थलम् ॥

अर्थ–॥१०॥ शिवयोग्यानें शिवयोगसमाधि लाविली असतां त्याच्या सर्व वासना नाहींशा होतात, प्राणवृत्तींचा ही नाश होतो, शिवस्वरूपांत त्याचा अंतरात्मा सर्वतोपरी गढून गेल्यामुळें तो शिवयोगी एखाद्या खांबासारखा शोभूं लागतो.

अथ कायार्पितस्थलम् ॥

अवतरणिका–अथ "यदा शिवाय स्वात्मानं दत्तवान् देशिकात्मने ॥ तदा शैवो भवेद्देवि न ततोस्ति पुनर्भवः" इति योगजागमवचनानुसारेण प्राणानुग्रहसंपन्नस्य योग्यं कायार्पितस्थलं निरूपयति—

श्लोकः–शिवस्य पररूपस्य सर्वानुग्राहिणोऽर्चने ॥
त्यागो देहाभिमानस्य कायार्पितमुदाहृतम् ॥ १ ॥

व्याख्यानं—सर्वानुग्राहिणः सर्वानुग्राहकस्य पररूपस्य परब्रह्मकायस्य प्राणानुग्रहसंपन्नस्य परयोगिनः शिवस्यार्चने शिवलिंगपूजाविषये देहाभिमानस्य त्यागः कायार्पितमित्युदाहृतमित्यर्थः ॥ १ ॥

अर्थ—॥ १ ॥ शिव हा परस्वरूप असून सर्व प्राणिमात्रांवर कृपा करणारा आहे, त्याच्या पूजनाच्या वेळीं आपला देहावरील अभिमान सोडून देणें ह्यालाच कायार्पित असें ह्मणतात.

अवतरणिका-अथ किमनेन भवतीत्यत्राह—

श्लोकः-यदा योगी निजं देहं शिवाय विनिवेदयेत् ॥
तदा भवति तद्रूपं शिवरूपं न संशयः ॥ २ ॥

व्याख्यानं—तद्रूपं योगिनः स्वरूपं शिवरूपं भवतीत्यर्थः शिष्टं स्पष्टं ॥ २ ॥

अर्थ-॥ २ ॥ जेव्हां शिवयोगी आपलें शरीर शिवाला अर्पण करितो, त्यावेळीं त्याचें स्वरूप तें शंकराचेंच स्वरूप होतें. ह्यांत कांहीं संशय नाहीं.

अवतरणिका-ननु देहमात्रं समर्पणीयं वा यद्यन्यत्किंचिदस्ति वेत्यत्राह—

श्लोकः-इंद्रियप्रीतिहेतूनि विषयासंगजानि च ॥
सुखानि सुखचिद्रूपे शिवयोगी निवेदयेत् ॥ ३ ॥

व्याख्यानं—इंद्रियप्रीतिकारणीभूतविषयसंबंधोत्पन्नसुखं चिदानंदरूपे शिवे निवेदयेदित्यर्थः ॥ ३ ॥

अर्थ-॥ ३ ॥ शिवयोगी इंद्रियांस सुख देणारीं विषयोपभोगापासून उत्पन्न होणारीं सर्व सुखें सुखस्वरूप आणि चैतन्यस्वरूप अशा शंकरालाच अर्पण करितो.

अवतरणिका-अथ तत्कथमित्यत्राह—

श्लोकः-दर्शनात्स्पर्शनाद्भुक्तेः श्रवणाद्घ्राणनादपि ॥
विषयेभ्यो यदुत्पन्नं शिवे तत्सुखमर्पयेत् ॥ ४ ॥

व्याख्यानं—विषयेभ्य एतद्व्यतिरिक्तवस्त्राभरणादिविषयेभ्य इत्यर्थः शिष्टं स्पष्टं ॥

अर्थ-॥ ४ ॥ पाहण्यापासून, आंगास आंग लावल्यापासून, भोजनापासून, ऐकण्यापासून, वास घेण्यापासून वगैरे विषयांपासून जें सुख उत्पन्न होतें तें सर्व सुख शिवयोगी शिवास अर्पण करितो.

अवतरणिका-अथ देहद्वारेण यद्यत्सुखं प्राप्तं तत्सर्वं शिवलिंगाय समर्पणीयमिति वदन् कायार्पिस्थलं समापयति—

श्लोकः-देहद्वारेण यद्यत्स्यात्सुखं प्रासंगमात्मनः ॥
तत्तन्निवेदयन् शंभोर्योगी भवति निर्मलः ॥ ५ ॥

व्याख्यानं—देहद्वारेण देहसंबद्धदशेंद्रियद्वारेण यद्यत्सुखं स्वस्य प्रासंगं प्रसक्तं स्यात् तत्तत्सुखं शंभोः शिवलिंगस्य निवेदयन् समर्पयन् सन् योगी शिवयोगी निर्मलः निर्लेपः सन् चरति संचरतीत्यर्थः । कायिकसुखसमर्पणमेव कायार्पणमिति भावः ॥ ५ ॥

इति कायार्पितस्थलम् ॥

अर्थ-॥ ५ ॥ शिवयोग्यास देहाच्या संबंधानें वेळोवेळीं जें सुख होतें तें सर्व सुख तो शंकरास अर्पण करितो व त्यामुळें निष्पाप होतो.

अथ करणार्पितस्थलम् ॥

अवतरणिका—अथ "यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ॥ तस्येंद्रियाणि वश्यानि सदश्वा इव सारथेः" इति कठवल्लीश्रुत्यनुसारेण कायार्पितसंपन्नस्य करणार्पितस्थलं निरूपयति—

श्लोकः—आसंजनं समस्तानां करणानां परात्परे ॥
शिवे यत्तदिदं प्रोक्तं करणार्पितमागमे ॥ १ ॥

व्याख्यानं—परात्परे विश्वस्मादुत्कृष्टपरशक्त्यपेक्षयोत्कृष्टे शिवे शिवलिंगे समस्तानां अंतर्बाह्यवर्तिनां करणानां यदासंजनं संयोजनकर्तृत्वमस्ति तदिदं करणार्पितमिति आगमे वीरशैवसिद्धांते प्रोक्तं कथितमित्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ श्रेष्ठांपेक्षांही शंकर श्रेष्ठ आहे, त्या शंकरांत सर्व इंद्रियें लीन होणें (संयोजन करणें) त्याला शिवागमांत करणार्पित असें ह्मणतात.

अवतरणिका—अथ करणार्पकं कथयति—

श्लोकः—यद्यत्करणमालंब्य भुंक्ते विषयजं सुखम् ॥
तत्तच्छिवे समर्प्यैष करणार्पक उच्यते ॥ २ ॥

व्याख्यानं—यत्करणमालंब्य विषयजं सुखं यद्भुंक्ते तत्करणसंबद्धं तद्विषयसुखं शिवलिंगे समर्प्य एष कायार्पितसंपन्नः करणार्पक इत्युच्यत इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ जें जें इंद्रिय ज्या ज्या विषयसुखाची आवड करितें तें तें शंकरास अर्पण करणाऱ्यास करणार्पक (इंद्रिय अर्पण करणारा) असें ह्मणतात.

अवतरणिका—अथ तत्प्रकारं पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः—अहंकारमदोद्रिक्तमंतःकरणवारणम् ॥
बध्नीयाद्यः शिवालाने स धीरः सर्वसिद्धिमान् ॥ ३ ॥

व्याख्यानं—अहंकारममकाररूपोर्ध्वाधोमदमत्तमनोबुद्धिचित्तलक्षणांतःकरणगजं यः शिवालाने शिवलिंगरूपबंधनस्तंभे बध्नीयात् सः सर्वसिद्धिमान् धीरः॥३॥

अर्थ–॥ ३ ॥ जो शिवयोगी अभिमानरूप मद वाहण्यामुळें उन्मत्त झालेल्या अन्तःकरणरूप हत्तीला शंकररूप लोखंडाच्या खुंट्यास (हत्ती बांधण्याच्या मेखेस) जखडून बांधतो तो धैर्यवान् ह्मणावा, व त्यास सर्व प्रकारच्या सिद्धि प्राप्त होतात.

अवतरणिका–नन्विंद्रियाणां बाहुल्यात् मनोमात्रबंधनेन कथं धीरत्वमित्यत्राह—

श्लोकः–इंद्रियाणां समस्तानां मनः प्रथममुच्यते ॥
वशीकृते शिवे तस्मिन्किमन्यैस्तद्वशानुगैः ॥ ४ ॥

व्याख्यानं—प्रथमं कारणमित्यर्थः "इंद्रियाणां मनो नाथ" इति श्रुतेः शिष्टं स्पष्टं ॥ ४ ॥

अर्थ–॥ ४ ॥ सर्व इंद्रियांत मन हेंच मुख्य आहे असें ह्मटलें आहे तें वश करून शिवाच्या स्वरूपांत लीन केल्यावर इतर इंद्रियांस जिंकण्याचें काय कारण आहे ?

अवतरणिका–नन्वेतावता किमित्यत्राह—

श्लोकः–इंद्रियाणां वशीकारो निवृत्तिरिति गीयते ॥
लक्षीकृते शिवे तेषां कुतः संसारगाहनम् ॥ ५ ॥

व्याख्यानं—इंद्रियवशीकरणमेव निवृत्तिरिति विद्वद्भिर्गीयते तेषामिंद्रियाणां शिवलिंगे लक्षीकृते सति संसारनिमज्जनं कुतः नास्तीत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ इंद्रियांस जिंकून तीं आपल्या ताब्यांत ठेवणें हीच मुक्ति होय असें ह्मणतात. तीं सर्व इंद्रियें शंकराच्या स्वरूपाकडे लावणाऱ्या शिवयोग्यांस पुन्हा संसारसमुद्रांत बुडावें लागत नाहीं. (त्यांचें जन्ममरण चुकून ते मुक्त होतात.)

अवतरणिका–नन्विंद्रियवशीकारमात्रेण कथं संसारनिवृत्तिरित्यत्राह—

श्लोकः–संसारविषकांतारसमुच्छेदकुठारिका ॥
उपशांतिर्भवेत्पुंसामिंद्रियाणां वशीकृतौ ॥ ६ ॥

व्याख्यानं—उपशांतिर्निरपेक्षेत्यर्थः शिष्टं स्पष्टं ॥ ६ ॥

अर्थ–॥ ६ ॥ इंद्रियें वश केलीं ह्मणजे मनुष्यांस उपशांति (शांतता) येते. शांति ही संसाररूप विषारी झाडें तोडून टाकण्याची प्रत्यक्ष कुऱ्हाडच होते. (शांति आंगीं असली ह्मणजे जन्ममरण चुकतें)

अवतरणिका-ननु निरपेक्षामात्रेण कथं कर्मबंधनिवृत्तिरित्यत्राह—

श्लोकः-इंद्रियैरेव जायंते पापानि सुकृतानि च ॥
तेषां समर्पणादीशे कुतः कर्मनिबंधनम् ॥ ७ ॥

व्याख्यानं—स्पष्टम् ॥ ७ ॥

अर्थ–॥ ७ ॥ इंद्रियांकडूनच पापें आणि पुण्यें घडतात. तीं इंद्रियें शंकरांत समर्पण केल्यावर कर्मांचा संग्रह कसा होईल? कर्मसंग्रह मुळींच होणार नाहीं.

अवतरणिका–ननु शिवार्पितपदार्थैरभिवृद्धिश्रवणात् शिवे पुण्यपापसमर्पणेन तदभिवृद्धिः कस्मान्न भवतीत्यत्राह—

श्लोकः–प्रकाशमाने चिद्वह्नौ बहिरंतर्जगन्मये ॥
समर्प्य विषयान् सर्वान्मुक्तवज्जायते जनः ॥ ८ ॥

व्याख्यानं—वह्निप्रक्षिप्तपदार्थानां नाशदर्शनात् बहिरंतर्भासमाने विश्वरूपे चिदग्निरूपशिवलिंगे समर्पितानां पदार्थानामपि नाशो अवश्यमंगीकरणीय इत्यभिवृद्ध्यभावात् समस्तविषयान् तत्र समर्प्य जनः जननमरणपरिपीडितो देही मुक्तवत् जायत इत्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ आंत व बाहेर त्रैलोक्यरूप असणारा ज्ञानरूप अग्नि पेटून प्रफुल्लित झाल्यावर त्यांत सर्व विषय अर्पण केल्यावर मनुष्य मुक्तीस गेल्यासारखाच दिसूं लागतो.

अवतरणिका–ननु वह्निसमर्पणस्य होमरूपत्वात् किं तत्साधनमित्यत्राह—

श्लोकः–चित्तद्रव्यं समादाय जगज्जातं महाहविः ॥
चिद्वह्नौ जुह्वतामंतः कुतः संसारविप्लवः ॥ ९ ॥

व्याख्यानं—जगतः पंचतन्मात्ररूपत्वेन शब्दादिविषयरूपं हविः चित्तद्रव्यं संगृह्य अंतः हृदयकमलस्थचिद्वह्नौ जुह्वतां शिवयोगिनां संसारबाधः कुतः नास्तीत्यर्थः ॥ ९ ॥

अर्थ–॥ ९ ॥ अंतःकरणरूप यज्ञसामुग्री घेऊन त्रैलोक्याचा पसारारूप पु-

ष्कळसें तूप घेऊन ज्ञानरूप अग्नींत मनांत हवन करणाऱ्या शिवयोग्यांस पुन्हा संसारांत कसें बुडावें लागेल? कधींही संसारदुःख भोगावें लागणार नाहीं.

अवतरणिका–नन्वेवंरूपविश्वंहवनेन मुक्तवज्जायमानो जनः कीदृग्रूप इत्यत्राह—

श्लोकः–आत्मज्योतिषि चिद्रूपे प्राणवायुनिबोधिते ॥
जुह्वन् समस्तविषयान् तन्मयो भवति ध्रुवम् ॥ १० ॥

व्याख्यानं—प्राणवायुप्रकाशिते चिद्रूपे आत्मज्योतिषि शिवाग्नौ तत्तत्करणजन्यसुखादिविषयान् जुह्वन् अर्पयन् शिवयोगी तन्मयः चिन्मयशिवस्वरूप एव भवति जायते ध्रुवं निश्चयः ॥ १० ॥

अर्थ–॥ १० ॥ प्राणवायूनें फुंकून फुंकून पेटविलेल्या चित्स्वरूपी आत्मतेजांत (अग्नींत) सर्व विषयसुखांचें हवन करणारा शिवयोगी खरोखर चिन्मय शिवस्वरूपच होतो.

अवतरणिका–ननु करणानां प्राकृतत्वेन कथं तज्जन्यसुखादि शिवसमर्पणयोग्यमित्यत्राह—

श्लोकः–इंद्रियाणि समस्तानि शरीरं भोगसाधनम् ॥
शिवपूजांगभावेन भावयन्मुक्तिमाप्नुयात् ॥ ११ ॥

व्याख्यानं—शरीरादीनां शिवपूजांगत्वात् तज्जन्यसुखाद्यपि शिवसमर्पणयोग्यमेवेत्यर्थः इदं करणार्पणं कायार्पणस्थले प्रसंगादुक्तमिति न पौनरुक्त्यं ॥ ११ ॥

इति करणार्पितस्थलम् ॥

अर्थ–॥ ११ ॥ हीं सर्व इंद्रियें आणि उपभोग घेण्याचें मुख्यसाधन शरीर हीं सर्व शिवपूजेच्या उपयोगीं पडणारीं साधनें आहेत असें समजून त्यांचा शिवपूजेकडेच उपयोग करितो तो मोक्षास जातो.

अथ भावार्पितस्थलम् ॥

अवतरणिका–अथ "तस्मात्प्रपंचसंबधभावं हित्वा शिवात्मकम् ॥ भावमाश्रित्य यत्नेन कुर्याद्व्यापृतिमीश्वरे" ॥ इति योगजागमवचनानुसारेण करणार्पितसंपन्नस्य शिवयोगिनो विधीयमानं भावार्पणं निरूपयति—

श्लोकः–शिवे निश्चलभावेन भावानां यत्समर्पणम् ॥
भावार्पितमिदं प्रोक्तं शिवसद्भाववेदिभिः ॥ १२॥

सोलापूर

व्याख्यानं—शिवे शिवलिंगविषये निश्चलभावेन स्थिरभावेन भावानां यत्सम-र्पणम् तदिदं भावार्पितमिति शिवसद्भाववेदिभिः प्रोक्तमित्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ शिवस्वरूपांत निश्चलपणानें शिवयोग्यानें आपले सर्व भाव अर्पण करणें त्यास शिवरहस्य जाणणारे ज्ञाते लोक भावार्पित असें ह्मणतात.

अवतरणिका–अथ को नाम भाव इत्यत्राह—

श्लोकः–चित्तस्थसकलार्थानां मननं यत्तु मानसे ॥
तदर्पणं शिवे साक्षान्मानसो भाव उच्यते ॥ २ ॥

व्याख्यानं—मानसः मनोविकारः भावः भाव इत्युच्यते विकारो मानसो भाव इत्यमरः मानसे मनोविकारे भावे चित्तस्थसकलार्थानां चित्तनिष्ठसकलपदार्थानां यन्मननं अनुभवरूपचिंतनं यदस्ति तत् साक्षात् प्रत्यक्षीभूते शिवे शिवलिंगे अर्पणं अर्पितमित्युच्यत इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ मनास आवडणाऱ्या वस्तूंचें मनांत जें चिंतन चाललें असतें तें शंकरास प्रत्यक्ष अर्पण करणें ह्यास मानसिकभाव (मनोभाव) असें ह्मणतात.

अवतरणिका–अथ तद्भावस्वरूपं पंचभिः सूत्रैर्विशेषयति—

श्लोकः–भाव एव हि जंतूनां कारणं बंधमोक्षयोः ॥
भावशुद्धौ भवेन्मुक्तिर्विपरीते तु संसृतिः ॥ ३ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥

अर्थ–॥ ३ ॥ मनुष्याचा भाव (आग्रह, दृढनिश्चय, भक्ति) ह्याच त्याला संसारांत पाडण्यास किंवा मोक्षप्राप्ति करून देण्यास कारण आहे (भावामुळें मनुष्यास बंध किंवा मोक्ष प्राप्त होतो) भाव शुद्ध (निर्दोष) असला तर मोक्ष मिळतो भाव अशुद्ध (सदोष) असला तर संसाराचें दुःख भोगावें लागतें.

अवतरणिका–अथ का नाम भावशुद्धिरित्यत्राह—

श्लोकः–भावस्य शुद्धिराख्याता शिवोऽहमिति योजना ॥
विपरीतसमायोगे कुतो दुःखनिवर्तनम् ॥ ४ ॥

व्याख्यानं—शिवोहमिति स्वस्वरूपानुभवयोग एव भावस्य शुद्धिरिति विद्वद्भिराख्याता विपरीतसमायोगे सति नाहं शिव इति विपरीतयोगे सति दुःखनिवर्तनं सांसारिकदुःखनिवृत्तिः कुतः नास्तीत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ मी शिव आहें अशी कल्पना करणें ही शुद्धभावना होय तीच विपरीत भावना झाल्यावर (शिव निराळा मी निराळा अशी समजूत झाल्यावर) संसारदुःखांतून सुटका कशानें होणार ? संसारदुःख कधींही चुकावयाचें नाहीं.

अवतरणिका-ननु इदमिति भाव्यमानं विश्वं कथं भावनीयमित्यत्र "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म चैतत्" इति श्वेताश्वतरश्रुत्यनुसारेण कथयति—

श्लोकः-भोक्ता भोग्यं भोजयिता सर्वमेतच्चराचरम् ।
भावयन् शिवरूपेण शिवो भवति वस्तुतः ॥ ५ ॥

व्याख्यानं—भोक्ता जीवः भोग्यं भोगयोग्यं वस्तु अनयोः भोजयिता प्रेरकः शिवः चराचरमेतत्सर्वं जगज्जातं [illegible] शिवरूपेण भावयन् शिवयोगी वस्तुतः परमार्थतः शिवो भवति शिव एव भवतीत्यर्थः अत्र वस्तुतः इत्यनेनास्य मुख्यत्वं सूचितम् ॥ ५ ॥

अर्थ-॥ ५ ॥ उपभोग घेणारा शंकरच आहे, उपभोग घ्यावयाची वस्तूही शंकरच आहे उपभोग घ्यावयास लावणारा शंकरच आहे, आणि हे सर्व स्थावर जंगम विश्व देखील शंकरच आहे अशी सर्वत्र शिवस्वरूपाने भावना करणारा शिवयोगी वास्तविकपणे तोच स्वतः शिव होतो.

अवतरणिका-अथ प्रकारान्तरेण भावनां कथयति—

श्लोकः-मिथ्येति भावयन्विश्वं विश्वातीतं शिवं स्मरन् ।
सत्यानंदचिदाकारं कथं बद्धुमिहार्हति ॥ ६ ॥

व्याख्यानं—विश्वं [illegible] मिथ्येति भावयन् विश्वातीतं विश्वोत्तीर्णं शिवं सत्यानंदचिदाकारं [illegible] स्मरन् [illegible] कथमिहार्हति न केनापि [illegible] ॥ ६ ॥

अर्थ-॥ ६ ॥ हे सर्व त्रैलोक्य मायिक (खोटे) आहे, शिव हा त्रैलोक्याहून अतीत (त्रैलोक्याहून [illegible]) [illegible] आहे, तो शिव सत्यस्वरूप आहे, आनंदरूप आहे, ज्ञानस्वरूप आहे, असे नेहमी चिंतन करणारा शिवयोगी संसारातून [illegible] कसा होईल ! कधीही होणे नाही.

अवतरणिका-अथ भावनान्तरमाह—

श्लोकः-सर्वं कर्माखिलं शंभोर्वचनं [illegible] कीर्तनम् ।
इति भावयतो नित्यं कथं भवनिबन्धनम् ॥ ७ ॥

व्याख्यानं—क्रियमाणं सर्वं कर्म शंभोः [illegible] वचनं तस्य शिवस्य कीर्तनं स्तुतिः इति नित्यं भावयतः [illegible] कथं स्यात् न केनापि प्रकारेण भवेदित्यर्थः ॥ ७ ॥

अर्थ-॥ ७ ॥ आपण जें जें कर्म करितो तें सर्व शिवाचें पूजन आहे आणि तोंडानें जें जें बोलतो तें तें शिवाचें स्तवन (स्तुति) आहे अशा भावना करणाऱ्यास कर्मांचें बंधन कसें होईल ? कधींही व्हावयाचें नाहीं.

अवतरणिका-अथ जीवन्मुक्तिकरीं भावनां कथयन् भावार्पितस्थलं समापयति—

श्लोकः-सर्वेंद्रियगतं सौख्यं दुःखं वा कर्मसंभवम् ॥
शिवार्पं भावयन् योगी जीवन्मुक्तो भविष्यति ॥ ८ ॥

व्याख्यानं—श्रोत्रादिसर्वेंद्रियगतं सौख्यं सुखं प्राक्कर्मसंभवदुःखं वा शिवार्पं शिवसमर्पितपदार्थत्वेन भावयन् शिवयोगी जीवन्मुक्तः स्यादित्यर्थः ॥ ८ ॥

इति भावार्पितस्थलम् ॥

अर्थ-॥ ८ ॥ सर्व इंद्रियांस त्या त्या इंद्रियाच्या उपभोगाच्या वस्तूंपासून जें सुख मिळतें त्याप्रमाणें सर्व इंद्रियांचें सुख आणि अनेक प्रकारच्या कर्मांपासून होणारें दुःख हें सर्व शिवाला अर्पण असो अशी जो शिवयोगी भावना करितो तो जीवन्मुक्त होईल.

अथ शिष्यस्थलं ॥

अवतरणिका-"यथा सिद्धरससंस्पर्शात्ताम्रं भवति काञ्चनम् ॥ गुरूपदिष्टश्रवणाच्छिष्यस्तत्त्वमयस्तथा" इति योगशास्त्रवचनानुसारेण तद्भावार्पितसंपन्नेन परयोगिना शिक्षणीयशिष्यस्थलं कथयति—

श्लोकः-शास्त्रीयो भवेद्यस्तु परकायेन सर्वदा ॥
तत्प्रसादात्तु मोक्षार्थी स शिष्य इति कीर्तितः ॥ १ ॥

व्याख्यानं—परकायेन परब्रह्मकायेन भावार्पितसंपन्नेन शिवयोगिना च सर्वदा शास्त्रीयः शिक्षणीयः भवेत् तत्प्रसादात् तद्भावार्पितसंपत्त्या प्रसादात् मोक्षार्थी परमपरमोक्षापेक्षी सः शिष्य इति कीर्तितः कथित इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ भेदूनी परकाय गुरुपासून ज्याला सर्वदा शिक्षण मिळतें, व त्या गुरूच्या कृपेनेच ज्याला मोक्षप्राप्तीचा अधिकार प्राप्त होतो त्यास शिष्य म्हणावें.

अवतरणिका-अथ प्रकारांतरेण तल्लक्षणमाह—

श्लोकः-भावो यस्य स्थिरो नित्यं मनोवाक्कायकर्मभिः ॥
गुरौ लिंगे गुणोदारे स शिष्य इति गीयते ॥ २ ॥

व्याख्यानं—यस्य भावः गुणोदारे ज्ञानवैराग्यादिगुणोन्नते निजे गुरौ श्रीगुरौ मनोवाक्कायकर्मभिः ध्यानस्तोत्रपूजारूपकर्मभिः नित्यं स्थिरः दृढो भवेत् सः शिष्य इति गीयते कथ्यत इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ ज्याचा आपल्या गुरूविषयीं, आपल्या चांगल्या चांगल्या गुणांविषयीं मन, वचन, शरीर आणि कर्म ह्यांनीं (ह्यामुळें) नेंहमीं दृढ निश्चय असतो त्याला शिष्य ह्मणतात.

अवतरणिका—अथ मुख्यशिष्यलक्षणमाह—

श्लोकः–शांतो दांतस्तपःशीलः सत्यवाक् समदर्शनः ॥
गुरौ शिवे समानस्थः स शिष्याणामिहोत्तमः ॥ ३ ॥

व्याख्यानं—यः शांतः अंतरिंद्रियनिग्रहवान् दांतः बाह्येंद्रियनिग्रहवान् तपःशीलः यमनियमाद्यष्टांगलक्षणतपोयोगनिष्ठः सन् सत्यवाक् यथार्थवादी सन् समदर्शनः लोष्टसुवर्णादिषु समानबुद्धिमान् सन् श्रीगुरौ शिवलिंगे च समदर्शनवान् सन् वर्तते सः इह लोके शिष्याणामुत्तमः श्रेष्ठ इत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ जो शिष्य स्वभावानें शांत आहे जो इंद्रियनिग्रही आहे, तपश्चर्येची ज्याला अतिशय आवड आहे, जो नेहमीं खरें बोलतो, सर्वांशीं सारखेपणानें (निष्कपटपणानें) वागतो शिवाला व गुरूला सारखें समजतो, तो सर्व शिष्यांत मुख्य शिष्य होय असें समजावें.

अवतरणिका–अथ शिष्याचारं सूत्रद्वयेन कथयति—

श्लोकः–गुरुमेव शिवं पश्येच्छिवमेव गुरुं तथा ॥
नैतयोरंतरं किंचिद्विजानीयाद्विचक्षणः ॥ ४ ॥

व्याख्यानं—विचक्षणः शिष्य इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ जो शिष्य गुरूलाच शिव आहे असें मानतो व शिवालाच गुरु आहे असें मानितो दोघांमध्यें काडीमात्र देखील अंतर नाहीं असें मानितो त्याला तो शहाणा आहे असें ह्मणावें.

शिवाचारे शिवध्याने शिवज्ञाने च निर्मले ॥
गुरोरादेशमात्रेण परां निष्ठामवाप्नुयात् ॥ ५ ॥

व्याख्यानं—निष्ठां विश्वासं प्राप्नुयादित्यर्थः ॥ शिष्टं स्पष्टं ॥ ५ ॥

अर्थ–॥ ५ ॥ शिष्य आपल्या गुरूच्या आज्ञेप्रमाणें शिवधर्मावर, शिवध्यानावर आणि निर्दोषरीतीच्या शिवज्ञानावर दृढ विश्वास ठेवितो.

अवतरणिका–अथ श्रीगुरुकृपाकटाक्षमहत्वं सूत्रद्वयेन कथयति–

श्लोकः–ब्रह्मांडबुद्बुदोद्भूतं मायासिंधुं महत्तरम् ॥
गुरोः कवलयत्याशु कटाक्षवडवानलः ॥ ६ ॥

व्याख्यानं—ब्रह्मांडरूपबुद्बुदानां उद्भूतमुद्भवनं यस्मिन् सः ब्रह्मांडबुद्बुदोद्भूत इत्यर्थः तादृशं महत्तरं मायासिंधुं गुरोः कटाक्षवडवानलः झटिति कवलयति ग्रसतीत्यर्थः नेत्रस्य तैजसत्वात् वडवानलत्वेन वर्णनं ॥ ६ ॥

अर्थ–॥ ६ ॥ अज्ञानरूप (मायारूप) समुद्र फारच मोठा असून हीं ब्रह्माण्डें त्या समुद्रावरील बुडबुड्यासारखीं आहेत त्या मायासमुद्राला गुरूचा कृपाकटाक्षरूपी वाडवाग्नि जाळून टाकितो. (सद्गुरूच्या कृपाकटाक्षानें शिष्याचा मायासमुद्र नाहींसा होतो)

गुरोः कटाक्षवेधेन शिवो भवति मानवः ॥
रसवेधाद्यथा लोहो हेमतां प्रतिपद्यते ॥ ७ ॥

व्याख्यानं—मानवः शिष्यजन इत्यर्थः सम्यगावेशो वेध इत्यर्थः शिष्टं स्पष्टं॥७॥

अर्थ–॥ ७ ॥ परिसमण्याचा संपर्क झाला असतां ह्या जगांत लोखंडाचें जसें सोनें होतें त्याचप्रमाणें सद्गुरूची कृपादृष्टि शिष्यावर झाली असतां तो शिष्य प्रत्यक्ष शंकर होतो.

अवतरणिका–अथैवं गुरुमहत्वज्ञानी गुरोराज्ञां न लंघयेदित्याह—

श्लोकः–न लंघयेद्गुरोराज्ञां ज्ञानमेव प्रकाशयन् ॥
शिवासक्तेन मनसा सर्वसिद्धिमवाप्नुयात् ॥ ८ ॥

व्याख्यानं—शिवासक्तेन शिवध्याननिष्ठेन मनसा ज्ञानं शिवाद्वैतज्ञानमित्यर्थः शिष्टं स्पष्टं ॥ ८ ॥

अर्थ–॥ ८ ॥ शिष्यानें आपल्या गुरूची आज्ञा कधींही मोडूं नये, ती आज्ञा शिष्यानें मनापासून पाळली असतां शिवज्ञान वृद्धिंगत होतें व त्यामुळें शिवाविषयीं दृढभक्ति उत्पन्न होऊन शिष्याचे सर्व मनोरथ पूर्ण होतात.

अवतरणिका–अथ गुरूपदेशरहस्यं सूचयति—

श्लोकः–शिवादन्यज्जगन्मिथ्या शिवः संवित्स्वरूपकः ॥
शिवस्त्वमिति निर्दिष्टो गुरुणा मुक्त एव सः ॥ ९ ॥

व्याख्यानं—जगत् शिवादन्यदिति मिथ्या शिवस्वरूपमेवेत्यर्थः तत्कथमित्यत्राह शिवः संवित्स्वरूपक इति विश्वस्य चिदंतर्गतत्वात्तरंगादिवच्चिन्मयं अन्यथा चिद्बाह्यत्वेनास्तीत्यत्र मानाभावादसदेव स्यादिति भावः शिवस्त्वमिति चिद्रूपत्वादिति भावः "ऐतदात्ममिदं सर्वं तत्सत्यं स आत्मा तत्वमसि श्वेतकेतो" इति छांदोग्यश्रुतेः इति यः शिष्यः श्रीगुरुणोपदिष्टः स मुक्त एव जीवन्मुक्त एवेत्यर्थः ॥९॥

अर्थ-॥ ९ ॥ शिवाखेरीज दुसरें जग दिसतें असें वाटतें तें सर्व खोटें आहे, शंकर हा स्वतः ज्ञानस्वरूप आहे फार काय परंतु तूंच स्वतः शिवस्वरूप आहेस असा शिष्यास गुरूनें उपदेश केल्यावर त्या शिष्यास यथार्थ ज्ञान होऊन तो मुक्त होतो.

अवतरणिका-अथ शिष्यस्थलं समापयति—

श्लोकः-गुरोर्लब्ध्वा महाज्ञानं संसारामयभेषजम् ॥
मोदते यः सुखी शांतः स जीवन्मुक्त एव हि ॥ १० ॥

व्याख्यानं—यः शिष्यः गुरोः श्रीगुरोः संसारामयभेषजं भवरोगस्यौषधं महाज्ञानं लब्ध्वा सुखी शिवसुखी सन् मोदते सुखमनुभवन्नास्ते सः शांतः रागद्वेषरहितः जीवन्मुक्त एवेति हि प्रसिद्ध इत्यर्थः ॥ १० ॥

इति शिष्यस्थलं ॥

अर्थ-॥ १० ॥ जो शिष्य संसाररूप रोग बरा होण्यासाठीं घ्यावयाचें उत्तम औषधच असें शिवज्ञान गुरूपासून शिकून आनंद पावतो व शांतपणानें सुखानें राहतो तो जीवन्मुक्तच होतो.

अथ शुश्रूपुस्थलम् ॥

अवतरणिका-अथ "तस्मादुपश्रितात्सम्यक् सहजं प्राप्य सद्गुरोः ॥ अनायासेन सततमात्माभ्यासरतो भवेत्" इति योगजागमवचनानुसारेण स शिष्य एव गुरुसेवातत्परः सन् रहस्यार्थजिज्ञासुः शुश्रूपुरिति सूत्रत्रयेण कथयति—

श्लोकः-बोधमानः स गुरुणा परकायेन सर्वदा ॥
तच्छुश्रूषारतः शिष्यः शुश्रूपुरिति कीर्त्यते ॥ १ ॥

व्याख्यानं—परब्रह्मकायेन श्रीगुरुणा सदा बोध्यमानः सः शिष्यः तच्छुश्रूषारतः तस्माच्छ्रोतुमिच्छायां लंपटः सन् शुश्रूपुरिति कीर्त्यते कथ्यतइत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ परकाय गुरूपासून ज्याला शिवज्ञानाचा उत्तम रीतीचा उपदेश

झाला आहे व त्यामुळें त्या गुरूवर त्याची श्रद्धा बसून त्याची नेहमीं सेवा करण्यांत तत्पर असतो. त्या शिष्यास शुश्रूषु असें ह्मणावें.

अवतरणिका—अथ तत्प्रश्नप्रकारं प्रदर्शयति—

श्लोकः—किं सत्यं किं नु वासत्यं क आत्मा कः परः शिवः ॥
इति श्रवणसंसक्तो गुरोः शिष्यो विशिष्यते ॥ २ ॥

व्याख्यानं—सत्यं नित्यं किं असत्यं अनित्यं किं आत्मा जीवः कः परः शिवः परमात्मा क इति गुरोः श्रीगुरोः सकाशात् श्रवणसंसक्तः उत्तरवाक्यश्रवणतत्परः शिष्यः शुश्रूषुः शिष्यः विशिष्यते केवलसेवासक्तशिष्यापेक्षया विशिष्यत इत्यर्थः ॥२॥

अर्थ—॥ २ ॥ खरें काय? खोटें काय? आत्मा कोणता? श्रेष्ठ शिव कोणता? हें सर्व गुरूपासून समजून घेण्यास जो शिष्य नेहमीं तयार असतो, तो उत्तम शिष्य समजावा.

C. N. Kalburgi

अवतरणिका—ननु कथं श्रेष्ठ इत्यत्राह—

श्लोकः—श्रुत्वा श्रुत्वा गुरोर्वाक्यं शिवसाक्षात्क्रियावहम् ॥
उपशाम्यति यः स्वांते स मुक्तिपदमाप्नुयात् ॥ ३ ॥

व्याख्यानं—यः शुश्रूषुः शिष्यः शिवप्रत्यक्षीकरणक्रियावहं श्रुतिसंमतोपदेशवाक्यं श्रीगुरोः श्रुत्वा श्रुत्वा असकृदित्यर्थः । स्वांते चित्ते उपशाम्यति शांतो भवति सः मुक्तिपदमाप्नुयात् लभेतेत्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ शिव प्रत्यक्ष रीतीनें प्राप्त होण्यासारखा गुरूचा उपदेश ऐकून ऐकून ज्याचे मनांत समाधान वाटलें आहे तो शिष्य मोक्षास जातो.

अवतरणिका—ननु सेवामात्रेण गुरोर्मुक्तः किं न स्याच्छिष्य इत्यत्राह—

श्लोकः—न बुध्यति गुरोर्वाक्यं विना शिष्यस्य मानसम् ॥
तेजो विना सहस्रांशोः कथं स्फुरति पंकजम् ॥ ४ ॥

व्याख्यानं—गुरूपदेशवाक्यं विना शिष्यस्य मानसं हृत्कमलं न बुध्यति न विकसति तत्र दृष्टांतः सहस्रांशोः सूर्यस्य तेजो विना पंकजं कथं स्फुरति विकसति न कथंचिदपि विकसति तथेत्यर्थः ॥ ४ ॥

अर्थ—॥ ४ ॥ गुरूचा उपदेश ऐकल्यावांचून शिष्याच्या मनाला कधींही बोध होत नाहीं. जसें सूर्याच्या प्रकाशाखेरीज कमळ प्रफुल्लित होत नाहीं, तसेंच गुरूच्या उपदेशावांचून शिष्यास ज्ञान होत नाहीं.

अवतरणिका–पुनश्च दृष्टांतरमाह—

श्लोकः–सूर्यस्योदयमात्रेण सूर्यकांतः प्रकाशते ॥
गुरोरालोकमात्रेण शिष्यो बोधेन भासते ॥ ५ ॥

व्याख्यानं—गुरूपदेशवाक्यान्नालोकमात्रेणेत्यर्थः शिष्टं स्पष्टं ॥ ५ ॥

अर्थ–॥ ५ ॥ सूर्योदय झाल्याबरोबर जसा सूर्यकांतमणि शोभूं लागतो, त्याचप्रमाणें सद्गुरूच्या कृपादृष्टीमुळें शिष्यास ज्ञान होऊन तो शिष्य कृतार्थ होतो.

अवतरणिका–अथ "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति मुंडकश्रुतिवाक्यानुसारेण तच्छ्रवणार्थं गुरूपसर्पणप्रकारमाह—

श्लोकः–अद्वैतपरमानंदप्रबोधैकप्रकाशकम् ॥
उपायं शृणुयाच्छिष्यः सद्गुरुं प्राप्य सांजलिः ॥ ६ ॥

व्याख्यानं—उपायनपाणिः सद्गुरुमधिगम्य सांजलिः मुकुलितकरयुगः सन् अप्रतियोगिपरमानंदप्रबोधस्य मुख्यतया प्रकाशकं उपायं उपदेशरहस्यरूपोपायं शिष्यः शृणुयात् प्रश्नपूर्वकं शृणुयादित्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ शिष्यानें आपले दोन्ही हात जोडून आपल्या सद्गुरूजवळ जावें; व अद्वैतशास्त्रांतील अपरिमित आनंद व ज्ञान करून देणारा उपाय विचारावा.

अवतरणिका–अथ प्रश्नप्रकारमुपपादयति—

श्लोकः–किं तत्वं परमं ज्ञेयं केन सर्वे प्रतिष्ठिताः ॥
कस्य साक्षात्क्रियामुक्तिः कथयेति समासतः ॥ ७ ॥

व्याख्यानं—भो श्रीगुरो ज्ञेयं परमं तत्वं किं केन वस्तुना सर्वे चराचराः प्रतिष्ठिताः कस्य साक्षात्कारेण मुक्तिः मोक्षः भवेत् एतत्सर्वं समासतः संग्रहेण कथय उपदिशेत्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ गुरुश्रेष्ठा, कोणतें उत्तम तत्व समजून घ्यावयाचें? कोणत्या तत्वाच्या आधारानें हें सर्व जग राहिलें आहे? कोण प्रत्यक्ष रीतीनें आपल्या दृष्टीस पडला म्हणजे मोक्षप्राप्ति होते? हें सर्व संक्षिप्तरीतीनें (थोडक्यांत) मला समजावून सांगा; अशी विनंति करावी.

अवतरणिका–अथ "तस्मै स विद्वानुपसन्नाय सम्यक्प्रशांतचित्ताय शमान्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां त-

त्वतो ब्रह्मविद्यामिति मुंडकश्रुत्यनुसारेण तत्प्रश्नोत्तरं पंचभिः सूत्रैः कथयति—

श्लोकः–इति प्रश्ने कृते पूर्वं शिष्येण नियतात्मना ॥
ब्रूयात्तत्वं गुरुस्तस्मै येन स्यात्संसृतेर्लयः ॥ ८ ॥

व्याख्यानं—नियतात्मना एकाग्रचित्तेनेत्यर्थः । शिष्टं स्पष्टं ॥ ८ ॥

अर्थ–॥ ८ ॥ अगोदर इंद्रियनिग्रहवान् शिष्यानें वर सांगितलेल्या रीतीचा प्रश्न केल्यावर, सद्गुरु त्या शिष्याला शिवरहस्याचा उपदेश करील; त्या उपदेशामुळें शिष्याचें जन्ममरण चुकेल.

अवतरणिका–अथ कृतप्रश्नस्य क्रमेणोत्तरं वक्ति—

श्लोकः–शिव एव परं तत्वं चिदानंदसदाकृतिः ॥
स यथार्थस्तदन्यस्य जगतो नास्ति नित्यता ॥ ९ ॥

व्याख्यानं—सच्चिदानंदस्वरूपः शिव एव परं तत्वं ज्ञातुं योग्यं परतत्वं स यथार्थः, नित्य इत्यर्थः तदन्यस्य चिद्विजातीयत्वेन भासमानस्य जगतः विष्ण्वादि-विश्वस्य नित्यत्वं शिववत्सनातनत्वं नास्तीत्यर्थः ॥ ९ ॥

अर्थ–॥ ९ ॥ शिव हेंच श्रेष्ठ तत्व आहे, तो शिव ज्ञानस्वरूपाची एक उत्तम मूर्ति आहे, त्या शिवस्वरूपाखेरीज इतर जग दिसत आहे त्यांत खरेपणा नाहीं; व तें जग नित्य नाहीं. तें नाशिवंत आहे.

अवतरणिका–अथ केन सर्वे प्रतिष्ठिता इत्यस्योत्तरमाह—

श्लोकः–अयथार्थप्रपंचोयं प्रतितिष्ठति शंकरे ॥
सदात्मनि यथा शुक्तौ रजतत्वं व्यवस्थितम् ॥ १० ॥

व्याख्यानं—अयथार्थः अनित्य इत्यर्थः तत्र दृष्टांतः सदात्मनि ज्ञानकक्षलक्षणो-भयेंद्रियज्ञानगोचरीभूतत्वाद्व्यावहारिकसद्रूपे शुक्तौ शुक्तिकाशकले रजतत्वं ज्ञानेंद्रियमात्रगोचरत्वेनोत्तरक्षणबाध्यमानप्रातीतिकरजतत्वं व्यवस्थितं यथा तिष्ठति तथा सनातने शंकरे अनित्यप्रपंचस्तिष्ठतीत्यर्थः ॥ १० ॥

अर्थ–॥ १० ॥ हा प्रपंचाचा पसारा सर्व मायिक खोटा आहे, शंकर हा शुद्धस्वरूप आहे. जशी शिंपी पाहिली ह्मणजे रुपें असल्याचा संशय येतो, त्याच-प्रमाणें जग सत्य आणि शाश्वत आहे असें वाटतें; परंतु तें अशाश्वत असून शंकराचे स्वरूपांत राहतें.

C. N. Kalburgi

अवतरणिका–अथ कस्य साक्षात्कारेण मुक्तिरित्यस्योत्तरमाह—

श्लोकः–शिवोहमिति भावेन शिवे साक्षात्कृते स्थिरम् ॥
मुक्तो भवति संसारान्मोहग्रंथेर्विभेदतः ॥ ११ ॥

व्याख्यानं—शिवोहमिति भावेन दृढभावेन शिवे प्रत्यक्षीकृते सति विभेदतः विशेषभेदतः संसारात् संसाररूपात् मोहग्रंथेः अज्ञानग्रंथेः मुक्तो भवतीत्यर्थः॥११॥

अर्थ–॥ ११ ॥ मीच शिव आहें अशी भावना केली ह्मणजे शिवसाक्षात्कार होऊन त्याचें मन स्थिर होतें, आणि अज्ञानरूप गांठ सुटून तो शिष्य जन्ममरणापासून मुक्त होतो.

अवतरणिका–अथैवमुक्तार्थे शिष्यं नियोजयति—

श्लोकः–शिवं भावय चात्मानं शिवादन्यं न चिंतय ॥
एवं स्थिरे शिवाद्वैते जीवन्मुक्तो भविष्यसि ॥ १२ ॥

व्याख्यानं—भो शिष्य त्वं आत्मानं त्वां शिवं संतं भावय शिवशिवभक्तयोरात्मत्वाविशेषादिति भावः ॥ इदमिति भासमानं विश्वमपि शिवादन्यं न चिंतय शिवस्वभावभूतचित्क्रियांतर्गतत्वात् जलतरंगन्यायेन शिवस्वरूपमेवेति चिंतयेत्यर्थः एवं शिवाद्वैते स्थिरे सति जीवन्मुक्तः जीवन्नपि मुक्तो भविष्यतीत्यर्थः ॥ १२ ॥

अर्थ–॥ १२ ॥ तूं आपणास शिव असेंच समज, शिवाखेरीज दुसरें कांहीं मनांतच आणूं नकोस, ह्याप्रमाणें शिवाद्वैत स्थिर झाल्यावर जीवन्मुक्त होशील.

अवतरणिका–अथ शुश्रूषुस्थलं समापयति—

श्लोकः–एवं प्रचोदितः शिष्यो गुरुणा गुणशालिना ॥
शिवमेव जगत्पश्यन् जीवन्मुक्तोऽभिजायते ॥ १३ ॥

व्याख्यानं—एवमनेन प्रकारेण ज्ञानवैराग्यादिगुणसंपन्नेन श्रीगुरुणा प्रकर्षेण बोधितः शिष्यः जगज्जालं शिवमेव पश्यन् शिवातिरिक्ताविद्यामयमित्यपश्यन् शिवस्वभावभूतचित्क्रियाशक्तिमयत्वाच्छिवात्मकमेवपश्यन् सन् जीवन्मुक्तोऽभिजायत इत्यर्थः ॥ १३ ॥

इति शुश्रूषुस्थलम्

अर्थ–॥ १३ ॥ ह्याप्रमाणें त्या गुणवान् गुरूनें शिष्यास उपदेश केल्यावर तो शिष्य सर्व जग आणि आपण स्वतः शिवस्वरूपच आहों असें मानूं लागतो, आणि त्यामुळें जीवन्मुक्त होतो.

अथ सेव्यस्थलम् ॥

अवतरणिका-अथ "भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः । क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति मुंडकोपनिषद्वचनानुसारेण "दृष्टिः स्थिरा यस्य विनैव दृश्यं वायुः स्थिरो यस्य विना प्रयत्नम् ॥ चित्तं स्थिरं यस्य विनावलंबं स एव योगी स गुरुः स सेव्य" इति योगजागमवचनानुसारेण च गुरूपदेशसिद्धशुश्रूषुरेव सेव्य इति तदीयस्थलं निरूपयति—

श्लोकः-गुरुवाक्यामृतास्वादात्प्राप्तबोधमहाफलः ॥
शुश्रूषुरेव सर्वेषां सेव्यत्वात्सेव्य उच्यते ॥ १ ॥

व्याख्यानं—गुरूपदेशवाक्यरूपामृतरसास्वादनेन संप्राप्तशिवाद्वैतज्ञानमहाफलवान् शुश्रूषुरेव सर्वैः सेव्यत्वात्सेव्य इत्युच्यत इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ गुरूच्या उपदेशरूप अमृताच्या गोडीमुळें ज्याला बोधरूप महाफलाचा लाभ झाला आहे असा तो सद्गुरूचा शिष्य, सर्वलोकांनीं त्याची सेवा करावी अशा योग्यतेस पोंचतो, तेव्हां त्यास सेव्य ह्मणतात.

अवतरणिका-अथ स सेव्य एव गुरुवत्पूजनीय इति सूत्रत्रयेणाह—

श्लोकः-गुरूपदिष्टे विज्ञाने चेतसि स्थिरतां गते ॥
साक्षात्कृतशिवः शिष्यो गुरुवत्पूज्यते सदा ॥ २ ॥

व्याख्यानं—विज्ञाने शिवाद्वैतलक्षणविशेषज्ञान इत्यर्थः शिष्टं स्पष्टं ॥ २ ॥

अर्थ-॥ २ ॥ गुरूनें सांगितलेलें शिवज्ञान मनामध्यें पुरतेपणीं ठसल्यावर प्रत्यक्ष शिवदर्शन झालेला शिष्य गुरूसारखाच पूज्य होतो; व सर्वलोक गुरूसारखाच त्याचा सन्मान ठेवितात.

अवतरणिका-ननु स सेव्यः पूजनीयोऽस्तु गुरुवत्कस्मात्पूजनीय इत्यत्राह—

श्लोकः-ज्ञानादाधिक्यसंपत्तिर्गुरोर्यस्मादुपस्थिता ॥
तस्माज्ज्ञानागमाच्छिष्यो गुरुवत्पूज्यतां व्रजेत् ॥ ३ ॥

व्याख्यानं—श्रीगुरोर्यस्मात् ज्ञानात् अधिकसंपत्तिः उपस्थिता समागता तस्मात् ज्ञानागमात् शिष्यः श्रीगुरुरिव पूज्यतां व्रजेत् गच्छेदित्यर्थः ॥ ३ ॥

अर्थ-॥ ३ ॥ शिष्याला ज्या गुरूपासून उत्तमप्रकारची ज्ञानप्राप्ति झाली त्याच गुरूप्रमाणें तो शिष्य देखील शिवज्ञान प्राप्त झाल्यामुळें लोकांत मानमान्यता पावतो.

अवतरणिका-अथ हेत्वंतरमाह—

श्लोकः-शिवोहमिति भावस्य नैरंतर्याद्विशेषतः ॥
शिवभावे समुत्पन्ने शिववत्पूज्य एव सः ॥ ४ ॥

व्याख्यानं—शिवोहमिति भावस्य नैरंतर्यात् निरवकाशरूपात् विशेषात् अभ्यासविशेषात् शिवभावे शिवत्वे समुत्पन्ने स्फुटीभूते सति सः शुश्रूषुः शिववत्पूज्य एवेत्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ मी शिव आहें अशी वरचेवर निरंतर भावना झाल्यामुळें, शिवपणाच त्या शिष्याला प्राप्त होतो; ह्मणून तो शिवाप्रमाणेंच मानमान्यतेस पात्र होतो.

अवतरणिका-नन्वस्य ससंगत्वात् शिवस्यासंगत्वात् कथं शिववत्पूजनीय इत्यत्राह—

श्लोकः-विषयासक्तचित्तोऽपि विषयासंगवर्जितः ॥
शिवभावयुतो योगी सेव्यः शिव इवापरः ॥ ५ ॥

व्याख्यानं—अत्र शिवभावयुत इति हेतुगर्भविशेषणं योगी शुश्रूषुः शिवयोगी विषयनिष्ठचित्तवानपि विषयसंगवर्जित एव शिवभावदार्ढ्यात् द्वितीयः शिव इव सेव्यः पूजनीय इत्यर्थः ॥ ५ ॥

अर्थ-॥ ५ ॥ त्याचें मन विषयसुखांत गुंतलेलें असलें तरी त्याला विषयसुखाची मनापासून इच्छा नसते, शिवपणा पावलेला तो शिवयोगी दुसरा शंकरच आहे असें समजून त्याची सेवा करावी.

वृत्तं- मुक्तः संशयपाशतः स्थिरमना बोधे च मुक्तिप्रदे
मोहं देहभृतां दृशा विघटयन् मूलं महासंसृतेः ॥
सत्तानंदचिदात्मके निरुपमे शैवे परस्मिन् पदे
लीनात्मा क्षयितप्रपंचविभवो योगी जनैः सेव्यते ॥ ६ ॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण विरचिते वीरशैवधर्मनिर्णये सिद्धान्तशिखामणौ प्रसादिस्थलाश्रितनवलिंगप्रसंगो नाम सप्तदशीयः परिच्छेदः समाप्तः ॥

व्याख्यानं—संशयपाशतः अहं शिवो वा नवेति संदेहपाशतः मुक्तः विमुक्तः मुक्तिप्रदे परात्परमुक्तिप्रदे बोधे च शिवाद्वैतज्ञाने स्थिरमनाः स्थिरचित्तः महासंसृतेः संसारस्य मूलं मूलकारणीभूतं देहभृतां मोहं देहिनामज्ञानं दृशा कृपादृष्ट्या विघटयन् निवारयन् सच्चिदानंदस्वरूपे उपमातीते शैवे परस्मिन् पदे लीनात्मा तदेकलोलीभूतनिजस्वरूपवान् योगी शिवयोगी क्षयितप्रपंचविभवः सन् स्वशक्तिलीनीकृतविश्वप्रपंचवैभवः सन् जनैः सेव्यते पूज्यतइत्यर्थः ॥ अस्य प्रसादिनोंऽगत्रयस्यैतल्लिंगत्रयं क्रमेण संयोजनीयमिति संप्रदायः ॥ ६ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां प्रसादिस्थलश्रितनवलिंगप्रसंगो नाम सप्तदशीयः परिच्छेदः समाप्तः ॥ १७ ॥

अर्थ-॥ ६ ॥ तो शिवयोगी संसाररूप पाशांतून मुक्त झालेला असतो, मोक्षप्राप्ति करून देणाऱ्या शिवज्ञानांत त्याचें मन स्थिर झालेलें असतें, भयंकर संसाराचें मूळच असा प्राणिमात्रांचा मोह (अज्ञान) तो आपल्या कृपादृष्टीनें क्षणांत दूर करितो. शिवपद श्रेष्ठ असून सत्तास्वरूप, आनंदस्वरूप आणि ज्ञानस्वरूप आहे त्याची बरोबरी करणारें दुसरें स्थान नाहीं; त्या शिवपदांत त्याचें मन गढून गेलेलें असतें, त्याचा सर्वप्रपंचाचा पसारा (दुःख) नाहींसें झालेलें असतें, आणि तो सर्वयोगीश्वर लोकांसही पूजा करण्यास योग्य असा होतो. (त्या शिवयोग्याची सर्व योगी सेवा करितात).

ह्याप्रमाणें वीरशैवधर्माचा निर्णय असणाऱ्या सिद्धान्तशिखामणिग्रंथांतील प्रसादिस्थलांत पोटभेदाप्रमाणें असणाऱ्या नऊ लिंगांचें वर्णन नांवाचा सतरावा परिच्छेद संपला.

C. N. Kalburgi

अथ अष्टादशीयः परिच्छेदः प्रारभ्यते ।

अवतरणिका-अथ प्राणलिंगिस्थलभेदाः कथ्यंते । अथागस्त्यप्रश्नः—

श्लोकः-प्रसादिस्थलसंबंधाः स्थलभेदाः प्रकीर्तिताः ॥
प्राणलिंगिस्थलारूढान् स्थलभेदान्वदस्व मे ॥ १ ॥

व्याख्यानं—स्थलभेदान् अवांतरस्थलभेदानित्यर्थः वदस्व उपदिशेत्यर्थः शिष्टं स्पष्टं ॥ ७ ॥

॥ श्रीनंदिकेश्वरास नमस्कार असो. ॥

अगस्त्य ह्मणतात.

अर्थ-॥ १ ॥ रेवणसिद्धा, प्रसादिस्थलांत पोटभेदासारखे असलेले स्थलांचे नऊ प्रकार तूं आह्मांस सांगितलेस. आतां मला प्राणलिंगिस्थलांतील पोटभेद किती आहेत ते सांग.

अवतरणिका-अथ श्रीरेणुकस्तद्भेदं सूत्रत्रयेण निरूपयति-

श्लोकः-स्थलानां नवकं प्रोक्तं प्राणलिंगिस्थलाश्रितम् ॥
आदावात्मस्थलं प्रोक्तमंतरात्मस्थलं ततः ॥ २ ॥
परमात्मस्थलं पश्चान्निर्देहागमसंज्ञकम् ॥
निर्भावागमसंज्ञं च ततो नष्टागमस्थलम् ॥ ३ ॥
आदिप्रसादनामाथ ततोऽप्यंत्यप्रसादकम् ॥
सेव्यप्रसादकं चाथ शृणु तेषां च लक्षणम् ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ २ ॥ ३ ॥ ४ ॥

अर्थ-॥ २ ॥ अगस्त्याचा असा प्रश्न ऐकून, रेवणसिद्ध ह्मणतात; प्राणलिंगिस्थलाचे नऊ पोटभेद आहेत ते असे; १ आत्मस्थल २ अंतरात्मस्थल ॥३॥ ३ परमात्मस्थल ४ निर्देहागम स्थल ५ निर्भावागमस्थल ६ नष्टागमस्थल ॥ ४ ॥ ७ आदिप्रसादस्थल ८ अंत्यप्रसादस्थल ९ सेव्यप्रसादस्थल. हीं नऊ स्थलें झालीं. आतां क्रमाक्रमानें प्रत्येकस्थलांचें लक्षण सांगतो.

अवतरणिका-"अथैष आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः" इति छांदोग्यश्रुत्यनुसारेणायं सेव्य एवात्मेत्यात्मस्थलं निरूपयति—

श्लोकः-जीवभावं परित्यज्य यदा तत्वं विभाव्यते ॥
गुरोश्च बोधयोगेन तदात्मायं प्रकीर्तितः ॥ ५ ॥

व्याख्यानं—अयं सेव्य एव श्रीगुरोः शिवज्ञानसंबंधेन जीवभावं जीवत्वं परित्यज्य यदा परतत्वं विभाव्यते तदा आत्मेति परिकीर्तित इत्यर्थः ॥ ५ ॥

अर्थ-॥ ५ ॥ गुरूच्या उपदेशामुळें जेव्हां शिष्य जीवपणाची बुद्धि सोडून शिवतत्वाचा अनुभव घेऊं लागतो तेव्हां त्याच्या जीवास आत्मा असें ह्मणावें.

अवतरणिका-अथ कोयं जीव इत्यत्र "वालाग्रशतभागेन शतधा कल्पितेन तु । भाग आत्मा स विज्ञेयः स चानंत्याय क-

लभ्यते" इति श्वेताश्वतरश्रुत्यनुसारेण जीवस्वरूपं पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः–वालाग्रशतभागेन सदृशो हृदयस्थितः ॥
अश्नन् कर्मफलं सर्वमात्मा स्फुरति दीपवत् ॥ ६ ॥

व्याख्यानं—वालाग्रेति केशाग्रशतभागेन सदृशः सन् स्वार्जितकर्मफलं भुंजन् सन् हृदये हृदयकमले स्थितः तिष्ठतीत्यर्थः नन्वेवं चेत् शरीरैकदेशनिष्ठत्वेन पादे मे वेदना शिरसि सुखमिति सर्वांगीणचैतन्योपलब्धिः कथमित्याशंक्याह दीपवदिति दीपस्य गृहैकदेशनिष्ठत्वेपि स्वप्रभया संपूर्णगृहं व्याप्य तदंतर्गतसकलवस्तुप्रकाशकत्वं यथा तद्वत् जीवस्य शरीरैकदेशनिष्ठत्वेपि "प्रज्ञया शरीरं समारुह्येति" श्रुतेः तद्बुद्धेर्व्यापकत्वेन सर्वं शरीरं व्याप्य सर्वांगीणचैतन्यमनुभवन् आत्मा जीवात्मा स्फुरति प्रकाशत इत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ आत्मा हा प्रत्येक प्राणिमात्रांच्या हृदयांत राहतो; व केशाच्या अग्राच्या शंभराव्या भागाइतका तो लहान आहे, तरी सर्वकर्मांच्या फळांचा स्वतः अनुभव घेतो, व दीपाप्रमाणें शोभतो.

अवतरणिका–नन्वेवंविधरूपं जीवस्य स्वाभाविकं किमित्यत्राह—

श्लोकः–आत्मापि सर्वभूतानामंतःकरणमाश्रितः ॥
अणुभूतो मलासंगादादिकर्मनियंत्रितः ॥ ७ ॥

व्याख्यानं—सर्वभूतानां पंचभूतानां आत्मापि परमार्थतो व्यापकत्वाश्रयोपि मलासंगात् आणवादिमलव्यापनात् अणुभूतः परमाणुवदति सूक्ष्मः सन् आदिकर्मनियंत्रितः प्राचीनकर्मपाशबद्धः सन् अंतःकरणमाश्रितः अहंकारमाश्रितवानित्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ आत्मा हा प्रत्येक प्राणिमात्राच्या मनांत राहतो. तो फार सूक्ष्म आहे. तो आणवमल, मायामल आणि कार्मिकमल ह्या तीनप्रकारच्या मलांमुळें अनेक प्रकारचीं कर्में करून संकटांत पडतो.

अवतरणिका–अथैवमहंकारसंबंधात् देहसंबंधोऽपि प्राप्त इत्यत्राह—

श्लोकः–जपायोगाद्यथा रागः स्फटिकस्य मणेर्भवेत् ॥
तथाहंकारसंबंधादात्मनो देहमानिता ॥ ८ ॥

व्याख्यानं—अपरिमिताहंकारसंबंधात् देहसंबंधः प्राप्तइत्यर्थः शिष्टं स्पष्टं ॥ ८ ॥

अर्थ-॥ ८ ॥ जास्वंदीच्या फुलाशेजारीं स्फटिक मणि ठेविला, तर तो जसा लाल दिसावयास लागतो; त्याचप्रमाणें अहंकाराच्या संबंधानें आत्म्यास देहाभिमान येतो.

अवतरणिका-ननु सर्वदोषरहितस्यात्मनः कथमुक्तप्रकारेण शरीरसंबंध इत्यत्राह—

श्लोकः-अशरीरोऽपि सर्वत्र व्यापकोऽपि निरंजनः ॥
आत्मा मायाशरीरस्थः परिभ्रमति संसृतौ ॥ ९ ॥

व्याख्यानं—परापरमोक्षकारणीभूतशुद्धविद्याशरीरवत्वेनाशरीरोपि अपरिछिन्नत्वाद्व्यापकोपि दोषरहितत्वान्निरंजनोपि कलादिक्षितिपर्यंतत्रिंशत्तत्वकारणीभूतस्वकीयाधोमायाशक्तिपरिकल्पितचंद्रकलाविशिष्टशरीरवान् सन् संसारे परिभ्रमतीत्यर्थः॥९

अर्थ-॥ ९ ॥ आत्म्यास शरीर नाहीं, तरी तो सर्वठिकाणीं व्यापलेला आहे व निरंजन आहे. आत्मा मायामय (खोट्या) शरीरांत राहतो व संसारांत फिरतो.

अवतरणिका-अथैवंरूपजीवस्यात्मत्वप्राप्तिप्रकारमाह—

श्लोकः-आत्मस्वरूपविज्ञानं देहेंद्रियविभागतः ॥
अखंडब्रह्मरूपेण तदात्मप्राप्तिरुच्यते ॥ १० ॥

व्याख्यानं—देहेंद्रियविभागतः उक्तलक्षणमायिकप्राकृतसत्वादिगुणकार्यरूपशरीरेंद्रियादिव्यतिरिक्तत्वेन अखंडब्रह्मरूपेण अपरिच्छिन्नब्रह्मरूपेण आत्मविज्ञानं स्वस्वरूपज्ञानं यदा भवति तदात्मप्राप्तिः आत्मत्वलाभः उच्यते "आत्मलाभान्नपरं विद्यते नेति सति न ह्य" इति श्रुतेरित्यर्थः ॥ १० ॥

अर्थ-॥ १० ॥ देहाविषयीं ज्ञान, इंद्रियांविषयीं ज्ञान, व आत्मस्वरूपाविषयीं ज्ञान होऊन हें सर्व ब्रह्मस्वरूप आहे असें पुरतेपणीं समजून आल्यावर, मग आत्मप्राप्ति होते.

अवतरणिका-नन्वपरिच्छिन्नं ब्रह्म परिच्छिन्नशरीरविशिष्टं किमर्थं जातमित्यत्राह—

श्लोकः-न चास्ति देहसंबंधो निर्देहस्य स्वभावतः ॥
अज्ञानकर्मयोगेन देही भवति भुक्तये ॥ ११ ॥

व्याख्यानं—अशरीरस्य परमात्मनः परमार्थतः शरीरसंबंधो नास्त्येव तथापि भुक्तये यथा नृपः सार्वभौमप्रभावामोदबृंहितः क्रीडन् करोति पादातिधर्मं तद्धर्मधर्मित इति शिवदृष्टिशास्त्रोक्तदृष्टांतेन अखंडरसास्वादपरिबृंहितोपि खंडरसास्वादनार्थमिच्छायां अज्ञानकर्मयोगेन स्वातंत्र्यपरिकल्पिताणवादिमलसंबंधेन देही

भवति घृतकाठिन्यन्यायेनांशतः शरीरी भवति तस्मादंशीभूतस्य ज्ञानादिमलसंबंधात् नृपइवाहं शिवइति ज्ञानं नास्तीति बोध्यं अस्मिन्नर्थे "सर्वैनैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् ॥ सप्तावानास तत्सृष्ट्या तदेवानुप्राविशत् तदनु प्रविश्य सच्चत्यच्चाभवत्" इति श्रुतिः "विशिष्टोहमिदं कृत्स्नमेकांशेन स्थितं जगत्" इति "ममैवांशो जीवलोके जीवभूतः सनातनः" इति भगवदुक्तिश्च शिवस्य निरंशत्वेपि स्वतंत्रत्वात् स्वातंत्र्यपरिकल्पितांशभवः संभवति वत्सापहरणदृष्टांतात् क्रिया हि कर्मण्येव विश्राम्येन्नतु कर्तरीतिन्यायान्नात्मनो बंधः वस्तुतस्तु "आत्मा वा इदमेक एवाग्र आसीत्" इति श्रुतेः "कला सप्तदशी देवी स्वांतर्लीनाचराचरा"॥ इत्यागमोक्तेः "इदं पूर्वं जगत्सर्वं प्रलये पारमेश्वरे । मायाभिन्ने स्वमायाख्यकारणाभेदरूपतः । वर्तते वासनारूपेणैव नाभावरूपतः" इति पाराशरोपपुराणवचनाच्च सर्वं विश्वमंडरसन्यायेनात्मसमवेतचित्क्रियासामरस्यलक्षणचिदंबरशक्तौ तादात्म्येनास्तीति परमात्मस्थले वक्ष्यमाणरीत्या वह्निर्विस्फुलिंगानिव स्वतादात्म्यापन्नान् चित्कणान् तत्तत्कर्मानुसारेण सृजत्यवति संहरति तिरयतेनुगृह्णातीति न काचिदनुपपत्तिः ॥ ११ ॥

अर्थ-॥ ११ ॥ आत्म्यास शरीर नाहीं; त्याचा व शरीराचा कांहींएक संबंध नाहीं. तो अज्ञानपणाच्या कर्मांमुळें शरीरी (देहधारी) होतो आणि कर्मांचें फळ भोगतो.

अवतरणिका—तर्ह्यसौ जीवः किंनामक इत्यत्राह—

श्लोकः—नासौ देवो न गंधर्वो न यक्षो नैव राक्षसः ॥
न मनुष्यो न तिर्यक्च न च स्थावरविग्रहः ॥ १२ ॥

व्याख्यानं—तत्तच्छरीरयोगेन तत्तन्नाम्ना विराजितः स्पष्टं ॥ १२ ॥

अर्थ-॥ १२ ॥ आत्मा हा देव नव्हे, कोणी गंधर्व नव्हे, कोणी यक्ष नव्हे किंवा राक्षस नव्हे, मनुष्य नव्हे किंवा पशुपक्षी नव्हे. किंवा तो धोंडा किंवा लांकूड असा निर्जीव पदार्थही नव्हे.

अवतरणिका—तर्ह्ययं कीदृश इत्यत्र "स्वस्वकृतदुष्कर्मणा परमेश्वरप्रेरणया बद्धाः संसारिणो जीवा" इति वृद्धजाबालश्रुत्यनुसारेण दृग्युगैक्यावलोकनमिव द्वैताद्वैतसामरस्यात्मनः शिवस्य स्वातंत्र्यपरिकल्पितजीवोपाधिना नानारूपाः संतः शिवस्य क्रीडाभाजनरूपा इत्याह—

श्लोकः—नानाकर्मविपाकाश्च नानायोनिसमाश्रिताः ॥
नानायोगसमापन्ना नानाबुद्धिविचेष्टिताः ॥ १३ ॥

नानामार्गसमारूढा नानासंकल्पकारिणः ॥
अस्वतंत्राश्च किंचिज्ज्ञाः किंचित्कर्तृत्वहेतवः ॥
लीलाभाजनतां प्राप्ताः शिवस्य परमात्मनः ॥ १४ ॥

व्याख्यानं—नानाविधप्राचीनकर्मविपाकवशात् "देवाः षोडशलक्षाणि" इत्युदाहृतवचनानुसारेण देवतिर्यङ्मनुष्यादिनानायोनिसमापन्नाः नानाविधस्वर्गभोगोपायचिंतकाः नानाविधबुद्ध्याक्रांताः संतः । नानाविधवैष्णवादिदर्शनमार्गप्रविष्टाः नानासंकल्पकारिणः किंचिज्ज्ञाः किंचित्कर्तृत्वकारणीभूताः स्वातंत्र्यशून्या जीवाः परमात्मनः शिवस्य लीलाभाजनतां गताः क्रीडाभांडरूपा इत्यर्थः ॥१३॥१४॥

अर्थ–॥ १३ ॥ हे संसारी जीव अनेक प्रकारच्या कर्मांचीं फळें भोगतात, ते अनेकप्रकारच्या योनींमध्यें जन्मतात. अनेकप्रकारच्या कृति (योग) करितात व अनेकप्रकारच्या समजूतीप्रमाणें निरनिराळ्या चेष्टा करितात. ॥ १४ ॥ नानाप्रकारचे पंथ चालू करितात, अनेकप्रकारचे विचार करितात, ते परतंत्र असतात, त्यांस कांहीं थोडेंबहुत ज्ञान असतें; व ते कांहींएक विशेष हेतु मनामध्यें धरितात.

अवतरणिका–अथैते किं यांतीत्यत्राह—

श्लोकः–चोदिताः परमेशेन स्वस्वकर्मानुरूपतः ॥
स्वर्गं वा नरकं वापि प्राणिनो यांति कर्मिणः ॥ १५ ॥

व्याख्यानं—स्पष्टम् ॥ १५ ॥

अर्थ–॥ १५ ॥ हे सर्व जीव परमेश्वर शंकराच्या लीलेस (क्रीडेस) योग्य अशीं रूपें घेतात; व शंकराच्याच इच्छेप्रमाणें आपापल्या कर्मांप्रमाणें अनेकप्रकारचीं कर्में करून कोणी स्वर्गास जातात, कोणी नरकास जातात.

अवतरणिका–अथ स्वर्गनरकयोर्वा तेषां स्थैर्यमस्ति किमित्यत्राह—

श्लोकः–पुनः कर्मावशेषेण जायंते गर्भकोटरात् ॥
जाता मृताः पुनर्जाताः पुनर्मरणभाजिनः ॥
भ्रमंति घोरसंसारे विश्रांतिकथया विना ॥ १६ ॥

व्याख्यानं—विश्रांतिकथया स्वस्वरूपविश्रांतिवार्ताव्यतिरेकेणेत्यर्थः शिष्टं स्पष्टं ॥ १६ ॥

अर्थ–॥ १६ ॥ पुनः कांहीं कर्म शिल्लक राहिलें असेल, तें भोगण्यासाठीं

पुनः जन्मास येतात, पुनः मरतात, पुनः जन्मतात. असें अनेकवेळ जन्ममरणाचें दुःख भोगतात.

अवतरणिका–नन्वेवं चेत् संसारचक्रपरिभ्रमणं शाश्वतं किमित्यत्राह—

श्लोकः–जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम् ॥
निरस्यते गुरोर्बोधाज्ज्ञानशक्तिः प्रकाशते ॥ १७ ॥

व्याख्यानं—जीवत्वमाणवादिमलकल्पितं अज्ञानादिमलकल्पितमित्यर्थः तस्मात् दुःखसर्वस्वरूपं तदिदं दुःखसर्वस्वरूपं जीवत्वं गुरोर्बोधात् श्रीगुरूपदिष्टशिवाद्वैत बोधात् निरस्यते निवार्यते ज्ञानशक्तिः स्वस्वरूपज्ञानशक्तिसामर्थ्यं प्रकाश्यत इत्यर्थः ॥ १७ ॥

इत्यात्मस्थलम् ॥

अर्थ–॥ १७ ॥ जीवदशा ही दुःखाचें भांडार आहे, जीवदशेंत अनेकप्रकारचीं दुःखें भोगावीं लागतात. हीं सर्व दुःखें मलापासून (दोषांपासून) उत्पन्न होतात. ते तीन मल गुरूच्या उपदेशानें दूर होऊन ज्ञानशक्ति प्रकट होते.

अथ अंतरात्मस्थलम् ॥

अवतरणिका–अथ "सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्यः" इति कठवल्लीश्रुत्यनुसारेण निराकृतजीवभावस्यात्मनः अंतरात्मत्वं भवतीति निरूपयति—

श्लोकः–यदा निरस्तं जीवत्वं भवेद्गुर्वनुबोधतः ॥
तदांतरात्मभावोऽपि निरस्तस्य भवेद्ध्रुवम् ॥ १ ॥

व्याख्यानं—गुर्वनुबोधतः गुरूपदेशात् जीवत्वं जीवभावः यदा निरस्तं भवेत् तदा निरस्तस्य निरस्तजीवभाववत आत्मनः अंतरात्मभावः भवेत् स्यात् ध्रुवं निश्चयइत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ जेव्हां गुरूनें उपदेश केल्यामुळें शिष्याचा जीवपणा नाहींसा होईल (मी जीव वेगळा व परमात्मा शिव वेगळा अशी बुद्धि नाहींशी होईल); तेव्हां जीवपणाची बुद्धि नाहींशी झाल्यावर अंतरात्मभाव उत्पन्न होतो.

अवतरणिका–अथांतरात्मस्वरूपं सूत्रत्रयेण कथयति—

श्लोकः–देहस्थितोऽप्ययं जीवो देहसंगविवर्जितः ॥
बोधात्परात्मभावित्वादंतरात्मेति कीर्तितः ॥ २ ॥

व्याख्यानं—अयं जीवः देहस्थितोपि देहसंगरहितः सन् बोधात् स्वस्वरूपज्ञानात् परात्मभावित्वात् परमात्मनः भाववत्वात् अंतरात्मेति कथ्यत इत्यर्थः ॥ २॥

अर्थ-॥ २ ॥ हा जीव शरीरांत राहतो, तरी शरीराचा व त्याचा वास्तविक कांहीं संबंध नाहीं. असा बोध झाल्यावर व परमेश्वराचें यथार्थज्ञान झाल्यावर त्यास अंतरात्मा असें ह्मणतात.

अवतरणिका-अथ प्रकारांतरेणोपपादयति—

श्लोकः-आत्मांतरालवर्तित्वाज्जीवात्मपरमात्मनोः ॥
योगादुभयधर्माणामंतरात्मेति कीर्तितः ॥ ३ ॥

व्याख्यानं—आत्मा निरस्तजीवभाववान् सेव्यः शिष्योपदेशसमये जीवात्मपरमात्मनोरंतरालवर्तित्वात् मध्यवर्तित्वादित्यर्थः तदा शिष्यबुद्धिशिक्षकत्वेन तदंतर्यामितया शिवधर्मयोगात् आहारव्याहारादेर्विद्यमानत्वेन जीवधर्मयोगात् एवमुभयधर्माणां योगात् अंतरात्मेति कीर्तित इति ॥ ३ ॥

अर्थ-॥ ३ ॥ शिष्याला उपदेश देतेवेळीं अन्तरात्मा हा जीव आणि परमेश्वर ह्या दोहोंच्यामध्यें राहतो व दोघांचेही थोडथोडे गुणधर्म (बुद्धिशिक्षकत्व शिवधर्म आणि आहारव्यवहारादि जीवधर्म) ह्यांत असतात ह्मणून ह्यास अंतरात्मा असें ह्मणतात.

अवतरणिका-अथ प्रकारांतरेणाह—

श्लोकः-अहंकारस्थसंबंधान्मनुष्यत्वादिविभ्रमः ॥
न स्वभाव इति ज्ञानादंतरात्मेति कथ्यते ॥ ४ ॥

व्याख्यानं—परिच्छिन्नस्वरूपांहभाववशात् मनुष्यत्वादिविभ्रमः स्यात् न स्वभावत इति ज्ञानात् परिच्छिन्नस्वरूपत्वं न स्वाभाविकमिति ज्ञानात् अंतरात्मेति कथ्यत इत्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ गर्वाचा ताठा अंगांत भरला ह्मणजे मी मनुष्य, मी श्रेष्ठ, मी नीच अशा कल्पना येऊं लागतात; ह्या कल्पना वास्तविक खऱ्या नव्हेत, असें ज्ञान झालें ह्मणजे त्या ज्ञानास अंतरात्मा ह्मणतात.

अवतरणिका-अथास्य शरीरसंबंधोऽस्ति नवेत्यत्र दृष्टांतपूर्वकं सूत्रत्रयेणाह—

श्लोकः-यथा पद्मपलाशस्य न संगो वारिणा भवेत् ॥
तथा देहजुषोऽप्यस्य न शरीरेण संगतिः ॥ ५ ॥

नीडस्थितो यथा पक्षी नीडाद्भिन्नः प्रदृश्यते ॥
देहस्थितस्तथात्मायं देहादन्यः प्रकाश्यते ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ५ ॥ ६ ॥

अर्थ–॥ ५ ॥ जसें पाण्यांत उगवून पाण्यांतच नेहमीं राहणारें कमळाचें पान पाण्यानें भिजत नाहीं; तसाच अन्तरात्मा हा शरीरांत राहतो, तरी शरीराचा व अन्तरात्म्याचा कांहींएक संबंध नाहीं. ॥ ६ ॥ जसा पक्षी आपल्या घरट्यांत राहतो, तरी तो घरट्याहून अगदीं वेगळा आहे; त्याचप्रमाणें आत्मा शरीरांत राहतो खरा, परंतु तो शरीराहून अगदीं वेगळा आहे.

अवतरणिका–अथ पुनर्दृष्टांतमाह—

श्लोकः–आच्छाद्यते यथा चंद्रो मेघैरासंगवर्जितैः ॥
तथात्मा देहसंघातैरसंगपरिवेष्टितः ॥ ७ ॥

व्याख्यानं—चंद्रः आसंगवर्जितैः स्वस्य सर्वत्र संगरहितैः मेघैर्यथा आच्छाद्यते तथा आत्मा निवृत्तजीवभावः सेव्यः देहसंघातैः स्थूलादिदेहसमूहैः असंगः सन् परिवेष्टित इत्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ मेघांचा (ढगांचा) व चंद्राचा अर्थाअर्थीं कांहींएक संबंध नसतो खरा; तरीपण ते चंद्रमंडलास झांकून टाकून त्याचें तेज कमी करितात. त्याचप्रमाणें शरीराचा आणि आत्म्याचा कांहींएक संबंध नाहीं खरा; तरीपण शरीरामुळें आत्म्यास देहधारीपणा आला आहे.

अवतरणिका–तर्ह्ययं कं पश्यन्नास्त इत्यत्राह—

श्लोकः–निर्ममो निरहंकारी निरस्तोपाधिविक्लवः ॥
देहस्थोऽपि सदा ह्यात्मा शिवं पश्यति योगतः ॥ ८ ॥

व्याख्यानं—विक्लवो बाधः योगो योगसामर्थ्यं शिष्टं स्पष्टं ॥ ८ ॥

अर्थ–॥ ८ ॥ आत्मा हा निष्कपट आहे, व त्यास गर्व नाहीं, त्याला कोणतीही उपाधि किंवा पीडा नाहीं. आत्मा नेहमीं शरीरांत राहतो, तरी योगसाधनानें शिवस्वरूप यथार्थरीतीनें पाहूं शकतो.

अवतरणिका–तर्हि शिवं पश्यन्नयं तथाभासत इत्यत्राह—

श्लोकः–भोक्तृभोज्यपरित्यागात्प्रेरकस्य प्रसादतः ॥
भोक्तृताभावगलितः स्फुरत्यात्मा स्वभावतः ॥ ९ ॥

व्याख्यानं—भोक्तृभोज्यपरित्यागात् भोक्तृजीवेन , भोज्यविषयपरित्यागात्

प्रेरकस्येश्वरस्य प्रसन्नतावशात् भोक्तृताभावगलितः सन् भोक्तृलक्षणजीवभावावियुक्तः सन् स्वभावतः जीवेश्वरसाधारणीभूतात्मत्वस्वरूपतः स्फुरति प्रकाशत इत्यर्थः ॥९॥

अर्थ–॥ ९ ॥ हा आत्मा सद्गुरूच्या (प्रेरकाच्या शंकराच्या) कृपादृष्टीमुळें भोक्तृ (जीव) आणि भोज्य (विषय) सोडून देऊन जीवभाववियुक्त होऊन स्वाभाविकपणानें शोभत असतो.

अवतरणिका–अथांतरात्मस्थलं समापयति—

श्लोकः–सर्वेषां प्रेरकत्वेन शंभुरंतस्थितः सदा ॥
तत्परज्ञानयोगेन योगी नंदति मुक्तवत् ॥ १० ॥

व्याख्यानं—स्पष्टं ॥ १० ॥

इत्यंतरात्मस्थलम् ॥

अर्थ–॥ १० ॥ सर्व प्राणिमात्रांस शंकर हा प्रेरक असून तो प्राणिमात्रांच्या हृदयांत राहतो; त्या शंकराचें यथार्थज्ञान झाल्यामुळें योगसाधन करणारा योगी मुक्त झाल्याप्रमाणें आनंदांत निमग्न होतो.

अथ परमात्मस्थलम् ॥

अवतरणिका–अथ "एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयं । समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपं" इति कैवल्यश्रुत्यनुसारेण अयमंतरात्मैव निर्मलत्वेन परमात्मेति निरूपयति—

श्लोकः–निर्धूते तत्प्रबोधेन मले संसारकारणे ॥
सामरस्यात्परात्मस्थात्परमात्मायमुच्यते ॥ १ ॥

व्याख्यानं—अयमंतरात्मा संसारकारणे मले अज्ञाने तत्प्रबोधेन तच्छिवाद्वैतज्ञानेन निर्धूते सति निवारिते सति परात्मस्थात् परमात्मस्थात् सामरस्यात् समरसभावात् परमात्मेत्युच्यत इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ संसाराच्या फेऱ्यांत पाडणारा मल (दोष) आत्मस्वरूपाच्या ज्ञानानें धुवून गेल्यावर, शिवसामरस्य प्राप्त होतें. त्या स्थितींत जीवाचें आणि परमेश्वराचें ऐक्य होतें; त्यास परमात्मस्थल ह्मणतात.

अवतरणिका–अथ कोऽयं परमात्मेत्यत्राह—

श्लोकः–सर्वेषामात्मभेदानामुत्कृष्टत्वात्स्वतेजसा ॥
परमात्मा शिवः प्रोक्तः सर्वगोऽपि प्रकाशवान् ॥ २ ॥

व्याख्यानं—स्वतेजसा निजतेजसा सर्वगोऽपि सर्वव्यापकोऽपि प्रकाशवान् शिवः सर्वेषामात्मभेद्रानां उत्कृष्टत्वात् परमात्मेति प्रोक्तः उच्यत इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ आपल्या सामर्थ्यानें सर्वव्यापक असूनही शोभणारा शिव सर्व आत्म्यांपेक्षां श्रेष्ठ आहे; ह्मणून त्यास परमात्मा असें ह्मणतात.

अवतरणिका-अथ प्रकारांतरेण तल्लक्षणमाह—

श्लोकः-ब्रह्मांडबुद्बुदस्तोमा यस्य मायामहोदधौ ॥
उन्मज्जंति निमज्जंति परमात्मा स उच्यते ॥ ३ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥

अर्थ-॥ ३ ॥ हे ब्रह्मांडरूपी बुडबुड्यांचे समुदाय ज्याच्या मायारूप महासमुद्रांत वर येतात, व पुन्हां नाहींसे होतात, त्यास परमात्मा ह्मणतात.

अवतरणिका-अथ तत्स्वरूपमेव दृष्टांतपूर्वकं सूत्रत्रयेण कथयति—

श्लोकः-यस्मिन् ज्योतिर्गणाः सर्वे स्फुलिंगा इव पावकात् ॥
उत्पत्य विलयं यांति तद्रूपं परमात्मनः ॥ ४ ॥

व्याख्यानं—यस्मिन् वस्तुनि सर्वे ज्योतिर्गणाः समस्तजीवतेजःसमूहाः वह्नेर्जाता विस्फुलिंगा इव उत्पत्य विलयं यांति तत्परमात्मनो रूपं स्वरूपमित्यर्थः ॥४॥

अर्थ-॥ ४ ॥ जशा विस्तवापासून ठिणग्या वर उडतात, त्याप्रमाणें हे तेजाचे समुदाय (जीवांचे समुदाय) त्या परमेश्वरापासूनच उत्पन्न होतात; व त्या परमेश्वरांतच लय पावतात. तेंच परमेश्वराचें श्रेष्ठ स्वरूप होय.

अवतरणिका-अथ प्रकारांतरेणाह—

श्लोकः-यस्मिन् समस्तवस्तूनि कल्लोला इव वारिधौ ॥
संभूय लयमायांति तद्रूपं परमात्मनः ॥ ५ ॥

व्याख्यानं—यस्मिन्वस्तुनि भूम्यादिसमस्ततत्वानि समुद्रे बृहत्तरंगा इव, संभूय लयमायांति तत्परमात्मनो रूपं ॥ ५ ॥

अर्थ-॥ ५ ॥ समुद्रांत जशा हजारों लाटा उसळतात, व पुनः पूर्वीप्रमाणेंच पाण्यांत जाऊन मिसळतात; त्याप्रमाणेंच ज्या परमेश्वरापासून सर्व वस्तु उत्पन्न होतात, व पुनः त्या परमेश्वरांतच लय पावतात; तेंच परमेश्वराचें स्वरूप होय.

अवतरणिका–पुनः प्रकारांतरेणाह—

श्लोकः–निरस्तमलसंबंधं निःशेषजगदात्मकम् ॥
सर्वतत्वोपरि प्रोक्तं स्वरूप परमात्मनः ॥ ६ ॥

व्याख्यानं—निवारिताणवादिमलसंबंधं नामरूपात्मकसकलजगज्जीवनभूतं परमात्मनः स्वरूपं भूम्यादिशिवांतसकलतत्वोपरि प्रोक्तं ॥ ६ ॥

अर्थ–॥ ६ ॥ जें रूप फार निर्मळ आहे, त्रिमलांचा ज्या रूपाला स्पर्श देखील नाहीं, सर्व त्रैलोक्याचा समावेश ज्या रूपांत होतो, व सर्व तत्वांपेक्षां जें स्वरूप श्रेष्ठ आहे, तेंच परमेश्वराचें स्वरूप होय.

अवतरणिका–अथ परमात्मा कथं प्रकाशत इत्यत्राह—

श्लोकः–यथा व्याप्य जगत्सर्वं स्वभासा भाति भास्करः ॥
तथा स्वशक्तिभिर्व्याप्य परमात्मा प्रकाशते ॥ ७ ॥

व्याख्यानं—भास्करः स्वकांत्या जगत्सर्वं व्याप्य यथा वर्तते तथा परमात्मा धूमावत्यादिस्वकीयपंचशक्तिभिर्विश्वं व्याप्य प्रकाशत इत्यर्थः ॥ तथाहि सृज्यस्य पांचभौतिकत्वात् भूम्यां धूमावत्यपरपर्यायातिरोधानशक्तिः जले पुष्टिलक्षणा पालनशक्तिः तेजसि विश्वप्रकाशकतालक्षणा सृष्टिशक्तिः वायौ शोषकतालक्षणा संहारशक्तिः नभसि व्यापकशिवैकीकरणप्रवीणानुग्रहात्मिका विभुताशक्तिः एवं पंचभिर्विश्वं व्याप्य वर्तत इत्यर्थः उक्तोऽयमर्थः पंचाशिखाशास्त्रे "धूमावती पृथिव्यां ल्हादाप्सु शुचौ तु भास्वती प्रथते वायौ स्पंदा विभ्वी नभसि व्याप्तं जगत्ताभिः धूमावती तिरोधौ भास्वत्यवभासनेऽध्वनां शक्तिः ॥ क्षोभे स्पंदा व्याप्तौ विभ्वी ल्हादा च पुष्टौ स्यात् इति एवंस्वशक्तिभिर्विश्वं व्याप्य वर्तत इत्यर्थः अत्र स्वकांत्या विश्वं व्याप्य भासमानस्य सूर्यस्य यथा भेदः तथा शिवाद्विश्वस्याभेदो नाशंकनीयः भूम्यादेः शक्तिरूपत्वात् शक्तीनां शिवस्वभावत्वात् नैवं विश्वं सारतेजोरूपं किंतु संबंधमात्रं सर्वांशे दृष्टांताभावाद्व्याप्तावेव दृष्टांत इति ॥ ७ ॥

अर्थ–॥ ७ ॥ जसा सूर्य आपल्या उजेडानें सर्व जगावर उजेड पाडतो; त्याचप्रमाणें परमेश्वर आपल्या शक्तींनीं सर्व जग आपल्या ताब्यांत ठेऊन शोभतो.

अवतरणिका–नन्वेवं विश्वव्यापकत्वेन भासमानत्वादीश्वरस्य विश्वविकारः कस्मान्न संभवति इत्याक्षेपस्योत्तरं वदन् परमात्मस्थलं समापयति—

श्लोकः–विश्वतो भासमानोऽपि विश्वमायाविलक्षणः ॥
परमात्मा स्वयंज्योतीरूपो जीवात्मनां भवेत् ॥ ८ ॥

व्याख्यानं—परमात्मा विश्वस्मिन् सर्वत्र भासमानोपि विश्वमायाविलक्षणः विश्वोपादानकारणीभूतः व्योमवत् विश्वगतषड्भावविकारदोषरहितः सन् सच्चिदानंदस्वरूपेण जीवात्मनां संसारहेयबुद्धिसंपन्नानां ज्योतीरूपः बुद्धिप्रकाशको भवतीति ॥ ८ ॥

इति परमात्मस्थलं ॥

अर्थ-॥ ८ ॥ परमेश्वर सर्व जगांहून तेजस्वी आहे. जगांत अनेकप्रकारची माया (अज्ञानदशा) आहे त्या मायेहून परमेश्वर विलक्षण आहे (ज्ञानी आहे). परमेश्वर हा स्वतः सर्व जीवात्म्यांस तेजोरूप आहे. जगांतील सर्व प्राणिमात्र परमेश्वराच्या शक्तीनें चालतात.

अथ निर्देहागमस्थलम्

अवतरणिका-अथ "आश्रयो द्वंद्वमित्युक्तं द्वंद्वत्यागात्परो दमः ॥ जीवन्मुक्तः सदा योगी देहत्यागाद्विमुच्यते" इति देवीकालोत्तरवचनानुसारेण देहधर्मं निराकृत्य परमात्मस्वरूपभावनावतः शिवयोगिनो निर्देहागमस्थलं निरूपयति—

श्लोकः-देहिनोपि परात्मत्वभाविनो निरहंकृतेः ॥
निरस्तदेहधर्मस्य निर्देहागम उच्यते ॥ १ ॥

व्याख्यानं—परमात्मत्वभाविनः अहंकारममकारशून्यस्य निरस्तदेहधर्मस्य निरस्तस्थूलत्वादिदेहधर्मवतो देहिनः देहवतः शिवयोगिनः निर्देहागमः निर्देहप्राप्तिः उच्यते कथ्यत इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ जो नेहमीं परमेश्वर मीच आहें असें मानितो, ज्याला अभिमान मुळींच नाहीं, ज्याचें शरीरावर मुळींच प्रेम राहिले नाहीं, त्या प्राण्यास (शिवयोग्यांस) निर्देहागम असें ह्मणतात.

अवतरणिका-अथ परमात्मभाववतः शिवयोगिनः देहसंबंधो नास्तीति षड्भिः सूत्रैः प्रतिपादयति—

श्लोकः-गलिते ममताहंते संसारभ्रमकारणे ॥
पराहंतां प्रविष्टस्य कुतो देहः कुतो रतिः ॥ २ ॥

व्याख्यानं—शरीरः प्रीतिश्च कुत इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ ज्या शिवयोग्याचे संसार आणि भ्रांति उत्पन्न करणारे मी आणि माझे हे दोन गुण नाहींसे झाले आहेत, व जो स्वतः परमेश्वरपणाच पावला आहे त्याला शरीर तरी कोठलें? आणि शरीरावर प्रेम तरी कोठलें?

केवले निष्प्रपंचौघे गंभीरे चिन्महोदधौ ॥
निमग्नमानसो योगी कथं देहं विचिंतयेत् ॥ ३ ॥

व्याख्यानं—निवृत्तचराचरप्रपंचसमूहवति अगाधे चित्समुद्रे निमग्नचित्तः शिवयोगी देहं केन प्रकारेण चिंतयेत्? न केनापीत्यर्थः ॥ ३ ॥

अर्थ-॥ ३ ॥ परमेश्वर हा निष्प्रपंच (निष्कल) आहे, गंभीर असून ज्ञानाचा महासमुद्र आहे. त्या परमेश्वरस्वरूपांत निमग्न झालेल्या शिवयोग्यास देहाचें स्मरण तरी कसें होईल? त्या शिवयोग्यास देहाचें स्मरण देखील होत नाहीं.

अपरिच्छेद्यमात्मानं चिदंबरमिति स्मरन् ॥
देहयोगेपि देहस्थैर्विकारैर्न विलिप्यते ॥ ४ ॥

व्याख्यानं—स्वात्मानं परिच्छेदरहितचिदाकाशं स्मरन् शिवयोगी देहे सत्यपि देहस्थेंद्रियविकारैर्न लिप्यत इत्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ जो शिवयोगी आत्मा छिन्नभिन्न होत नाहीं असें मानितो, आत्मा चिदंबर ज्ञानाकाश आहे असें मानितो, तो जरी देहधारी असला तरी त्याला देहाचे विकार होत नाहींत.

अखंडसंविदाकारमद्वितीयं सुखात्मकम् ॥
परमाकाशमात्मानं मन्वानः कुत्र मुह्यति ॥ ५ ॥

व्याख्यानं—स्वात्मानमखंडाद्वितीयचिदानंदाकारं परमाकाशं संतं मन्वानः "आकाशशरीरं ब्रह्मसत्यात्मप्राणारामं मनआनंदं शांतिसमृद्धं" इति छान्दोग्यश्रुत्यनुसारेण जानन् शिवयोगी कुत्र कस्मिन्नधिकरणे शरीर्यहमिति मुह्यति न कुत्रापि ब्रह्मातिरिक्तदेशाभावादित्यर्थः ॥ ५ ॥

अर्थ-॥ ५ ॥ परमात्मा परिपूर्ण आहे, ज्ञानस्वरूप आहे, एक आहे व सुखस्वरूप आहे. तो श्रेष्ठ आकाशाप्रमाणें सर्वत्र व्यापलेला आहे. असें मानणारा शिवयोगी कोठेंही फसणार नाहीं.

अवतरणिका—नन्वाकाशस्यापि घटाद्युपाधिना परिमितिर्दृश्यत इत्यत्राह—

श्लोकः—उपाधिविहिता भेदा दृश्यंते चैकवस्तुनि ॥
इति यस्य मतिः सोऽयं कथं देहमितो भवेत् ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ६ ॥

अर्थ-॥ ६ ॥ एका वस्तूचेच उपाधिमुळें अनेक भेद झालेले दिसतात अशी

ज्या शिवयोग्याची समजूत आहे, तो शिवयोगी आपण स्वतः एक अगदीं क्षुल्लक शरीर धारण करणारा प्राणी आहों, असें कधींही मानणार नाहीं; तो आपण परमेश्वर आहों असें समजेल.

अवतरणिका–अथ तत्कुत इत्यत्राह—

श्लोकः–भेदबुद्धिः समस्तानां परिच्छेदस्य कारणम् ॥

अभेदबुद्धौ जातायां परिच्छेदस्य का कथा ॥ ७ ॥

व्याख्यानं—घटाकाशदृष्टांतेन भेदस्तावदौपाधिक इति जाते अभेदबुद्धौ दृढायां वस्तुपरिच्छेदकारणीभूतभेदबुद्धेः शिथिलत्वात् परिच्छेदवार्ता न कापीत्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ सर्व प्राणिमात्रांची भेदबुद्धि (निरनिराळेपणाची बुद्धि) परिच्छेदास (सर्व वस्तु परस्परांहून भिन्न आहेत अशी समजूत करण्यास) कारण आहे. ती भेदबुद्धि नाहींशी होऊन ईश्वर सर्वत्र परिपूर्ण आहे अशी अभेद बुद्धि झाल्यावर परिच्छेदाचें नांव देखील घेण्याचें कारण नाहीं.

अवतरणिका–अथ तदद्वैतं प्रकटीकृत्य निर्देहागमस्थलं समापयति—

श्लोकः–शिवोहमिति यस्यास्ति भावना सर्वगामिनी ॥

तस्य देहेन संबंधः कथं स्यादमितात्मनः ॥ ८ ॥

व्याख्यानं—शिवोहमिति सर्वव्यापकीभूता शिवाद्वैतभावना यस्य शिवयोगिनोस्ति तस्य अपरिमितात्मनः परिच्छिन्नशरीरेण संबंधः कथं स्यात् न कथंचिदपीत्यर्थः ॥ ८ ॥

इति निर्देहागमस्थलम् ॥

अर्थ–॥ ८ ॥ मी स्वतः शंकर आहें, अशी भावना असणाऱ्या, व मी शंकर असल्यामुळें मला पाहिजे तेथें जातां येतां येतें, मीच शंकर असल्यामुळें सर्व त्रैलोक्याचें स्वरूप तेंच माझें स्वरूप आहे, असें समजणाऱ्या शिवयोग्याचा त्याच्या शरीराशीं काय संबंध आहे? शरीरावर त्याचें काडीमात्र ममत्व नसतें.

अथ निर्भावागमस्थलम्

अवतरणिका–अथ "नैवोर्ध्वं धारयेच्चित्तं न मध्यं नाप्यधः क्वचित् । अंतर्भावविनिर्मुक्तं सदा कुर्यान्निराश्रयं" इति देवीका-

लोत्तरवचनानुसारेण निर्देहागमसंपन्नस्य शिवयोगिनः निर्भावागमस्थलं निरूपयति—

श्लोकः–व्यतिरेकात्स्वरूपस्य भावांतरनिराकृतेः ॥
भावो विकारनिर्मुक्तो निर्भावागम उच्यते ॥ १ ॥

व्याख्यानं—स्वरूपस्य निर्देहस्वरूपस्य व्यतिरेकात् व्यतिरिक्तात् भावांतरनिराकृतेः अन्यभावनिराकरणात् विकारनिर्मुक्तः इंद्रियविकारविनिर्मुक्तः भावः मनोभावः निर्भावागम इत्युच्यत इत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ जो शिवयोगी आपण स्वतः परमेश्वराचें स्वरूप आहों असें मानितो, परमेश्वर वेगळा, जग वेगळें, मी वेगळा अशी भेदबुद्धि ज्याच्या मनांत मुळींच राहिली नाहीं, त्या शिवयोग्याच्या विकाररहित भावाला निर्भावागम असें ह्मणतात.

अवतरणिका–अथ तन्निर्भावलक्षणं पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः–अहंब्रह्मेति भावस्य वस्तुद्वयसमाश्रयः ॥
एकीभूतस्य चिद्व्योम्नि तद्भावो विनिश्चितः ॥ २ ॥

व्याख्यानं—अहं ब्रह्मेति भावस्याहमिति ब्रह्मेति वस्तुद्वयाक्षेपो भवेत् चिद्व्योम्नि एकीभूतस्य समरसीभूतस्य भावस्य तदभावः वस्तुद्वयाक्षेपाभावः विनिश्चितः विशेषेण निश्चित इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ मी ब्रह्मस्वरूप आहें, अशा भावाला वस्तुद्वयाक्षेप येतो तो चित्स्वरूपाकाशांत समरस झाल्यावर त्याला वस्तुद्वयाक्षेप रहात नाहीं असें निश्चित आहे.

अवतरणिका–अथाहंब्रह्मास्मीति भावस्य कोटिद्वयावगाहित्वेन विकल्पघटितत्वात् अहमित्येकभावस्य विकल्पशून्यत्वात् एकभावेन स्थितस्य मायिकजातिभेदादिवासना नास्तीत्याह—

श्लोकः–एकभावनिरूढस्य निष्कलंके चिदंबरे ॥
क्व जातिवासनायोगः क्व देहित्वं परिभ्रमः ॥ ३ ॥

व्याख्यानं—निरंजने चिदाकाशे तादात्म्येनारूढस्य शिवयोगिनः जातिवर्णाश्रमवासनासंबंधः क्व देहित्वं शरीरवत्वं क्व संसारचक्रपरिभ्रमणं च क्वेत्यर्थः॥ ३ ॥

अर्थ–॥ ३ ॥ निष्कलंक अशा चित्स्वरूप तेजांत एकपणा पावलेल्या (मि-

सळून गेलेल्या, तादात्म्य पावलेल्या), शिवयोग्याला जाति तरी कशाची ? इच्छा तरी कशाची ? मी शरीरी आहें अशी कल्पना तरी कशाची ? आणि भ्रांति तरी कशाची ?

अवतरणिका-नन्वेवं चेत् ध्यानादीनां का गतिरित्यत्राह—

श्लोकः-शून्ये चिदंबरे स्थाने दूरे वाङ्मानसाध्वनः ॥
विलीनात्मा महायोगी केन किंवापि भावयेत् ॥ ४ ॥

व्याख्यानं—"यतो वाचो निवर्तंते अप्राप्य मनसा सह" इति श्रुतेः वाङ्मनोमार्गागोचरे नीलपीताद्याकारशून्ये चिदाकाशस्थाने तादात्म्यापन्नः शिवयोगी केन प्रकारेण किंवा वस्तु भावयेत् केनापि प्रकारेण किमपि वस्तु भावनायोग्यं न संभवतीत्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ ज्या शून्य चिदंबर स्थानाची वाचेला आणि मनाला कल्पना देखील होत नाहीं, त्या चिदंबरस्थानांत तल्लीन झालेला श्रेष्ठ शिवयोगी कोणत्या वस्तूची कमतरता पडली ह्मणून अमुक वस्तु मला पाहिजे ह्मणून इच्छा करील ? (त्यास कोणत्याही गोष्टीची कमतरता नाहीं).

अवतरणिका-ननु विधिनिषेधवासनाशून्यत्वे निंदाप्राप्तिर्भवेदित्यत्राह—

श्लोकः-अविशुद्धे विशुद्धे वा स्थले दीप्तिर्यथा रवेः ॥
पतत्येवं सदाद्वैती सर्वत्र समवृत्तिमान् ॥ ५ ॥

व्याख्यानं—रवेः सूर्यस्य दीप्तिः प्रकाशः विशुद्धस्थले अविशुद्धस्थले च यथा पतति एवं शिवाद्वैती सदा सर्वत्र समवृत्तिमान् समानबुद्धिवृत्तिमान् सन् संचरतीत्यर्थः ॥ ५ ॥

अर्थ-॥ ५ ॥ एखादी जागा निर्मळ असो किंवा मलिन झालेली असो, दोहों ठिकाणीं सूर्याचा प्रकाश सारखा पडतो; त्याचप्रमाणें शिवाद्वैती मनुष्य सर्वठिकाणीं सारखेपणानें वागतो; असुक मनुष्य नीच आहे, अमुक मनुष्य श्रेष्ठ आहे, अशी कल्पना त्याचे मनांत मुळींच येत नाहीं.

अवतरणिका-कथं संचरतीत्यत्राह—

श्लोकः-न बिभेति जरामृत्योर्न क्षुधाया वशं व्रजेत् ॥
परिपूर्णनिजानंदं समास्वादन् महासुखी ॥ ६ ॥

व्याख्यानं—महासुखी भूत्वा संचरतीत्यर्थः शिष्टं स्पष्टं ॥ ६ ॥

इति निर्भावागमस्थलं ॥

C. N. Kalburgi

अर्थ-॥ ६॥ तो शिवयोगी म्हातारपणाला व मृत्यूला मुळींच जुमानीत नाहीं; त्याला कधीं भुकेची बाधा होत नाहीं; तो सर्वकाळ सुखी असून परिपूर्णपणानें आत्मानंदाचा अनुभव घेतो.

अथ नष्टागमस्थलम्

अवतरणिका-अथैवं निर्भावागमसंपन्नस्य भेदज्ञानाभावेन तन्नष्टागमस्थलं प्रकाशयति—

श्लोकः-भेदशून्ये महाबोधे ज्ञात्रादित्रयहीनकः ॥
ज्ञानस्य नष्टभावेन नष्टागम इहोच्यते ॥ १ ॥

व्याख्यानं—द्वैतशून्ये महाशिवज्ञाने ज्ञातृज्ञानज्ञेयात्मकत्रिपुटिमयप्रपंचशून्यत्वात् इह निर्भावागमसंपन्नशिवयोगिविषये ज्ञानस्य भेदज्ञानस्य नष्टभावेन नष्टत्वेन नष्टागम इत्युच्यत इत्यर्थः ॥ १ ॥

अर्थ—॥ १ ॥ भेदभावना नाहींशी झालेल्या श्रेष्ठ अशा शिवतत्वबोधांत ज्याची ज्ञातृ, ज्ञेय आणि ज्ञान ही त्रिपुटी (जाणणारा, जाणावयाचें आणि जाणलेलें हे तीन गुण) लय पावले आहेत; त्या शिवयोग्याला भेदज्ञानाचा नष्टपणा झाला असल्यामुळें (त्याला जाणावयाचें असें कांहींच उरलें नसल्यामुळें) नष्टागम असें ह्मणतात.

अवतरणिका-ननु शिवयोगिनः कथं त्रिपुटिमयप्रपंचशून्यत्वमित्यत्राह—

श्लोकः-अद्वैतवासनाविष्टचेतसां परयोगिनाम् ॥
पश्यतामंतरात्मानं ज्ञातृत्वं कथमन्यथा ॥ २ ॥

व्याख्यानं—अन्यथा ज्ञातृत्वं स्वातिरिक्तपदार्थांतरज्ञातृत्वमित्यर्थः अंतः स्वहृदय इत्यर्थः शिष्टं स्पष्टं ॥ २ ॥

अर्थ-॥ २ ॥ शिवाद्वैतवासनांत ज्यांचीं मनें गढून गेलीं आहेत अशा, व आपल्याच हृदयांत परमेश्वर आहे असें मानणाऱ्या परकाययोग्यांस दुसऱ्यांपासून समजावून घ्यावयाचें असें काय आहे? त्यांस सर्व समजतेंच आहे.

अवतरणिका-ननु तस्यान्यथा ज्ञातृत्वाभावे किं प्रकाशत इत्यत्राह—

श्लोकः-अकर्त्ताहमवेत्ताहमदेहोऽहं निरंजनः ॥
इति चिंतयतस्साक्षात्संविदेव प्रकाशते ॥ ३ ॥

व्याख्यानं—एवं चिंतयतः शिवयोगिनः ज्ञातृज्ञानज्ञेयविहीनोपि "सदाज्ञानं" इति श्रुतेः त्रिपुटिमयप्रपंचनाशं कृत्वा विशिष्टशिवाद्वैतज्ञानमेव प्रकाशते अयमेव नष्टागमप्रकाश इति भावः ॥ ३ ॥

अर्थ-॥ ३ ॥ मी कर्ता नव्हें, मी जाणता नव्हें, मला शरीर नाहीं, मी निरंजन आहें, ह्याप्रमाणें नेहमीं शिवाद्वैताचा विचार करणाऱ्यास प्रत्यक्ष ज्ञानच आपोआप प्राप्त होतें.

अवतरणिका-अथ तस्य ज्ञेयांतरं च नास्त्येवेत्याह—

श्लोकः-निरस्तभेदजल्पस्य निरीहस्य प्रशाम्यतः ॥
स्वे महिम्नि विलीनस्य किमन्यज्ज्ञेयमुच्यते ॥ ४ ॥

व्याख्यानं—निरस्तभेदजल्पस्य 'द्वितीयाद्भयमेव पश्यंति'इति बृहदारण्यकश्रुतेः युक्त्या च निराकृतद्वैतवाक्यस्य प्रशाम्यतः रागद्वेषरहितस्य स्वे महिम्नि स्वविमर्शे विलीनस्य तदेकनिष्ठस्य निरीहस्य विरक्तस्य शिवयोगिनः ज्ञेयं ज्ञातुं योग्यं अन्यत्किं न किमपीत्यर्थः ॥ नन्वत्र युक्तिः किमिति चेत् उच्यते भेदो नाम किमन्योन्याभावो वा वैधर्म्यं वा वस्तुस्वरूपं वेति त्रेधा विकल्पः आद्ये तत्रान्यत्वं भावस्वभावो वा भेदनिबंधनः कश्चिदुपाधिर्वेति द्विधा विकल्पः तत्र नाद्यः भावस्याभावत्वप्रसंगात् अन्यत्वस्य भावस्वभावत्वात् भावादन्यो भाव इति प्रसिद्धत्वात् ननु भावानां बाहुल्यात् भावस्य भावांतरान्यत्वं स्वभाव इति चेत् अस्तु तस्य विशेषघटितत्वात् इह तु भेदसामान्यलक्षणप्रविष्टान्यत्वस्य प्रश्नविषयत्वेन न तदुत्तरं भवितुमर्हति तस्य भेदसिद्ध्यनंतरभावित्वात् किंच भावस्य भावांतरान्यत्वं स्वभाव इति नियमस्तत्तद्भावकृतो वा तद्व्यतिरिक्तमहापुरुषकृतो वा नाद्यः घटादिभावस्य जडत्वेन कर्तृत्वाभावात् न द्वितीयः कल्पनायाः प्रागनन्यत्वेनांतरालिकतयान्यत्वस्य तत्स्वभावत्वासंभवात् ननु न केनापि कृतः किंतु स्वतःसिद्ध इति चेत् तर्हि स्वप्रकाशोपि भवेत् ब्रह्मवत्स्वतः सिद्धत्वात् ननु ब्रह्मापि मानांतरसिद्धमिति न स्वतःसिद्धमिति वाच्यं । नित्यत्वेन कारकव्यापारासंभवात् स्वप्रकाशत्वेन ज्ञापकव्यापारासंभवात् अन्यथा जडत्वप्रसंगात् नाप्यन्यत्वं भेदनिबंधनः कश्चिदुपाधिः आत्माश्रयादिदोषप्रसंगात् नापि द्वितीयः घटे पटत्वं नास्ति पटे घटत्वं नास्ति वैधर्म्यं एवंविधनिश्चयस्य घटपटभेदसिद्ध्यनंतरभावित्वात् नच घटपटयोस्तंतुमयत्वमृण्मयत्वाभ्यां भेदसिद्ध एवेति वाच्यं घटएव मृण्मयत्वं पट एव तंतुमयत्वमित्यसाधारणप्रतीतेर्घटपटभेदसिद्ध्यधीनत्वात् तस्या अद्यापि साध्यकोटिप्रविष्टत्वात् । किंच तंतुमयत्वमृण्मयत्वयोर्भेदस्तत्र तदवयवभेदादिति परमाणुपर्यालोचनायां निरवयवत्वेन भेदाग्रहात् मूलक्षयकारिण्यनवस्था स्यादिति नापि तृतीयः वस्तुस्वरूपं हि वस्त्वंतरस्वरूपाद्ननुगाम्यंगीकरणीयं अन्यथा स्वरूपसांकर्यापत्तेः एवं चेदं रजतमि-

त्यत्र शुक्तिरेव रजताकारेण निश्चीयत इति भ्रांतिज्ञानोच्छेदप्रसंगात् दूरत्वादिदोष वशात्तथानिश्चीयत इति चेत् तर्हि इंगलादिकमपि रजतत्वेन कुतो न निश्चीयते नच विशेषदर्शनसामग्रीप्रतिबंधिकेति वाच्यं शुक्तिकायामपि विशेषदर्शनसामग्रीसत्वे नानारोपप्रसंगात् अविशेषदर्शनसामग्रीप्राबल्यादारोपः संभवतीति चेन्न वस्त्वंतरे वस्त्वंतरस्वरूपमनुप्रविष्टमित्यंगीकरणीयत्वेनाननुप्रविष्टमिति वक्तुमशक्यत्वेन स्वरूपसांकर्यापत्तेरनिवार्यत्वेन भेदवादोच्छेदप्रसंगात् पूर्वोक्तदोषप्रसंगाच्च किंच वस्तुनि भासमानो भेदः तत्तद्वस्तुस्वरूपाभिन्नो वा यदि भिन्नो वा स्यात् नाद्यः अत्यंतविरोधात् भेदस्याभेदतासंभवात् न द्वितीयः सोपि भेदः कीदृशइत्युपर्युपरिविचार्यमाण अनवस्थामेवोपस्थापयतीति विश्रांत्यभावात् नाप्यभेदात्यंताभावो भेदः आत्माश्रयप्रसंगात् नास्त्यैक्यप्रतियोगी एकत्वस्य प्रतियोग्यभावात् द्वित्वादीनां तन्मूलकत्वात् नापि विभागः तस्य संयोगपूर्वकत्वेन पूर्वापरं दिशोः पूर्वपश्चिमाचलयोश्च कदापि संयोगाभावेन भेदाभावप्रसंगात् तस्माद्वत्यंतराभेदेन भेदव्यवहारसिद्ध्यर्थं सकलसामरस्यात्मनो महेश्वरस्येच्छावशात् सागरतरंगन्यायेनाभेदपर्यवसायित्वेन कल्पितविभागो भेद इत्यंगीकरणीयत्वेनाप्यभेदएव सिध्यतीति शिवाद्वैतसिद्धांतवादिनां युक्तिरीदृशीति विचक्षणैर्विमर्शनीयेति ॥ ४ ॥

अर्थ—॥ ४ ॥ ज्याची भेदबुद्धीची बडबड नाहींशी झाली आहे, ज्याला कोणतीही इच्छा राहिलेली नाहीं, ज्याचें मन शांत झालें आहे, आत्मस्वरूपाच्या महिम्यांत जो लीन झालेला आहे त्याला आणखी दुसरें जाणावयाचें असें काय राहिलें आहे? त्याला सर्व समजलेंच आहे.

अवतरणिका—अथोक्तसूत्रत्रयार्थमेव विशेषयति—

श्लोकः—एकीभूते निजाकारे संविदा निष्प्रपंचया ॥
केन किं वेदनीयं तद्वेत्ता कः परिभाष्यते ॥ ५ ॥

व्याख्यानं—निजाकारे स्वस्वरूपे निष्प्रपंचया संविदा शिवाद्वैतज्ञानेन एकीभूते सति सामरस्ये सति केन किं वस्तु वेदनीयं ज्ञेयं स्यात् तद्वेत्ता ज्ञानेन ज्ञेयवेत्ता च क इति परिभाष्यते "नातः परं वेदितव्यं हि किंचित्" इति श्रुतेः। वेदितव्यं न किंच नेत्यागमोक्तेश्चान्योन्याभावनिबंधनभेदघटितमायिकत्रिपुटीमयप्रपंचदर्शनं शिवयोगिनां नास्तीत्यर्थः ॥ ५ ॥

अर्थ—॥ ५ ॥ प्रपंचरहित (निष्कल) अशा आत्मज्ञानामुळें एकस्वरूपाप्रमाणें दिसणाऱ्या आत्मस्वरूपांत जाणणाऱ्यानें जाणावें तरी काय? व जाणणारा तरी कोणास ह्मणावें? सर्व शिवस्वरूपच आहे.

अवतरणिका–तर्हि कीदृशं प्रपंचदर्शनं स्यादित्यत्र वदन् नष्टागमस्थलं समापयति—

श्लोकः–महासत्ता महासंविद्विश्वरूपा प्रकाशते ॥
तद्विना नास्ति वस्त्वेकं भेदबुद्धिं विमुंचते ॥ ६ ॥

व्याख्यानं—महासत्ता गगनकुसुममित्यादौ अर्थवत्पदयोरेव संमेलनरूपसंयोगात् तदुपरि विभक्तियोगाच्चार्थवत्वात् गगनकुसुममंगीकरणीयमिति सदसत्सकलवस्तुव्यापकत्वान्महासत्तेत्युच्यते हृदयोल्लेखं विना गगनकुसुममिति व्यवहारासंभवान्महासंविदित्युच्यते एवं स्वशिरच्छायानुल्लंघनमिव सदसद्विश्वव्यापकीभूतं ब्रह्मचैतन्यमेव जगद्रूपेण भासते न तद्व्यतिरिक्तं किंचिदिति भेदबुद्धिं विमुंचतः शिवयोगिनः महासत्ता स्फुरत्ताकचैतन्यं विना एकं वस्तु अन्यद्वस्तु नास्ति सागरतरंगन्यायेन तद्बुद्धेरभेदविश्रांतत्वादिति ॥ ६ ॥

इति नष्टागमस्थलम् ॥

अर्थ–॥ ६ ॥ सत्ता मोठी आहे, ज्ञान मोठें आहे, सर्वजगाचा त्या ज्ञानांत आणि सत्तेंत समावेश होतो. (सत्ता आणि संवित् विश्वाच्या रूपानें दिसून येते). त्या सत्तेखेरीज आणि संविदेखेरीज एक देखील वस्तु नाहीं, असें मनांत आणिलें ह्मणजे भेदबुद्धि नाहींशी होते.

C. N. Kalburgi

अथ आदिप्रसादिस्थलम् ॥

अवतरणिका–अथ "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं महादेवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" इति श्वेताश्वतरमंत्रानुसारेण नष्टागमसंपन्नशिवयोग्येव सर्वादिभूतशिवप्रसादवानित्यादि प्रसादीत्युच्यत इति तदीयस्थलं प्रतिपादयति—

श्लोकः–सर्वाधिष्ठातृकश्शंभुरादिस्तस्य प्रसादतः ॥
आदिप्रसादीत्युक्तोऽयं निर्विकारपदे स्थितः ॥ १ ॥

व्याख्यानं—विश्वाधारभूमित्वात्तन्नियामकत्वाच्छंभुरादिः सृष्ट्यादिपंचकृत्यमूलकारणं तस्य सर्वादिभूतस्य शंभोः प्रसादतः निर्विकारपदे विकाररहितनष्टागमस्थले स्थितोऽयं शिवयोगी आदिप्रसादी आदिप्रसादवानित्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ सर्वप्राणिमात्रांत शंकर राहिलेला आहे, तो सर्वांच्या अगोदरपासून आहे, त्याच्या कृपेमुळें कृतार्थ झालेल्या शिवयोग्यास आदिप्रसादी असें

म्हणतात. तो आदिप्रसादी ज्याला कोणत्याही प्रकारची उपाधि नाहीं अशा शिवानंदांत पूर्णपणें गढून गेलेला असतो.

अवतरणिका—अथ तस्य महत्वं चतुर्भिः सूत्रैः प्रतिपादयति—

श्लोकः—अनेकजन्मशुद्धस्य निरहंकारभाविनः ॥
अप्रपंचस्यादिदेवः प्रसीदति विमुक्तये ॥ २ ॥

व्याख्यानं—अनेकजन्मभिः शुद्धात्मनः परिच्छिन्नदेहाद्यभिमानशून्यस्य अप्रपंचस्य प्रापंचिकभेदरहितस्य शिवयोगिनः आदिदेवः सर्वादिदेवः शिवः विमुक्तये परमोक्षाय प्रसीदति प्रसन्नो भवतीत्यर्थः ॥ २ ॥

अर्थ—॥ २ ॥ अनेक जन्मांत ज्यानें पुण्य संपादन केलें आहे, ज्याला अभिमान मुळींच राहिलेला नाहीं, ज्याला प्रपंचही राहिलेला नाहीं, अशा त्या आदिप्रसाद्यास मोक्षप्राप्ति व्हावयास आदिदेव (शंकर) प्रसन्न होतो. (शंकराच्या कृपेनें त्यास मोक्षप्राप्ति होते.)

श्लोकः—शिवप्रसादसंपत्त्या शिवभावमुपेयुषि ॥
शिवादन्यजगज्जालं दृश्यते नच दृश्यते ॥ ३ ॥

व्याख्यानं—शिवप्रसादप्राप्त्या शिवत्वमुपेयुषि विषये जगज्जालं जगत्समूहं शिवादन्यदिति दृश्यते इदंत्वेन दृश्यं सत् न च दृश्यते भेदस्य निराकृतत्वात् सागरतरंगन्यायेनाभेदेन दृश्यत इत्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ शंकराच्या कृपारूप संपत्तीनें शिवस्वरूप झालेल्या शिवयोग्यास शिवाखेरीज दुसरा जगाचा पसारा जरी दिसतो, तरी तें दिसणें नव्हेच; तें एक शिवस्वरूपच होय.

श्लोकः—शंभोः शिवप्रसादेन संसारच्छेदकारिणा ॥
मोहग्रंथिं विनिर्भिद्य मुक्तिं यांति विवेकिनः ॥ ४ ॥

व्याख्यानं—नित्यानित्यविवेकिनः संसारच्छेदकारिणा शिवप्रसादेनैव अज्ञानग्रंथिं विदार्य परमोक्षं यांतीत्यर्थः ॥ ४ ॥

अर्थ—॥ ४ ॥ शंकराची कृपा झाली म्हणजे संसारदुःखाचा नाश होतो. ज्ञानीलोक शिवकृपेनें अज्ञानरूपग्रंथीचा (गांठीचा) नाश करून मोक्षास जातात.

अवतरणिका—ननु शिवप्रसादेन विना मुक्तिर्नास्ति वेत्यत्राह—

श्लोकः—विनाप्रसादमीशस्य संसारो न निवर्तते ॥
विना सूर्योदयं लोके कुतः स्यात्तमसो लयः ॥ ५ ॥

व्याख्यानं—स्पष्टं ॥ ५ ॥

अर्थ-॥ ५ ॥ शंकराच्या कृपेखेरीज संसार दूर होत नाहीं; सूर्योदय झाल्याशिवाय जगांतील अंधार नाहींसा कसा होईल? कधींही नाहींसा होणार नाहीं.

अवतरणिका-अथ शिवस्य सर्वात्मस्वपक्षपातेन कृपाप्रसादं संसूच्यादिप्रसादिस्थलं समा[illegible]यति—

श्लोकः-सर्वानुग्राहकश्शंभुः केवलं कृपया प्रभुः ॥
मोचयेत्सकलान् जंतून्न किंचिदिह कारणम् ॥ ६ ॥

व्याख्यानं—प्रभुः स्वतंत्रः सर्वानुग्राहकः सर्वहितोपि शंभुः शिवः केवलं कृपयैव सकलान् जंतून् प्राणिनः मोचयेत् पाशमुक्तान् कुर्यात् इह पाशमोचनविषये शंभोः किंचित्कारणं च नास्ति सर्वानुग्राहकत्वस्य तत्स्वभावत्वादिति ॥ ६ ॥

॥ इत्यादिप्रसादिस्थलम् ॥

अर्थ-॥ ६ ॥ शंकर हा सर्व प्राणिमात्रांवर दया करणारा आहे. तो शंकर फक्त कृपेमुळें सर्वप्राणिमात्रांस पाशमुक्त करितो. ह्या खेरीज दुसरें कांहीं कारण नाहीं.

॥ अथ अंत्यप्रसादिस्थलम् ॥

अवतरणिका-अथ "अणोरणीयान्महतोमहीयानात्मास्य जंतोर्निहितो गुहायाम् तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं" इति कठवल्लीश्रुत्युक्तप्रकारेण तदादिप्रसाद्येव सर्वाश्रयः सन् अंत्यस्यशिवस्यानुभवप्रसादवानित्यंत्यप्रसादिस्थलं निरूपयति—

श्लोकः-लयः सर्वपदार्थानामंत्य इत्युच्यते बुधैः ॥
प्रसादोनुभवस्तस्य तद्वानंत्यप्रसादवान् ॥ १ ॥

व्याख्यानं—सर्वपदार्थानां भूम्यादिशिवांतपदार्थानां लयः लयाश्रयः परशिवएवांत्यः सर्वांत्य इति बुधैरुच्यते तस्य सर्वांतस्य शिवस्य अनुभवः साक्षात्कार एव प्रसादः तद्वान् तदनुभवी आदिप्रसाद्येवांत्यप्रसादवानित्युच्यत इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ सर्वपदार्थांचा लय होणें ह्यास विद्वान्लोक अंत्य असें ह्मणतात. त्याचप्रमाणें शिवयोग्याला शिवप्रसादाचा अनुभव येणें हें शेवटचें काम आहे. ह्मणून तसा अनुभव ज्याला आला आहे, त्यास अंत्यप्रसादी असें ह्मणतात.

अवतरणिका–अथ सर्वपदार्थलयप्रकारं सूत्रद्वयेन कथयति–

श्लोकः–देवतिर्यङ्मनुष्यादिव्यवहारविकल्पना ॥

माया कृता परे तत्वे तल्लये तत्क्षयो भवेत् ॥ २ ॥

व्याख्यानं—तल्लये मायालय इत्यर्थः शिष्टं स्पष्टं ॥ २ ॥

अर्थ–॥ २ ॥देव, पशु, पक्षी मनुष्य वगैरे अनेकप्रकारच्या जातींची कल्पना ही सर्व मायेमुळें उत्पन्न होते, (ती मायिक आहे), श्रेष्ठप्रकारचें शिवतत्व प्रकट झालें असतां व मायेचा लय झाल्यावर, वर सांगितलेली भेदबुद्धीची कल्पना एकाक्षणांत नाहींशी होते.

अवतरणिका–अथ कथं मायाक्षय इत्यत्राह—

श्लोकः–साक्षात्कृते परे तत्वे सच्चिदानंदलक्षणे ॥

कपदार्थपरिज्ञानं कुतो ज्ञातृत्वसंभवः ॥ ३ ॥

व्याख्यानं—सच्चिदानंदस्वरूपे परब्रह्मणि प्रत्यक्षीकृते सति मायाया निवृत्तत्वात् तत्कल्पितपदार्थपरिज्ञानं क ज्ञातृत्वसंभवः ज्ञेयज्ञानातिरिक्तज्ञातृत्वस्यआविर्भावश्च क ज्ञेयाद्यपेक्षया ज्ञातृत्वस्य कल्पितत्वादिति भावः ॥ ३ ॥

अर्थ–॥ ३ ॥ शिवतत्व श्रेष्ठ असून सत् चित् आणि आनंदस्वरूप आहे. तें प्रकट झाल्यावर पदार्थाचें ज्ञान तरी कोठलें ? आणि जाणणारा तरी कोठला ?

अवतरणिका—अत्र दृष्टांतमाह—

श्लोकः–सुषुप्तस्य यथा वस्तु न किंचिदपि भासते ॥

तथा मुक्तस्य जीवस्य न किंचिद्वस्तु दृश्यते ॥ ४ ॥

व्याख्यानं—मुक्तस्य जीवस्य जीवन्मुक्तस्येत्यर्थः शिष्टं स्पष्टं ॥ ४ ॥

अर्थ–॥ ४ ॥ जसा एखादा मनुष्य गाढ झोंपी गेल्यावर त्याला कांहीएक वस्तु दिसत नाहीं; त्याचप्रमाणें मुक्त झालेल्या जीवास कांहीएक वस्तु दिसत नाहीं. त्याचा भेदभाव समूळ नाहींसा होऊन त्याला सर्वत्र शिवस्वरूपच दिसूं लागतें.

अवतरणिका–अत्र जीवन्मुक्तस्य पदार्थदर्शनमस्ति नाशंकनीयम् शिवाभेदेनैव दर्शनात्प्राकृतत्वेन किमपि न दृश्यत इति अथ जीवन्मुक्तस्वरूपं कीदृशमित्यत्र सूत्रद्वयेन कथयति—

श्लोकः–यथाकाशमविच्छिन्नं निर्विकारं स्वरूपतः ॥

तथा मुक्तस्य जीवस्य स्वरूपमवशिष्यते ॥ ५ ॥

व्याख्यानं—अवशिष्यते प्रकाशते इत्यर्थः शिष्टं स्पष्टं ॥ ५ ॥

अर्थ-॥ ५ ॥ जसें आकाश सर्वत्र सारखें पसरलेलें आहे कोठेंही छिन्नभिन्न झालेलें नाहीं, त्याच्या रूपास कोणतांही विकार नाहीं; तसेंच मुक्त झालेल्या जीवाचें आत्मस्वरूपच काय तें एक कायम असतें. त्याखेरीज भेदबुद्धि त्याच्या मनांत नसते; सर्व जग शिवमय आहे असें त्यास वाटतें.

अवतरणिका-अथ स जीवन्मुक्तः किं जानन् किं कुर्वन् कथं तिष्ठतीत्यत्राह—

श्लोकः-न किंचिदपि मुक्तस्य दृश्यं कर्तव्यमेव वा ॥
सुखस्फूर्तिस्वरूपेण निश्चला स्थितिरुच्यते ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ६ ॥

अर्थ-॥ ६ ॥ मुक्त झालेल्यास कांहींएक पाहावयाचें राहिलें नाहीं, किंवा करावयाचें राहिलें नाहीं, तो नेहमीं आत्मानंदांत सुखानें राहतो व त्याचें आत्मज्ञान वरचेवर ज्यास्त वाढतें, त्याचें मन स्थिर असतें. या त्याच्या स्थितीला निश्चलस्थिति ह्मणतात.

अवतरणिका-अथ जीवन्मुक्तस्य दृश्यं कर्तव्यं कुतो नास्तीत्यत्र वदन्नंत्यप्रसादिस्थलं समापयति—

श्लोकः-शिवाद्वैतपरिज्ञानशिथिलाशेषवस्तुनः ॥
केवलं संविदुल्लासदर्शिनः केन को भवेत् ॥ ७ ॥

व्याख्यानं—शिवाद्वैतपरिज्ञानेन निवृत्तसकलभेदवस्तुनः अतएव केवलचिद्विलासं पश्यतः शिवयोगिनः ज्ञानेंद्रियव्यापारेण कर्मेंद्रियव्यापारेण वा केनापि किं भवेत् किं प्रयोजनं स्यात् न किंचिदिति अनयोराद्यंतप्रसादयोरुपक्रमोपसंहारन्यायेनैक्यं विमर्शनीयं ॥ ७ ॥

॥ इत्यंत्यप्रसादिस्थलं ॥

अर्थ-॥ ७ ॥ शिवाच्या अद्वैतज्ञानामुळें ज्याला इतर सर्व वस्तु तुच्छ वाटतात, फक्त ज्ञानाचा मात्र विकास ज्याला मनापासून आवडतो, त्या शिवयोग्याला कोणाबरोबर काय करावयाचें आहे ? त्याला कोणाचीही जरूरी नाहीं; त्याला सर्व गोष्टींची अनुकूलता आहे.

॥ अथ सेव्यप्रसादिस्थलम् ॥

अवतरणिका—अथ "अंतः शरीर एवायं बाह्य एव न संस्थितः ॥ महानंदप्रसादोऽयं सर्वत्रैवावभासते" इति सर्वज्ञानो-

त्तरवचनानुसारेण सेव्यशिवगुरुप्रसादसंपन्नः अंत्यप्रसाद्येव सेव्यप्रसादीति सूत्रत्रयेण कथयति—

श्लोकः–सेव्यो गुरुः समस्तानां शिव एव न संशयः ॥
प्रसादोस्य परानंदप्रकाशः परिकीर्त्यते ॥ १ ॥

व्याख्यानं—समस्तानां सेव्यः श्रीगुरुः शिव एवात्र संदेहो नास्ति अस्य प्रसादः श्रीगुरुरूपशिवप्रसाद एव परानंदप्रकाश इति कीर्त्यते ॥ १ ॥

अर्थ–॥ १ ॥ सर्व प्राणिमात्रांचा शंकर हा गुरु असून तो सेवा करण्यास योग्य आहे ह्यांत शंका नाहीं. त्याचा प्रसाद (कृपा) झाला ह्मणजे त्यास परानंदाचा प्रकाश असें ह्मणतात. (त्याचा प्रसाद झाल्यावर शिवयोगी शिवानंदांत निमग्न होतो).

श्लोकः–सेव्यो गुरुः स्मृतो ह्यस्य प्रसादोऽनुभवो मतः
तदेकावेशरूपेण तद्वान् सेव्यप्रसादवान् ॥ २ ॥

व्याख्यानं—गुरुः शिवस्वरूपश्रीगुरुरेव सेव्य इति स्मृतः अस्य शिवरूपस्य श्रीगुरोः अनुभवः उपदेशानुभव एव प्रसाद इति संमतः तदेकावेशरूपेण तयोर्गुरुप्रसादयोरेकीभावेन तद्वान् तत्प्रसादवानंत्यप्रसाद्येव सेव्यप्रसादवान् सेव्यप्रसादीति हि प्रसिद्ध इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ गुरूस सेव्य (सेवा करण्यास योग्य) असें ह्मणतात, व त्याच्या प्रसादास अनुभव असें ह्मणतात, ते दोन्ही शब्दार्थ एकत्र केले ह्मणजे ते गुण एकाच्याच अंगीं असणाऱ्या शिवयोग्यास सेव्यप्रसादी असें ह्मणावें.

श्लोकः–गुरुर्देवः परं तत्वं परतत्वं गुरुः स्मृतः ॥
तदेकत्वानुभावेन न किंचिदवशिष्यते ॥ ३ ॥

व्याख्यानं—गुरुशिवयोः शक्तिशक्तिमद्भावेन तयोरैक्यानुसंधानेन ज्ञातव्यं न किंचिदवशिष्यते सर्वस्यापि विश्वस्य शिवशक्तिमयत्वादिति ॥ ३ ॥

अर्थ–॥ ३ ॥ गुरुवर्य हाच श्रेष्ठ शिवतत्व आहे, व शिवतत्व हें श्रेष्ठ गुरु आहे; हीं दोन्ही एके ठिकाणीं मिळविल्यावर मग कांहींच बाकी राहत नाहीं. (गुरूपासून शिवतत्वांची माहिती होते त्यामुळें गुरु अनुकूल असला ह्मणजे शिवतत्व आपाप समजल्यासारखेंच आहे).

अवतरणिका–अथ परमानंदवतस्सेव्यप्रसादिनः क्वापि प्रीतिर्नास्तीति सूत्रत्रयेण कथयति—

श्लोकः–अपरिच्छेद्यमात्मस्थमवाङ्मनसगोचरम् ॥
आनंदं पश्यतां पुंसां रतिरन्यत्र का भवेत् ॥ ४ ॥

व्याख्यानं—परिच्छेदरहितं वाङ्मानसयोरगोचरं स्वस्वरूपं परमानंदं अपरोक्षेण पश्यतां शिवयोगिनां अन्यत्र विषयेषु रतिः अभिलाषः न कापि स्यादित्यर्थः॥४॥

अर्थ-॥ ४ ॥ शिवज्ञानानंद हा अखंड आहे, त्याचे भाग होत नाहींत, तो आनंद आपल्या मनांत राहतो, तो वाचा आणि मन ह्यांस समजण्यासारखा नाहीं. तो शिवज्ञानानंद अनुभवणाऱ्या मनुष्यांस (शिवयोग्यांस) दुसऱ्या कोणत्या वस्तूची आवड असणार आहे ? त्यांस दुसऱ्या कोणत्याही वस्तूची आवड असत नाहीं.

श्लोकः-ज्ञानामृतेन तृप्तस्य किमन्यैर्भोज्यवस्तुभिः ॥
ज्ञानादेव परानंदं प्रकाशयति सच्छिवः ॥ ५ ॥

व्याख्यानं—ज्ञानामृतेन संतुष्टस्य शिवयोगिनः अन्यैः चित्पीयूषव्यतिरिक्तैः भोज्यपदार्थैः किं ? न किंचित् सच्छिवः अग्नेरुष्णत्वप्रकाशकत्वादय इव शिवस्य सच्चिदानंदाः स्वभावाः तादृशः शिवः ज्ञानादेव निजज्ञानादेव परानंदं स्वस्वभावभूतनित्यानंदं प्रकाशयतीति ॥ ५ ॥

अर्थ-॥ ५ ॥ शिवज्ञानानंदानें तृप्त झालेल्या मनुष्यास दुसऱ्या उपभोगाच्या वस्तु घेऊन काय करावयाचें आहे ? कांहींएक प्रयोजन नाहीं, कां तर ज्ञानामुळेंच त्याला श्रेष्ठरीतीचा आनंद असलेल्या शिवाचा बोध होतो.

अवतरणिका-अथ तदेव विशदयति—

श्लोकः-मुक्तिरेव परा तृप्तिः सच्चिदानंदलक्षणा ॥
नित्यतृप्तस्य मुक्तस्य किमन्यैर्भोगसाधनैः ॥ ६ ॥

व्याख्यानं—नित्यतृप्तस्य सर्वज्ञताद्युपलक्षितनित्यतृप्तिमतः मुक्तस्य परममुक्तिमतः शिवयोगिन इत्यर्थः शिष्टं स्पष्टम् ॥ ६ ॥

अर्थ-॥ ६ ॥ मुक्ति हीच उत्तमप्रकारची तृप्ति आहे, तीच खरी आहे, ज्ञानस्वरूप असून आनंदस्वरूप आहे. नित्य तृप्त असणाऱ्या मुक्त शिवयोग्याला दुसरे उपभोगाचे पदार्थ कशाला पाहिजेत ? मुळींच नकोत.

अवतरणिका-अथ तस्य परमुक्तस्यांतर्बहिः किमपि कर्म नास्तीति निरूपयति—

श्लोकः-न बाह्यकर्म तस्यास्ति न चांतर्नैव कुत्रचित् ॥
शिवैक्यज्ञानरूढस्य देहभ्रांतिं विमुंचतः ॥ ७ ॥

व्याख्यानं—स्वरूपहानिवृद्धिव्यतिरेकेण सजातीयसमानसमरसभावेन शिवैक्यज्ञानमारुह्य देहभ्रांतिविमुंचतस्तस्य सेव्यप्रसादिनः बहिरंगविधीयमानपूजाकर्म नास्ति अंतश्चांतरंगे विधीयमानध्यानादिकर्म नास्ति कुत्रचित् क्वापि बिंदुतिरोभावमलमायाद्युपलक्षितकर्मपाशोपि नास्तीत्यर्थः ॥ ७ ॥

अर्थ—॥ ७ ॥ त्या मुक्त झालेल्या शिवयोग्याला बाह्यकर्म (पूजा वगैरे) करावें लागत नाहीं, व अन्तर्कर्म (जप तप ध्यान वगैरे) कांहींएक करावें लागत नाहीं; कां तर शिवतादात्म्य झाल्याचें ज्ञान त्याच्या मनांत पूर्णपणानें ठसलें असल्यामुळें, हें शरीर माझें अशी मोहाची कल्पना देखील त्याच्या मनांत राहिलेली नसते.

अवतरणिका—अथ प्रसादिस्थलं समापयति—

श्लोकः—न कर्मबंधे न तपोविशेषे न मंत्रयोगाभ्यसने तथैव ॥
ध्याने न बोधे च तथात्मतत्वे मनः प्रवृत्तिः परयोगभाजाम्॥८॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण विरचिते वीरशैवधर्मनिर्णये सिद्धान्तशिखामणौ प्राणलिंगिस्थलविषयनवविधलिंगप्रसंगो नामाष्टादशीयः परिच्छेदः समाप्तः ॥

व्याख्यानं—परयोगभाजां सर्वोत्कृष्टपरशिवयोगभाजां सेव्यप्रसादिनां मनःप्रवृत्तिः चित्तवृत्तिः मंत्रयोगाभ्यसने अजपगायत्रीरूपसोहंमंत्रयोगाभ्यासे न नास्तीत्यर्थः तथैव कर्मबंधे षट्कर्मबंधत्रयरूपहठयोगेपि न तपोविशेषे योगानां विशिष्टराजयोगेपि न ध्याने अनाहतब्रह्मध्यानरूपलययोगेपि न किंतु तदात्मतत्वे तद्योगचतुष्टयचैतन्यस्वरूपे बोधे स्वस्वरूपज्ञाने मनःप्रवृत्तिः स्यादित्यर्थः अयं भावः देशिकोपदेशेन अपरदेहपाणिपादगुह्यानि प्रथमं संशोध्य बंधयित्वा तदनंतरं परापश्यंतीमध्यमावैखरीस्वरूपरुद्रविष्णुब्रह्मेंद्रादिदैवतलयराजहठमंत्रयोगक्रमेण पूर्वकायस्य कर्णाक्षिनासारसनासु संयोज्यानंतरं पूर्वापरकायकीलकभूतबिंदुमायाकार्यरूपवाक्त्वचौ निश्चलीकृत्य सर्वयोगज्ञानजननक्षेत्रभूताविमुक्तक्षेत्रे परब्रह्मपरशिवपरलिंगापरपर्यायनामभिः संसेव्य स्वस्वरूपसेवितसेव्यप्रसादीत्यर्थः ॥ एतल्लिंगत्रयं प्राणलिंगिन अंगत्रयस्य क्रमेण संबंधयेदिति सेव्यप्रसादिस्थलम् ॥ ८ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां प्राणलिंगिस्थलविषयनवविधलिंग प्रसंगो नाम अष्टादशीयः परिच्छेदः समाप्तः ॥

अर्थ—॥ ८ ॥ परयोगसाधन करणारांच्या मनाची धांव आत्मस्वरूपाकडे जशी असते, तशी यज्ञयागादि कर्मे करण्याकडे नसते, खडतर तपश्चर्या करण्या-

कडे नसतें, मंत्रजप करण्याकडे किंवा योगाभ्यास करण्याकडे नसते, ध्याना-कडे नसते, किंवा बोधाकडेही नसते.

ह्याप्रमाणें वीरशैवांच्या धर्माचा निर्णय असलेल्या सिद्धान्तशिखामणिग्रंथांतील प्राणलिंगिस्थलाच्या पोटभेदांप्रमाणें असलेल्या नऊ प्रकारच्या लिंगांचें वर्णन असलेला हा अठरावा परिच्छेद संपला.

सी. एन. कलबुर्गी

श्रीनंदिकेश्वराय नमः ॥

अथ एकोनविंशतीयपरिच्छेदः प्रारभ्यते ।

शरणस्थलप्रारंभः

अवतरणिका–अथागस्त्य उवाचेत्यगस्त्यप्रश्नः—

श्लोकः–स्थलभेदाः समाख्याताः प्राणलिंगिस्थलाश्रयाः ॥
कथय स्थलभेदं मे शरणस्थलसंश्रितम् ॥ १ ॥

व्याख्यानं—स्पष्टं ॥ १ ॥

॥ श्रीनंदिकेश्वरास नमस्कार असो. ॥

अर्थ–॥ १ ॥ अगस्त्य ह्मणतात—रेवणसिद्धा, प्राणलिंगिस्थलाचे नऊ पोटभेद तूं मला सविस्तररीतीनें सांगितलेस. आतां मला शरणस्थलाचे पोटभेद किती आहेत ते समजाऊन सांग. असा अगस्त्याचा प्रश्न ऐकून,

अवतरणिका–अथ श्रीरेणुक उत्तरं वक्ति रेणुक उवाचेति–

श्लोकः–शरणस्थलमाश्रित्य स्थलद्वादशकं मया ॥
उच्यते नाम सर्वेषां स्थलानां शृणु तापस ॥ २ ॥

व्याख्यानं—स्थलानामवांतरस्थलानामित्यर्थः शिष्टं स्पष्टं ॥ २ ॥

अर्थ–॥ २ ॥ रेणुक ह्मणतात—तपस्विश्रेष्ठा, अगस्त्या, शरणस्थलाचे बारा पोटभेद आहेत त्यांचीं नांवें मी तुला सांगतों. नीट लक्ष्य लाऊन ऐक.

अवतरणिका–अथ तानि स्थलानि सूत्रत्रयेणोद्दिशति—

श्लोकः–दीक्षापादोदकं पूर्वं शिक्षापादोदकं ततः ॥
ज्ञानपादोदकं चाथ क्रियानिष्पत्तिकं ततः ॥ ३ ॥

भावनिष्पत्तिकं चाथ ज्ञाननिष्पत्तिकं ततः ॥
पिंडाकाशस्थलं चाथ बिंद्वाकाशस्थलं ततः ॥ ४ ॥
महाकाशस्थलं चाथ क्रियायाश्च प्रकाशनम् ॥
भावप्रकाशनं पश्चात्ततो ज्ञानप्रकाशकम् ॥
स्वरूपं पृथगेतेषां कथयामि यथाक्रमम् ॥ ५ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥ ४ ॥ ५ ॥

अर्थ–॥ ३ ॥ १ दीक्षापादोदक २ शिक्षापादोदक ३ ज्ञानपादोदक ४ क्रियानिष्पत्तिक ॥ ४ ॥ ५ भावनिष्पत्तिक ६ ज्ञाननिष्पत्तिक ७ पिंडाकाशस्थल ८ बिंद्वाकाशस्थल ॥ ५ ॥ ९ महाकाशस्थल १० क्रियाप्रकाशनस्थल ११ भावप्रकाशनस्थल व १२ ज्ञानप्रकाशस्थल, हीं बारा स्थलें शरणस्थलाचे पोटभेद होत. त्यांचे भेद मी आतां क्रमाक्रमानें सांगतों.

अवतरणिका–"अथाचार्यः पूर्वरूपं अंतेवास्युत्तररूपं विद्यासंधिः" इति श्रुत्युक्तप्रकारेण। "अस्मात्प्रविततादूंधात्परसंस्थानिरोधकात्। दीक्षैनं मोचयेत्पूर्वं शैवं धाम नयत्यपि" इति स्वायंभुववचनानुसारेण चास्य सेव्यप्रसादिनः सुलभदीक्षापादोदकस्थलं निरूपयति—

श्लोकः–दीक्षयापगतद्वैतं यज्ज्ञानं गुरुशिष्ययोः ॥
आनंदस्यैक्यमेतेन दीक्षापादोदकं स्मृतम् ॥ ६ ॥

व्याख्यानं—गुरुशिष्ययोः सेव्यगुरुशिष्ययोः आनंदस्यैक्यं निजानंदैकीभूतं दीक्षयापगतद्वैतं ज्ञानदानमलक्षयरूपचित्क्रियादीक्षानिवारितद्वैतं यत् ज्ञानमस्ति एतेन अनेन ज्ञानेन दीक्षापादोदकं सेव्यप्रसादिनः सुलभभूतदीक्षापादोदकमिति स्मृतम् शिवदीक्षापगतद्वैतज्ञानवद्गुरुशिष्यनिजानंदैक्यमेव दीक्षापादोदकमित्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ गुरूचें आणि शिष्याचें आनंदाचें ऐक्य होणें व ज्ञानदानदीक्षा मलक्षयरूप जी ज्ञानक्रिया दीक्षा त्या दीक्षेनें द्वैतभाव निवारण होतो त्या ज्ञानालाच दीक्षापादोदक असें ह्मणतात.

अवतरणिका–अथ दीक्षासंजातगुरुशिष्यैक्यमेव दीक्षापादोदकमिति पक्षांतरेणाह—

श्लोकः—अथवा पादशब्देन गुरुरेव निगद्यते ॥
शिष्यश्चोदकशब्देन तयोरैक्यं तु दीक्षया ॥ ७ ॥

व्याख्यानं—अथवा तन्न चेत् पादशब्देन श्रीगुरुरेव कथ्यते उदकशब्देन शिष्यो निगद्यते दीक्षया निजकरसंजातशिष्यमूर्ध्नि घ्राणस्वरूपदीक्षाविशेषेण तयोरैक्यं तु पादोदकशब्दवाच्यगुरुशिष्यैक्यं दीक्षापादोदकमिति स्मृतमित्यर्थः ॥ ७ ॥

अर्थ—॥ ७ ॥ किंवा पाद ह्या शब्दाचा अर्थ गुरु असा करावा, व उदक शब्दाचा अर्थ शिष्य असा करावा. त्या दोघां गुरुशिष्यांचें दीक्षेमुळें ऐक्य होतें, ह्मणून त्यास दीक्षापादोदक असें ह्मणतात.

अवतरणिका—अथ दीक्षाप्रकाशितसत्यज्ञानानंदैक्यमेव दीक्षापादोदकमिति पक्षांतरेण कथयति—

श्लोकः—परमानंद एवोक्तः पादशब्देन निर्मलः ॥
ज्ञानं चोदकशब्देन तयोरैक्यं तु दीक्षया ॥ ८ ॥

व्याख्यानं—पादशब्देन मलरहितपरब्रह्मानंद उच्यते उदकशब्देन ब्रह्मस्वरूपज्ञानमुच्यते दीक्षया हृत्कमलमध्यस्थचिद्दीक्षया तयोरैक्यं तु "विज्ञानमानंदं ब्रह्म" इति श्रुतेः धर्मधर्मिस्वरूपानंदज्ञानैक्यं दीक्षापादोदकमिति स्मृतमित्यर्थः ॥ ८ ॥

अर्थ—॥ ८ ॥ पाद ह्या शब्दावरून उत्तम प्रकारचा शिवानंद ह्मणून ओळखावा, तो शिवानंद निर्दोष आहे. उदकशब्दावरून ज्ञान ह्मणून ओळखावें. तीं दोन्हीं दीक्षेमुळें एकत्र होतात ह्मणून त्यास दीक्षापादोदकस्थल असें ह्मणावें.

अवतरणिका—अथ "यतोवाचो निवर्तंते अप्राप्य मनसा सह ब्रह्मणो विद्वान् न बिभेति कुतश्चन" इति ब्रह्मोपनिषद्वाक्यानुसारेण तज्ज्ञानानंदमेव विशेषयति—

श्लोकः—परसंवित्प्रकाशात्मा परमानंदभावनाम् ॥
अधिगम्य महायोगी न भेदं क्वापि पश्यति ॥ ९ ॥

व्याख्यानं—महायोगी तत्पादोदकदीक्षासंपन्नः शिवयोगी परसंवित्प्रकाशात्मा परब्रह्मस्वरूपज्ञानप्रकाशस्वरूपवान् सन् परमानंदभावनां अधिगम्य भेदं नित्यपरिपूर्णज्ञानानंदभेदं क्वापि न पश्यति तद्बाह्यदेशाभावादिति ॥ ९ ॥

अर्थ—॥ ९ ॥ ज्याच्या मनाला परमेश्वराच्या स्वरूपाचें यथार्थज्ञान झालें आहे, तो श्रेष्ठशिवयोगी सर्वत्र शिवज्ञानानंदाचीच भावना करीत असल्यामुळें त्याला भेदभाव "हें माझें, हें परक्याचें" अशी बुद्धि कधींच होत नाहीं.

अवतरणिका–अत एव नान्यत्कांक्षतीत्याह—

श्लोकः–देशकालाद्यवच्छेदविहीनं नित्यनिर्मलम् ॥

आनंदं प्राप्य बोधेन नान्यत्कांक्षति संयमी ॥ १० ॥

व्याख्यानं—संयमी शिवयोगी देशकालाद्यवच्छेदविहीनं देशकालाकारेषु विच्छेदराहित्येन विद्यमानं नित्यनिर्मलमानंदं ब्रह्मानंदं बोधेन ब्रह्मज्ञानस्वरूपेणैव प्राप्य अन्यत्र कांक्षेति तद्व्यतिरिक्तवस्त्वंतराभावादिति ॥ १० ॥

अर्थ–॥ १० ॥ शिवयोग्याला देशकाल वगैरेमुळें छिन्नभिन्न (खंडित) न होणारा, नेहमीं निर्दोष असणारा शिवानंद सद्गुरूच्या उपदेशानें प्राप्त झाल्यावर त्याचें दुसऱ्या कोणत्याही वस्तूवर मन जात नाहीं.

अवतरणिका–अथ दीक्षापादोदकस्थलं समापयति—

श्लोकः–ज्ञानामृतमपि स्वच्छं गुरुकारुण्यसंभवम् ॥

आस्वाद्य रमते योगी संसारामयवर्जितः ॥ ११ ॥

व्याख्यानं—गुरुकृपोद्भूतं निर्मलं ब्रह्मज्ञानामृतं आस्वाद्य दीक्षापादोदकसंपन्नः शिवयोगी भवरोगमुक्तः सन् स्वस्वरूपे क्रीडत इत्यर्थः ॥ ११ ॥

इति दीक्षापादोदकस्थलम् ॥

अर्थ–॥ ११ ॥ गुरूच्या कृपेमुळें प्राप्त झालेलें निर्दोष असें शिवज्ञानरूप अमृतच चाखून शिवयोगी सुखानें कालक्रमणा करितोः व त्या अमृतपान करण्यामुळें त्याचा संसाररूप रोग दूर होतो.

अथ शिक्षापादोदकस्थलम् ॥

अवतरणिका–अथ "मायामयमिदं द्वैतमद्वैतं परमार्थतः ॥ विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ॥ उपदेशादयंवादो ज्ञाते द्वैतं न विद्यते" इति मुंडकश्रुत्यनुसारेण तद्दीक्षापादोदकसंपन्नस्य शिवयोगिनः शिक्षापादोदकं सूत्रद्वयेन कथयति—

श्लोकः–गुरुशिष्यमयं ज्ञानं शिक्षा योगिनमीर्यते ॥

तयोस्समरसत्वं हि शिक्षापादोदकं स्मृतम् ॥ १ ॥

व्याख्यानं—या शिक्षा गुरुशिष्यमयं ज्ञानं पूर्ववत्पादोदकशब्दवाच्यगुरुशिष्ययोस्तन्मयीभूतज्ञानं योगिनं तद्दीक्षापादोदकसंपन्नशिवयोगिनं ईर्यते प्रेरयति तयोः तच्छिक्षाज्ञानयोंः समरसत्वं हि सामरस्यं हि शिक्षापादोदकमिति स्मृतमित्यर्थः ॥ १ ॥

अर्थ—॥ १ ॥ जी शिक्षा गुरुशिष्यमय ज्ञानाला व दीक्षापादोदकसंपन्न शिवयोग्याला प्रेरणा करिते, त्या शिक्षेला व ज्ञानाला जें ऐक्य (सामरस्य) होतें त्याला शिक्षापादोकस्थल असें ह्मणावें.

अवतरणिका—अथैवंरूपज्ञानामृतं कैः केन कस्माल्लभ्यत इत्यत्राह—

श्लोकः—मथिताच्छास्त्रजलधेर्युक्तिमंथानवैभवात् ॥
गुरुणा लभ्यते बोधसुधा सुमनसां गणैः ॥ २ ॥

व्याख्यानं—युक्तिमंथानवैभवात् युक्तिरूपमथनदंडसामर्थ्यात् मथितात् शास्त्रजलधेः निगमागमात्मकवीरशैवशास्त्रसमुद्रात् गुरुणा शिक्षाचार्येण बोधसुधा शिवाद्वैतज्ञानामृतम् सुमनसां गणैः दीक्षापादोदकस्वीकारेण शुद्धचित्तानां शिवयोगिनां समूहैः लभ्यते यथा सुरगुरोः समुद्रमथनविचारेण सुराणां सुधा प्राप्ता तथेत्यर्थः ॥ २ ॥

अर्थ—॥ २ ॥ वेदागमात्मक वीरशैवशास्त्ररूप समुद्र आहे; त्यास युक्तिरूप मंथा (रवी) करून घुसळलें (शास्त्राचा युक्तीनें विचार केला), ह्मणजे गुरूच्या द्वारनें (पासून) शिवयोग्यांस शिवाद्वैतज्ञानामृत प्राप्त होतें.

अवतरणिका—अथ तस्य शिवयोगिनः धर्मधर्मिस्वरूपचिदानंदयोस्तत्वं सूत्रत्रयेण विशेषयति—

श्लोकः—ज्ञानचंद्रसमुद्भूतां परमानंदचंद्रिकाम् ॥
पश्यन्ति परमाकाशे मुक्तिरात्रौ महाधियः ॥ ३ ॥

व्याख्यानं—महाधियः सूक्ष्मदृशः शिवयोगिनः मुक्तिरात्रौ परमुक्तिलक्षणगाढांधकारवति परमाकाशे परब्रह्मणः सद्रूपहृदयाकाशे ज्ञानचंद्रसमुद्भूतां चिच्चंद्रभित्तित आविर्भूतां परमानंदमयीं चंद्रिकाम् ज्योत्स्नां पश्यंति स्वस्वरूपत्वेन परामृशंतीत्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ बुद्धिमान् शिवयोगी लोक मुक्तिरूपरात्रीं परमाकाशांत (हृदयाकाशांत) शिवज्ञानरूप चंद्राचें परमानंदरूप स्वच्छ चांदणें पडलेलें पाहतात. (शिवज्ञानी लोक परमात्म्याचें शिवाद्वैतशास्त्रानें ज्ञान करून घेऊन संतोष पावतात व मोक्षास जातात.)

अवतरणिका—अथैवमपारपरमानंदचंद्रिकायां दृष्टायामन्यद्रष्टव्यं श्रोतव्यं च नास्तीत्याह—

श्लोकः–दृष्टे तस्मिन्परानंदे देशकालादिवर्जिते ॥
द्रष्टव्यं विद्यते नान्यच्छ्रोतव्यं ज्ञेयमेव वा ॥ ४ ॥

व्याख्यानं—देशकालाद्यखंडिते तस्मिन् परानंदे दृष्टे सति अन्यत् द्रष्टव्यं चक्षुषा द्रष्टव्यं श्रोतव्यं श्रवणेन श्रोतव्यं ज्ञेयमेव वा ज्ञातुं योग्यं वा न विद्यते सर्वस्यापि पदार्थस्य तत्कार्यत्वेन तदभिन्नत्वादित्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ ज्याला देश, काल वगैरे कांहीं नाहीं तें आनंदस्वरूप दृष्टीस पडल्यावर दुसरें पहावयासारखें कांहीं राहिलें नाहीं, ऐकण्यासारखें कांहीं राहिलें नाहीं, किंवा जाणण्यासारखेंही कांहीं राहिलें नाहीं.

अवतरणिका–अथ नान्यच्च कांक्षतीत्याह—

श्लोकः–आत्मानंदेन तृप्तस्य का स्पृहा विषये सुखे ॥
गंगाजलेन तृप्तस्य कूपतोये कुतो रतिः ॥ ५ ॥

व्याख्यानं—आत्मानंदेन निजानंदेनेत्यर्थः ॥ शिष्टं स्पष्टं ॥ ५ ॥

अर्थ–॥ ५ ॥ आत्मज्ञानरूप आनंदानें तृप्त झालेल्या शिवयोग्यास विषयसुखाची काय आवड आहे? गंगानदीचें गोड पाणी पोटभर पीऊन तृप्त झाल्यावर आडांतील पाणी काढून प्यावें असें कोणास वाटेल? कोणासही वाटणार नाहीं.

अवतरणिका–ननु निजानंदेन तृप्तस्य परयोगिनः परिमितिरस्ति नवेत्यत्राह—

श्लोकः–यस्मिन्नप्राप्तकल्लोले सुखसिंधौ निमज्जति ॥
सामरस्यान्महायोगी तस्य सीमा कुतो भवेत् ॥ ६ ॥

व्याख्यानं—स्पष्टं ॥ ६ ॥

अर्थ–॥ ६ ॥ ज्या शिवानंदरूपी समुद्रावर लाटा देखील उठत नाहींत, त्या सौख्यसमुद्रांत शिवसामरस्यामुळें बुडून गेलेल्या शिवयोग्याच्या सुखाची मर्यादा तरी कशी करावी? कांतर तें सुख अमर्याद आहे.

अवतरणिका–नन्वस्य योगिनः कदाचित् कुत्रचिद्वा भेदभ्रांतिः संभवति किमित्यत्र वदन् शिक्षापादोदकस्थलं समापयति—

श्लोकः–गुरुप्रसादचंद्रेण निष्कलंकेन चारुणा ॥
यन्मनःकुमुदं नित्यं बोधितं तस्य को भ्रमः ॥ ७ ॥

व्याख्यानं—नित्यबोधितं निरंतरविकसितमित्यर्थः ॥ शिष्टं स्पष्टं ॥ ७ ॥

इतिशिक्षापादोदकस्थलम् ॥

अर्थ-॥ ७ ॥ गुरूचा प्रसाद (कृपा) रूप चंद्र निष्कलंक असून सुंदर आहे, त्या प्रसादामुळें ज्या शिष्याचें अन्तःकरणरूप चंद्रविकासी कमल प्रफुल्लित झालें, त्याला पुन्हा अज्ञानाची (मायेची) भ्रांति कशी पडेल? कधींही पडणार नाहीं.

अथ ज्ञानपादोदकस्थलम् ॥

अवतरणिका-अथ "नाध्यक्षं नापि तल्लैंगं न शाब्दमपि शांकरम् ॥ ज्ञानमाभाति विमलं सर्वथा सर्ववस्तुषु" इति मृगेंद्रवचनानुसारेण तच्छिक्षापादोदकसंपन्नस्य सुलभं ज्ञानपादोदकं प्रकाशयति—

श्लोकः—तदैक्यसंपदानंदज्ञानं ज्ञानगुरुर्मतः ॥
तत्सामरस्यं शिष्यस्य ज्ञानपादोदकं विदुः ॥ १ ॥

व्याख्यानं—आनंदज्ञानं "विज्ञानमानंदं ब्रह्म" इति श्रुतिप्रसिद्धपादोदकशब्दवाच्यानंदज्ञानमेव ज्ञानगुरुरिति मतः संमतः तदैक्यसंपदा तदानंदज्ञानयोरैक्यसंपत्त्या तत्सामरस्यं तयोः समरसभावः शिष्यस्य शिक्षापादोदकसंपन्नस्य शिवयोगिनः ज्ञानपादोदकं सत् विदुः जानंतीत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ त्या शिवैक्यसंपत्तीचें ज्ञान आणि आनंद ह्यांलाच ज्ञानगुरु असें ह्मणतात. (ज्ञानगुरूच्या उपदेशानें शिष्याला शिवैक्याचें सुख आणि आनंद मिळतो). त्या गुरूबरोबर शिष्याचें सामरस्य होणें (गुरूसारखीच शिष्याची स्थिति होणें) यास ज्ञानपादोदक असें ह्मणतात.

अवतरणिका-अथ तज्ज्ञानचंद्रप्रकाशं सूत्रत्रयेणोपदिशति—

श्लोकः—अविद्याराहुनिर्मुक्तो ज्ञानचंद्रः सुनिर्मलः ॥
प्रकाशते पराकाशे परानंदमहाद्युतिः ॥ २ ॥

व्याख्यानं—अज्ञानलक्षणराहुः स्पर्शरहितः अत्यंतनिर्मलः मलवासनालेशतोऽप्यसंस्पृष्ट इतियावत् ज्ञानचंद्रः शिवाद्वैतज्ञानचंद्रः परमानंदमहाद्युतिः परमानंदरूपमहाकलाप्रकाशवान् सन् पराकाशे सर्वोत्कृष्टहृदयाकाशे प्रकाशते राजत इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ अज्ञानरूप राहूपासून सुटलेला ज्ञानरूप चंद्र फारच निर्मळ

असा दिसतो, आणि चिदंबरांत (सर्वोत्कृष्टहृदयाकाशांत) त्याचा प्रकाश पडून त्याचें तेज फारच स्वच्छ होऊन त्यामुळें इतरांस पराकाष्ठेचें सुख होतें. (संसारांतून मन विरक्त झाल्यावर शिवज्ञान वरचेवर जास्त होऊन तो शिवयोगी मुक्त होतो).

अवतरणिका–तर्ह्ययं ज्ञानचंद्रः किं वर्धयतीत्यत्राह—

श्लोकः–अज्ञानमेघनिर्मुक्तः पूर्णज्ञानसुधाकरः ॥
आनंदजलधेर्वृद्धिमनुपश्यन्विभासते ॥ ३ ॥

व्याख्यानं—नाहं शिव इत्यज्ञानावरणनिर्मुक्तः अंडरसन्यायेनाहमिति विश्वतः परिपूर्णज्ञानचंद्रः स्वतंत्रतालक्षणनिजानंदसमृद्धस्य वृद्धिमनुपश्यन्विभातीत्यर्थः ॥३॥

अर्थ–॥ ३ ॥ अज्ञानरूप ढगांतून बाहेर निघालेला शिवज्ञानरूप पौर्णिमेचा पूर्णचंद्र आनंदरूप समुद्रास भरती आणून शोभूं लागतो. (संसारसंबंधीं मायिक बुद्धीचा नाश होऊन आत्मज्ञान उत्पन्न झालें ह्मणजे शिवानंदाचा अनुभव घ्यावयास मिळतो.)

अवतरणिका–अथैवंविधज्ञानचंद्रोदये के किं पश्यंतीत्यत्राह—

श्लोकः–ज्ञानचंद्रोदये जाते ध्वस्तमोहतमोभराः ॥
पश्यंति परमां काष्ठां योगिनः सुखरूपिणीम् ॥ ४ ॥

व्याख्यानं—शिवज्ञानचंद्रोदये जाते सति विनष्टाज्ञानांधकारभराः शिवयोगिनः परमानंदस्वरूपिणीं परमां काष्ठां स्वस्वरूपस्थितिं पश्यंतीत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ शिवज्ञानरूपचंद्राचा उदय होऊन अज्ञानरूप अंधकाराचा पसारा नाहींसा झाला, ह्मणजे योगीश्वर सुखस्वरूपी श्रेष्ठ दिशा पाहतात. (योग्यांचें अज्ञान नाहींसें होऊन त्यांस ज्ञान झालें ह्मणजे ते चैतन्यस्वरूपास जाऊन पोंहोंचतात.)

अवतरणिका–एवं चंद्रत्वेन वर्णितं शिवज्ञानं सूर्यत्वेन वर्णयन् विचित्रं दर्शयति—

श्लोकः–मायारजन्यविरमे बोधसूर्ये प्रकाशिते ॥
निरस्तसर्वव्यापारश्चित्रं स्वपिति संयमी ॥ ५ ॥

व्याख्यानं—लोके तावन्निशावसाने सूर्योदये जाते सति सर्वोऽपि लोको विनिद्रः सन् सव्यापारो भवति मायारूपनिशावसाने चिदादित्ये प्रकाशिते सति संयमी

योगिजनः निरस्तव्यापारः सन् स्वपितीति चित्रं उक्तोऽयमर्थः श्रीभगवद्गीतायां "या निशा सर्वभूतानां तस्यां जागर्ति संयमी॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः" इति॥ ५॥

अर्थ–॥ ५॥ अज्ञानरूप अंधार नाहींसा झाल्यानंतर व ज्ञानरूप सूर्याचा उदय झाल्यावर, सर्व कामधंदे करणें वगैरे सोडून देऊन, योगीश्वर सुखानें झोंप घेतो हें आश्चर्य आहे. इतर प्राकृत लोक रात्रीं स्वस्थ निजतात आणि दिवसास कामधंदे करितात. योगीश्वराचें त्यांच्या उलट आहे. तो ज्ञानसूर्य उगवून अज्ञानांधकार नाहींसा झाल्यावर निजतो.

अवतरणिका–अथ तस्य परानंदाविर्भावः तदेत्यत्राह—

श्लोकः–अनाद्यविद्याविच्छित्तिवेलायां परयोगिनः॥
प्रकाशते परानंदः प्रपंचेन विनाकृतः॥ ६॥

व्याख्यानं—अनाद्यविद्याविच्छित्तिवेलायां मायारजन्या विरम एव प्रपंचेन विनाकृतः निरुपाधिकपरमानंदाविर्भाव इत्यर्थः॥ ६॥

अर्थ–॥ ६॥ अनादिकालापासून चालत आलेल्या अज्ञानदशेचा नाश होण्याची वेळ आली असतां परयोग्यास प्रपंचावांचूनच परब्रह्मस्वरूपाचा निरुपाधिकानंद प्राप्त होतो.

अवतरणिका–ननु शिवयोगिनः प्रपंच एव संतीति कथं निरुपाधिकानंदाविर्भाव इत्यत्राह—

श्लोकः–नित्यानंदे निजाकारे विमले परतेजसि॥
विलीनचेतसां पुंसां कुतो विश्वविकल्पना॥ ७॥

व्याख्यानं—नित्यानंदस्वरूपं सत् विमले निर्मले निजाकारे निजस्वरूपवति परतेजसि चिदादित्ये विलीनचित्तानां पुंसां सत्पुरुषाणां शिवयोगिनां विश्वकल्पना कुत इत्यर्थः॥ ७॥

अर्थ–॥ ७॥ परब्रह्माचें स्वरूप नित्य आणि आनंदी आहे; तें आत्मस्वरूपासारखें आहे, व निर्दोष आहे. त्या परब्रह्मस्वरूपांत निमग्न झालेल्या योगीश्वरांस विश्व वेगळें आणि परमेश्वर वेगळा अशी कल्पना देखील येत नाहीं.

अवतरणिका–अथ ज्ञानपादोदकसंपन्नस्य शिवयोगिनः पूर्णानंदस्य ब्रह्मादीनामप्यानंदो न सम इति सूत्रद्वयेन कथयति—

श्लोकः–कुतो ब्रह्मा कुतो विष्णुः कुतो रुद्रः कुतो रविः॥
साक्षात्कृतपरानंदज्योतिषः साम्यकल्पना॥ ८॥

व्याख्यानं—ब्रह्मादीनामानंदस्य साक्षात्कृतपरानंदज्योतिषः शिवयोगिनः आनंदांशलेशत्वादिति भावः अस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः योगिशिवयोरभेदादिति ॥ ८ ॥

अर्थ–॥ ८ ॥ कुठला ब्रह्मदेव, कुठला विष्णु, कुठला शंकर, आणि कुठला सूर्य, प्रत्यक्ष झालेल्या आत्मस्वरूपानंदाच्या तेजाची बरोबरी कोणाच्यानेंही करवत नाहीं.

अवतरणिका–इममर्थमेव स्फुटयति—

श्लोकः–अपरोक्षपरानंदविलासस्य महात्मनः ॥
ब्रह्मविष्ण्वादयो देवा विशेषाः सुखबिंदवः ॥ ९ ॥

व्याख्यानं—महात्मनः ज्ञानपादोदकसंपन्नस्य शिवयोगिन इत्यर्थः शिष्टं स्पष्टं॥९॥

अर्थ–॥ ९ ॥ ज्याला प्रत्यक्षरीतीनें आत्मस्वरूपाचा आनंद पूर्णपणें मिळालेला आहे; त्या श्रेष्ठशिवयोग्याला ब्रह्मदेव विष्णु वगैरे मोठे मोठे देव क्षुल्लक वाटत असून त्यांच्यापासून मिळणारीं सुखें तृणतुल्य वाटतात.

अवतरणिका–अथ तज्ज्ञानानंदमेव विशिष्य ज्ञानपादोदकस्थलं समापयति—

श्लोकः–यन्मात्रासहितं लोके वांछंति विषयं नराः ॥
तदप्रमेयमानंदं परमं को न वांछति ॥ १० ॥

व्याख्यानं—नराः जनाः लोके इह लोके यन्मात्रासहितं यस्य चिदानंदस्यांशेन सहितं विषयसुखं वांछंति तदप्रमेयं तस्य विषयज्ञानसुखस्य अप्रमेयं अपरिमितं परानंदं ब्रह्मानंदं को न वांछति सर्वेऽपि वांछंतीत्यर्थः ॥ १० ॥

इति ज्ञानपादोदकस्थलम् ॥

अर्थ–॥१०॥ जगांत विषयसुख ह्मणून जें कांहीं सुख मानलें गेलें आहे, तें सुख आत्मानुभवसुखाच्या एकलक्षांश हिश्याबरोबर देखील टिकत नाहीं; त्या विषयसुखाची देखील लोक इतकी आवड करितात, मग त्या आत्मानुभव सुखाची इच्छा कोण करणार नाहीं? सर्व ज्ञाते लोक करतील. कांतर त्या सुखाची बरोबरी कोणत्याही सुखास येत नाहीं, इतकें तें सुख श्रेष्ठ आहे.

अथ क्रियानिष्पत्तिस्थलम् ॥

अवतरणिका–अथ "अद्वैतभक्तियुक्तस्य योगिनः सकला क्रिया ॥ आस्ते दग्धपटन्यायात्क्रियामात्रं हि न क्रिया" इति वीर-

तंत्रवचनानुसारेण एष ज्ञानपादोदकसंपन्न एव रज्जुसर्पन्यायेन कल्पितक्रियानिष्पत्तिमानिति क्रियानिष्पत्तिस्थलं विशदयति—

श्लोकः–परकाये क्रियापत्तिः कल्पितैव प्रकाशते ॥
रज्जौ भुजंगवद्यस्मात्क्रियानिष्पत्तिमानयम् ॥ १ ॥

व्याख्यानं—परब्रह्मकाये ज्ञानपादोदकसपन्ने शिवयोगिनि क्रियानिष्पत्तिः रज्जौ सर्पत्ववत् यस्मात्कारणात् कल्पितैव प्रकाशते तस्मादयं ज्ञानपादोदकसंपन्नः शिवयोगी क्रियानिष्पत्तिमानित्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ दोरी पाहिली ह्मणजे ज्याप्रमाणें एकदम साप आहे असा संशय येतो; त्याप्रमाणें परकायाविषयीं (मध्यें) क्रियानिष्पत्ति कल्पिलेलीच आहे; जो शिवयोगी परकाय असून क्रिया करितो, त्यास क्रियानिष्पत्तिस्थल असें ह्मणावें.

अवतरणिका–अत एव ज्ञानिनः कर्मफलं नास्तीति षड्भिः सूत्रैः प्रतिपादयति—

श्लोकः–ज्ञानिनो यानि कर्माणि तानि नो जन्महेतवः ॥
अग्निदग्धानि बीजानि यथा नांकुरकारणम् ॥ २ ॥

व्याख्यानं—ज्ञानिनां कर्मबीजानि ज्ञानाग्निदग्धानि इति वह्निदग्धबीजवन्नांकुरकारणमित्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ ज्ञानी मनुष्य जीं जीं कर्में करितो, तीं तीं कर्में त्याला जन्म घेण्यास कारण होत नाहींत; विस्तवांत जळालेल्या बियांस जसा पुन्हा अंकुर फुटत नाहीं, तसेंच ज्ञानी मनुष्याच्या कर्मांपासून त्यास पुण्यपाप लागत नाहीं.

अवतरणिका–अस्मिन्नर्थे "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेर्जुन" इति भगवदुक्तिः तस्मात् ज्ञानिनः कृतेनापि कर्मणा प्रयोजनं नास्तीत्याह—

श्लोकः–कर्मणा किं कृतेनापि ज्ञानिनो निरहंकृतेः ॥
विक्रिया प्रतिबिंबस्था किं करोति हिमद्युतेः ॥ ३ ॥

व्याख्यानं—अहं करोमीति मूलाहंकारशून्यस्य शिवज्ञानिनः कृतेनापि कर्मणा प्रयोजनं नास्ति यथा प्रतिबिंबस्थविकारः बिंबरूपस्य चंद्रस्य नास्ति ज्ञानिनः अप्रतिबिंबचैतन्यरूपत्वादिति भावः ॥ ३ ॥

अर्थ– ॥ ३ ॥ ज्या शिवज्ञानी मनुष्याचा अभिमान निखालस नाहींसारखा झाला आहे, त्यानें कर्में केलीं तरी त्यांपासून त्याला काय पापपुण्य लागणार

आहे? मुळींच पापपुण्य लागणार नाहीं. चंद्राच्या प्रतिबिंबाला जर एखादा विकार झाला तर त्यामुळें चंद्राला थोडाच विकार होतो; चंद्रास मुळींच विकार होत नाहीं. तसेंच ज्ञानीमनुष्याचे हातून बरी वाईट कर्में घडलीं, तरी त्यास पुण्य किंवा पाप लागत नाहीं.

अवतरणिंका–अथ ज्ञानिनि प्रतीयमाना क्रिया कल्पितेत्यत्र दृष्टांतमाह—

श्लोकः–चंद्रस्य मेघसंबंधाद्यथागमनकल्पना ॥
तथा देहस्य संबंधादारोप्या स्यात्क्रियात्मनः ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥

अर्थ–॥ ४ ॥ चंद्राखालून ढग जाऊं लागले ह्मणजे ढगांतून चंद्राकडे पाहणाऱ्या पृथ्वीवरील लोकांस चंद्र चालतोसा दिसतो; त्याचप्रमाणें शरीराचा संबंध झाल्यामुळें आत्मा कर्में करितो असा संशय येतो. वास्तविक आत्मा कोणतेंही कर्म करीत नाहीं.

अवतरणिका–अथ कर्म कुर्वतोऽपि ज्ञानिनः कर्मलेपो नास्तीत्यत्र दृष्टांतमाह—

श्लोकः–ज्ञानी कर्मनिरूढोऽपि लिप्यते न क्रियाफलैः ॥
घृतादिना यथा जिह्वा भोक्त्री चापि न लिप्यते ॥ ५ ॥

व्याख्यानं—निरूढस्तत्पर इत्यर्थः शिष्टं स्पष्टं ॥ ५ ॥

अर्थ–॥ ५ ॥ ज्ञानी मनुष्य कर्म करितो खरा, परंतु त्याचीं फळें त्यास भोगावीं लागत नाहींत. जीभ तूप वगैरे पदार्थांची चव घेते खरी, परंतु तिला ते चिटकून रहात नाहींत.

अवतरणिका–ननु जिह्वाया जलतत्वमयत्वेनांगुल्यादिवत् घृतादिलेपो नास्ति ज्ञानिनः कस्मात्कर्मफललेपो नास्तीत्यत्र चाह—

श्लोकः–निरस्तोपाधिसंबंधे जीवे या या क्रियास्थितिः ॥
सा सा प्रतीतिमात्रेण निष्फला चात्र लीयते ॥ ६ ॥

व्याख्यानं—निवृत्तमूलाहंकारसंबंधे चिद्रूपे । जीवन्मुक्ते या या क्रियास्थितिरस्ति सा सा दग्धरज्जुन्यायेन प्रतीतिमात्रेण स्थित्वा निष्फला सती स्वात्मन्येव लीयत इत्यर्थः कर्मलेपस्याहंकारो मूलमिति शिवज्ञानिनस्तदभावात्कर्मलेपो नास्तीति भावः ॥ ६ ॥

अर्थ–॥ ६ ॥ ज्या जीवाचा उपाधिसंबंध नाहींसा झालेला आहे, त्या जीवांत

जी जी क्रिया राहते, ती ती क्रिया राहिल्यासारखी दिसते मात्र; परंतु वास्तविक त्या क्रियेचा कांहींएक उपयोग नसून ती त्या जीवांतच लय पावते.

अवतरणिका–ननु ज्ञानिनः कर्मलेपो यथा नास्तीत्युच्यते तथा तस्य कर्मैव नास्तीति कुतो नोच्यत इत्यत्राह—

श्लोकः–गच्छंस्तिष्ठन्स्वपन्वाऽपि न निष्कर्मास्ति कश्चन ॥
स्वभावो देहिनां कर्म ज्ञानिनां तत्तु निष्फलम् ॥ ७ ॥

व्याख्यानं—अनेन रज्जुभुजंगन्यायेन शिवयोगिनि क्रियानिष्पत्तिरारोपितेत्येतत्परास्तं । कर्मदेहिनां स्वभाव इत्युक्तत्वादिति ॥ ७ ॥

अर्थ–॥ ७ ॥ कोणताही प्राणी जात असो, एकेजागीं बसलेला असो, किंवा निदान झोंप घेत असो; तो कांहीं तरी कर्म करीतच असतो, रिकामा ह्मणून क्षणभर राहत नाहीं, सतत कांहीं तरी कर्म करीत असणें हा प्राणिमात्रांचा धर्म आहे. त्याप्रमाणें ज्ञानी मनुष्यही कर्म करीतच असतो, परंतु भेद इतकाच कीं, अज्ञानमनुष्याचें कर्म त्यास बाधक होतें; ज्ञानी मनुष्याचें कर्म त्यास बाधक होत नाहीं.

अवतरणिका–अथ क्रियानिष्पत्तेः सर्वदेहस्वभावत्वेऽपि ज्ञानिनः कर्मलेपो नास्तीति वदन् क्रियानिष्पत्तिस्थलं समापयति—

श्लोकः–परिपूर्णमहानंदभाविनः शुद्धचेतसः ॥
न भवेत्कर्मकार्पण्यं नानाभोगफलप्रदम् ॥ ८ ॥

व्याख्यानं—निर्मलांतःकरणस्य नित्यपरिपूर्णपरानंदानुभाविनः शिवयोगिनः नानाविधभोगफलप्रदं पुण्यपापलक्षणकर्मपीडनं न भवेत् न स्यादित्यर्थः ॥ ८ ॥

इति क्रियानिष्पत्तिस्थलं ॥

अर्थ–॥ ८ ॥ जो ज्ञानी सच्चिदानंदस्वरूपाच्या आनंदाचा पूर्णपणानें उपभोग घेतो, व ज्याचें मन निष्पाप आहे, त्याचे हातून घडणारें बरें वाईट कर्म त्या ज्ञान्यास नानाप्रकारचें सुख दुःख भोगण्या करितां संसारांत जन्म मरण घेण्यास लावीत नाहीं.

अथ भावनिष्पत्तिस्थलम् ॥

अवतरणिका–अथ "चिरेण साध्यमानस्य भावुकैर्विगतक्रमैः॥ स्थिरभावो हि भावस्य भावनिष्पत्तिरुच्यते" इति किरणतंत्र-

C. M. Kalburgi

वचनानुसारेण तत्क्रियानिष्पत्तिमान् शिवयोगी शुक्तिरजतन्यायेन भावनिष्पत्तिमानिति प्रतिपादयति—

श्लोकः—भावः प्रतीयमानोऽपि परकाये तु कल्पितः ॥
शुक्तौ रजतवद्यस्माद्भावनिष्पत्तिमानयम् ॥ १ ॥

व्याख्यानं—परकाये क्रियानिष्पत्तिमति चित्काये प्रतीयमानो भावः यस्मात् शुक्तिरजतवत् कल्पितः तस्मादयं क्रियानिष्पत्तिमान् शिवयोगी भावनिष्पत्तिमानित्यर्थः ॥ १ ॥

अर्थ—॥ १ ॥ परकाय जीवामध्यें भाव आहे असा भास होतो खरा, परंतु तो काल्पनिक आहे, खरा नव्हे; शिंप पाहिली ह्मणजे तें रुपें आहे असें जसें प्रथमदर्शनीं वाटतें, तसेंच परकायांत भाव असल्याची शंका येते; त्यास भावनिष्पत्तिस्थल असें ह्मणावें.

अवतरणिका—अथ ज्ञानयोगिनः भावसंबंधाभावेऽपि सच्चिदानंदाकारे परशिवे भावः स्थापनीय इति पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः—भावेन नास्ति संबंधः केवलज्ञानयोगिनः ॥
तथापि भावं कुर्वीत शिवे संसारमोचके ॥ २ ॥

व्याख्यानं—स्पष्टं ॥ २ ॥

अर्थ—॥ २ ॥ ज्यास यथार्थरीतीचें शिवज्ञान झालें आहे, त्या ज्ञान्याचा भावाशीं कांहींएक संबंध नाहीं; तरीपण तो शिवज्ञानी मनुष्य संसारदुःखांतून सोडविणाऱ्या शंकरावर भाव ठेवितो (भक्ति करितो).

अवतरणिका—ननु परिपूर्णज्ञानिनः किं भावेनेत्यत्राह—

श्लोकः—परिपूर्णप्रबोधेऽपि भावं शंभौ न वर्जयेत् ॥
भावो हि निहितस्तस्मिन् भवसागरतारकः ॥ ३ ॥

व्याख्यानं—परिपूर्णसदानंदबोधस्वरूपे शंभौ भावं न वर्जयेत् कुत इत्यत्राह तस्मिन् शंभौ स्थापितो भावः संसारसागरतारक इति हि प्रसिद्ध इत्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ शिवयोग्याला यथार्थरीतीचें शिवज्ञान झालें तरी तो शंकराची भक्ति करणें मुळींच सोडीत नाहीं; कांतर शंकराची भक्ति केली तर त्या भक्तांस शंकर संसारसमुद्रांतून पैलतीरास नेतो.

अवतरणिका—अनेनास्य भावस्यार्थक्रियाकारित्वेन शुक्ति-

रजत वैलक्षण्यं सूचितम् । तस्माच्छंभौ भावः स्थिरीकरणीय इति भावः तर्हि स भावो नित्यः किमित्यत्राह—

श्लोकः—निवर्त्य जन्मजं दुःखं भावः शैवो निवर्तते ॥
यथा काष्ठादिकं दग्ध्वा स्वयं शाम्यति पावकः ॥ ४ ॥

व्याख्यानं—जन्मजं दुःखं भवरोग इत्यर्थः शिष्टं स्पष्टम् अनेन नित्यमुक्तं भवति ॥ ४ ॥

अर्थ—॥ ४ ॥ शिवावर ठेवलेला भाव (शिवाची केलेली भक्ति) जन्ममरणाचें दुःख दूर केल्यावांचून राहत नाहीं. लांकडास विस्तव लागला तर तें लांकूड जाळून टाकून मग आपोआप तो विझतो; तशीच शंकराची भक्ति देखील भक्ताच्या जन्ममरणाचें दुःख दूर करून मग लय पावते.

अवतरणिका—अथ भवरोगनिवृत्त्यनंतरं भावस्य प्रयोजनं नास्ति वेत्यत्राह—

श्लोकः—प्रकाशिते शिवानंदे तद्भावैः किं प्रयोजनम् ॥
सिद्धौ साध्ये चिरेणापि साधनैः किं प्रयोजनम् ॥ ५ ॥

व्याख्यानं—भवरोगनिवृत्त्यनंतरं नित्यानंदे प्रकाशिते सति शिवभावैः प्रयोजनं नास्ति तत्र दृष्टांतः बहुकाले साध्ये सिद्धे सति साधनैर्यथा प्रयोजनं नास्ति तथेत्यर्थः ॥ ५ ॥

अर्थ—॥ ५ ॥ शिवानंद प्राप्त झाल्यावर तो आनंद प्राप्त करून घेण्याची खटपट करण्याचें काय कारण आहे ? जें काम करावयाचें तें सिद्धीस गेल्यावर त्या कामाची खटपट कशासाठीं करावयास पाहिजे ?

अवतरणिका—तर्हि भावलयानंतरं योगी कथं भासत इत्यत्राह—

श्लोकः—एकीकृते शिवे भावे ज्ञानेन सह संयमी ॥
विस्मितात्मसमावेशश्शिवभावे विभासते ॥ ६ ॥

व्याख्यानं—कार्यनाशः कारणात्मनाशस्थितिरेवेति भावे वृत्तिज्ञानेन सह शिवैकलोलीभूते सति भावनिष्पत्तिमान् शिवयोगी आश्चर्यसंकल्पितस्वस्वरूपसमावेशवान् सन् शिवोऽहमिति भावे प्रकाशत इत्यर्थः ॥ ६ ॥

अर्थ—॥ ६ ॥ जितेंद्रिय शिवयोगी वृत्तिज्ञानानें भाव आणि शिव ह्यांचें ऐक्य केल्यावर आश्चर्यानें संकलित झालेल्या स्वस्वरूपसमावेशामुळें "शिवोऽहं" ह्या भावानें इंद्रियनिग्रहकरणारा तो शिवयोगी शोभूं लागतो.

अवतरणिका-अथ भावज्ञानयोरभेदमुपपाद्य भावनिष्पत्तिस्थलं समापयति—

श्लोकः-न भावेन विना ज्ञानं न भावो ज्ञानमंतरा ॥
मोक्षाय कारणं प्रोक्तं तस्मादुभयमाश्रयेत् ॥ ७ ॥

व्याख्यानं—भावेन विना वृत्तिज्ञानं नास्ति तेन विना भावो नास्तीति भावज्ञानयोरन्योन्यकरणत्वं प्रोक्तं तस्मान्मोक्षाय तदुभयमाश्रयेदिति ॥ ७ ॥

इति भावनिष्पत्तिस्थलम् ॥

अर्थ-॥ ७ ॥ भावावांचून वृत्तिज्ञान होत नाहीं व वृत्तिज्ञानावांचून भाव होत नाहीं. मोक्षप्राप्ति व्हावी अशी इच्छा असल्यास भाव आणि वृत्तिज्ञान हीं दोन्हीं ही पाहिजेत; ह्यासाठीं तीं दोन्हींही मिळविलीं पाहिजेत.

अथ ज्ञाननिष्पत्तिस्थलम् ॥

अवतरणिका-अथ "यथा मनः परे तत्वे लब्धलक्ष्यं विलीयति ॥ तथाह्यशेषविज्ञानं विनाशमुपगच्छति" इति निश्वासकारिकानुसारेण सोऽयं भावनिष्पन्न एव स्वप्नवत् ज्ञाननिष्पत्तिमानयमिति कथयति—

श्लोकः-ज्ञानस्य व्यवहारेऽपि ज्ञेयाभावात्स्वभावतः ॥
स्वप्नवज्ज्ञाननिष्पत्त्या ज्ञाननिष्पन्न इत्यसौ ॥ १ ॥

व्याख्यानं—व्यवहारे विश्वव्यवहारिकज्ञानस्य स्वभावतः स्थिरत्वेन ज्ञेयाभावात् विषयाभावात् असौ भावनिष्पत्तिमान् शिवयोगी अस्थिरस्वप्नसदृशज्ञाननिष्पत्त्या ज्ञाननिष्पत्तिमानिति प्रोच्यत इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ ज्ञानाचा उपयोग आहे खरा, तरीपण वास्तविक जाणावयाचें असें कांहीं एक नसल्यामुळें, तें ज्ञान होणें स्वप्नांत होणाऱ्या ज्ञानासारखें निरुपयोगी आहे; ह्मणून त्यास ज्ञाननिष्पन्नस्थल असें ह्मणतात.

अवतरणिका-अथ तदेवोपपादयति—

श्लोकः-स्वप्नजातं यथा ज्ञानं सह स्वार्थैर्निवर्तते ॥
तथात्मनि प्रकाशे तु ज्ञानं ज्ञेयं निवर्तते ॥ २ ॥

व्याख्यानं—स्वप्नोत्पन्नं ज्ञानं यथा स्वविषयैः सह निवर्तते तथा स्वस्वरूपे प्रकाशिते सति जाग्रद्दशाज्ञानेन सह ज्ञेयं विश्वं निवर्तत इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ स्वप्नांत झालेलें ज्ञान् जसें त्याच्या अर्थासह जागें झाल्याबरोबर

आपाप नाहीं सारखें होतें; तसेंच शिवसामरस्य पावलेल्यास जाणावयाचें असें कांहींएक राहिलें नसल्यामुळें वस्तूंविषयीं झालेलें ज्ञान निरुपयोगी असतें.

अवतरणिका—ननु स्वस्वरूपे प्रकाशिते ज्ञेयं तस्मान्निवर्तत इत्यत्राह—

श्लोकः—परिपूर्णे महानंदे परमाकाशलक्षणे ॥
शिवे विलीनचित्तस्य कुतो ज्ञेयांतरे कथा ॥ ३ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥

अर्थ—॥ ३ ॥ शिव स्वतः परिपूर्ण आहे त्यास कोणत्याही वस्तूची अपेक्षा नाहीं, तो मोठा आनंदी आहे, परमाकाश हें त्याचें लक्षण आहे. त्या शिवाचे स्वरूपांत ज्याचें मन पूर्णपणानें गढून गेलें आहे, त्याला अमुक एक जाणावयाचें राहिलें आहे ही गोष्ट तरी कशाला पाहिजे? त्याला सर्व काहीं समजून चुकलें आहे.

अवतरणिका—ननु ज्ञाननिष्पत्तिसंपन्नस्य शिवयोगिनो ज्ञानं कीदृशमित्यत्राह—

श्लोकः—अखंडानंदसंवित्तिस्वरूपं ब्रह्मकेवलम् ॥
मिथ्या तदन्यदित्येषां स्थितिर्ज्ञानमिहोच्यते ॥ ४ ॥

व्याख्यानं—ब्रह्मपरशिवाख्यं ब्रह्म केवलाखंडानंदसंवित्स्वरूपं तदन्यत् तद्व्यतिरिक्तमिथ्यैवेदमिति भासमानं जगज्जालं मृषेत्येषां स्थितिः ज्ञानमित्यत्राह ज्ञाननिष्पत्तिस्थलं कथ्यत इत्यर्थः ॥ ४ ॥

अर्थ—॥ ४ ॥ फक्त परब्रह्मच काय तें एक परिपूर्ण आहे, आनंदस्वरूप आहे, आणि ज्ञानस्वरूप आहे. त्या परब्रह्माखेरीज दुसरें जें कांहीं आहे, तें सर्व खोटें आहे. असा खरा प्रकार समजून येणें ह्यालाच ज्ञान ह्मणतात.

अवतरणिका—अथ विशेषलक्षणं दर्शयति—

श्लोकः—सत्तात्मनानुवृत्तं यद् घटादिषु परं हि तत् ॥
व्यावर्तमाना मिथ्येति स्थितिर्ज्ञानमिहोच्यते ॥ ५ ॥

व्याख्यानं—सदेव सोम्येदमग्र आसीदिति श्रुतेः सत्तात्मना सद्रूपब्रह्मणा परं अव्ययत्वात्परेषु घटादिषु अनुवृत्तं अनुगतं यन्नामरूपमस्ति तत् मिथ्येति व्यावर्तमाना निवार्यमाणा स्थितिरिह ज्ञानमित्युच्यत इत्यर्थः ॥ ५ ॥

अर्थ—॥ ५ ॥ सत्यस्वरूप अशा परब्रह्मस्वरूपाखेरीज इतर घागरीवगैरेंवर

नाम, वृत्त वगैरे जें कांहीं दुसरे गुणधर्म आहेत; ते खोटे आहेत असें जें समजणें तेंच ज्ञान होय.

अवतरणिका–नन्वेवं चेदाविद्यकब्रह्माद्वैतापेक्षयास्य स्वतंत्रशिवाद्वैतस्य को विशेष इत्यत्राह—

श्लोकः–अकारणमकार्यं यदशेषोपाधिवर्जितम् ॥
तद्ब्रह्म तदहं चेति निष्ठा ज्ञानमुदीर्यते ॥ ६ ॥

व्याख्यानं—यद्वस्तु न तस्य कार्यं कारणं च विद्यते "न तत्समश्चाभ्यधिकश्च दृश्यत" इति श्वेताश्वतरश्रुतेः कार्यकारणशून्यं सदशेषोपाधिवर्जितं तद्ब्रह्म तत् तद्ब्रह्मैव अहं च चरादिदमिति भासमानं पंचभौतिकं एवं च चराचरमयं विश्वमिति निष्ठादार्ढ्यं ज्ञानमित्युत्कृष्टत्वेनोच्यत इत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ ज्याला कशाचेंही कारण नाहीं, ज्याला कांहींएक करावयाचें नाहीं, ज्याला कोणत्याही रीतीची उपाधि नाहीं, तें परब्रह्मस्वरूप होय; आणि तें परब्रह्मस्वरूपही मीच आहें असा जो दृढ निश्चय त्यास ज्ञान ह्मणतात.

अवतरणिका–अथैवं चिद्रूपब्रह्मणि सामरस्यज्ञाननिष्पत्तिमतः शिवयोगिनः स्वातिरेकेण त्रिपुटिमयप्रपंचव्यवहारो नास्तीति वदन् ज्ञाननिष्पत्तिस्थलं समापयति—

श्लोकः–ज्ञाताप्यहं ज्ञेयमिदमिति व्यवहृतिः कुतः ॥
अभेदब्रह्मसारस्ये निरस्ताखिलवस्तुनि ॥ ७ ॥

व्याख्यानं—"नेहनानास्तिकिंचन" इतिश्रुतेः निरस्तसमस्तप्रापंचिकभेदवदद्वितीयब्रह्मसामरस्ये सत्यहं ज्ञाता ज्ञेयमिदमिति व्यवहृतिः कुतः व्यवहारः कस्मात् न कस्मादपीत्यर्थः ॥ ७ ॥

इति ज्ञाननिष्पत्तिस्थलम् ॥

अर्थ–॥ ७ ॥ जाणणारा मी, व जाणावयाचें हें, हा व्यवहार तरी कुठला? कांतर परब्रह्मस्वरूपांत भेद्भाव (निरनिराळेपणा) मुळींच नाहीं, तें अखंड आहे, त्यांत कोणतीही वस्तु निराळी आहे असें मानतांच येत नाहीं.

अथ पिंडाकाशस्थलं ॥

अवतरणिका–अथ "एक एवहि भूतात्मा भूते भूते व्यवस्थितः ॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत्" इत्यमृतबिं-

दूपनिषद्वचनानुसारेण ज्ञाननिष्पत्तिसंपन्नस्य सुलभीभूतपिंडाकाशस्वरूपं सूत्रत्रयेण निरूपयति—

श्लोकः—यथा पिंडस्थ आकाशस्तथात्मा पूर्ण उच्यते ॥
एतदर्थविवेको यः पिंडाकाशस्थलं विदुः ॥ १ ॥

व्याख्यानं—पूर्ण आकाशः यथा पिंडे तिष्ठति तथा पिंडस्थ आत्मा पूर्ण उच्यते अस्येति शेषः अस्य ज्ञाननिष्पत्तिसंपन्नस्य शिवयोगिनो एतदर्थविवेकोऽस्ति तत्पिंडाकाशस्थलं सत् जानंतीत्यर्थः ॥ १ ॥

अर्थ—॥ १ ॥ जसें पिंडांत ब्रह्माण्ड (आकाश) आहे तसाच आत्मा हा सर्वत्र परिपूर्ण आहे. ह्या संबंधाचा जो सारासार विचार करणें त्याला पिंडाकाशस्थल ह्मणतात.

अवतरणिका—अथ व्यतिरेकमुखेनाह—

श्लोकः—घटोपाधिर्यथाकाशः परिपूर्णः स्वरूपतः ॥
तथा पिंडस्थितो ह्यात्मा परिपूर्णः प्रकाशते ॥ २ ॥

व्याख्यानं—घटोपाधिः विशिष्ट आकाशो यथा स्वस्वरूपतः पूर्णः तथा शरीरस्थ आत्मा स्वसच्चिदानंदस्वरूपतः परिपूर्णः सन् प्रकाशत इत्यर्थः ॥ २ ॥

अर्थ—॥ २ ॥ आकाशाला घट ही उपाधि आहे, वास्तविक पाहिलें तर आकाश हें सर्वत्र व्यापलेलें आहे, ह्याचप्रमाणें पिंडांत राहणारा आत्माही परिपूर्णच आहे. ह्या शरीरांतील जीव वेगळा, त्या शरीरांतील जीव वेगळा, असें ह्मणतां येत नाहीं.

अवतरणिका—अथ पिंडाकाशविवेकवंतं कथयति—

श्लोकः—अंतःस्थितं पराकाशं शिवमद्वैतलक्षणम् ॥
भावयेद्यः सुमनसा पिंडाकाशः स उच्यते ॥ ३ ॥

व्याख्यानं—"हृदयाकाशस्थितः महाचिदाकाशस्वरूपं एक एव रुद्रो न द्वितीयाय तस्थे" इति श्रुतेः अद्वितीयं शिव एको ध्येय इत्यथर्वशिखाश्रुतिप्रसिद्धपरशिवं निरालंबेन मनसा यो ध्यायेत् स पिंडाकाशस्वरूप इत्युच्यत इत्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ शिव हा अन्तर्यामीं राहतो, तो चिदंबर आहे, अद्वैत (भेदभाव नसणें) हें त्याचें लक्षण आहे. असा जो मनांत विचार करील, त्यास पिंडाकाश असें ह्मणावें.

अवतरणिका—अथ "देहः शिवालयः साक्षात्तत्रास्ते परमः शिवः ॥ इति निश्चयसद्भावः पिंडज्ञं लिंगमुच्यते" इति वातुलो-

तत्वचनानुसारेणैवं ध्यायतः शरीरमेव शिवागारं तस्य शिवो भासत इति सूत्रद्वयेन कथयति—

श्लोकः–शिवागारमिदं प्रोक्तं शरीरं बोधदीपितम् ॥
पट्त्रिंशत्तत्वघटितं सुमनः पद्मपीठकम् ॥ ४ ॥

व्याख्यानं—शिवादिभूम्यंतषट्त्रिंशत्तत्वमयस्तंभकुड्यादिनिर्मितं हृत्कमललक्षणपद्मपीठेन युक्तं ज्ञानदीपेन प्रकाशमानं इदं शरीरमेव शिवागारमिति प्रोक्तमित्यर्थः ॥ ४ ॥

अर्थ—॥ ४ ॥ आपलें शरीर हें शिवमंदिर आहे, त्यांत प्रबोध (ज्ञान) रूपी नंदादीप जळत आहे; त्या मंदिरांत छत्तीस तत्वांनीं तयार केलेलें मनोरूप कमलासन आहे.

पराकाशस्वरूपेण प्रकाशः परमेश्वरः ॥
हृदाकाशगुहालीनो दृश्यतेऽतःशरीरिणाम् ॥ ५ ॥

व्याख्यानं—चिदाकाशस्वरूपेण प्रकाशमानः परमेश्वरः प्राणिनां हृद्गुहाविलीनः सन् उपदेशसिद्धैर्दृश्यत इत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ चिदंबर स्वरूपानें प्रत्यक्ष परमेश्वर प्राणिमात्रांच्या हृदयरूप आकाशाच्या गुहेंत त्या कमलासनावर बसलेला दिसतो. (शंकर हा सर्वान्तर्यामी आहे.)

अवतरणिका–कथं दृश्यत इत्यत्र पक्षांतरेण कथयति—

श्लोकः–एतच्छिवपुरं प्रोक्तं सप्तधातुसमावृतं ॥
अत्र हृत्पंकजं वेश्म सूक्ष्मांबरमनोहरम् ॥ ६ ॥
तत्र सन्निहितं साक्षात्सच्चिदानंदलक्षणम् ॥
नित्यसिद्धः प्रकाशात्मा जलस्थाकाशवच्छिवः ॥ ७ ॥

व्याख्यानं—सप्तधातुभिः पूर्यत इत्येतच्छरीरमेव शिवपुरं पत्तनमित्यर्थः अत्र-पिंडलक्षणशिवराजधान्यां सूक्ष्मभूतांतराकाशरम्यं हृत्कमलमेवांतःपुरं तत्र नित्यपरिपूर्णत्वेन सिद्धः सन् सच्चिदानंदस्वरूपपरशिवः हृदयस्य स्वच्छत्वेन जलांतर्गताकाशवत्साक्षात्प्रकाशरूपः सन् तिष्ठतीत्यर्थः ॥ ६ ॥ ७ ॥

अर्थ–॥ ६ ॥ शरीर हें शिवनगर आहे असें मानिलें आहे, तें सातधातूंनीं (मेद, मज्जा, स्नायु, रक्त, अस्थि, वगैरे सात धातूंनीं) तयार केलेलें आहे, त्या नगरांत हृदयकमलरूपी घर असून तें सूक्ष्माकाशामुळें फार सुशोभित दिसतें (त्यांत बारीक वस्त्रांचें छत असल्यामुळें शोभतें). ॥ ७ ॥ त्या मंदिरांत

सत् चित् आणि आनंद हीं लक्षणें असलेला नित्यसिद्ध व तेजोमय शंकर पाण्यांत पडलेल्या आकाशाच्या प्रतिबिंबाप्रमाणें राहतो.

अवतरणिका–नन्वपरिच्छिन्नः परमेश्वरः कथं परिच्छिन्नहृत्कमले तिष्ठतीत्यत्र वदन् पिंडाकाशस्थलं समापयति—

श्लोकः–अंतराकाशबिंबस्थमशेषोपाधिवर्जितम् ॥
घटाकाश इव च्छिन्नं भावयेच्चिन्मयं शिवम् ॥ ८ ॥

व्याख्यानं—हृदयाकाशस्थानस्थं समस्तोपाधिरहितं चिन्मयं शिवं घटाकाश इव विच्छिन्नं विभावयेदित्यर्थः ॥ ८ ॥

इति पिंडाकाशस्थलं ॥

अर्थ–॥ ८ ॥ शिव हा हृदयाकाशामध्यें राहतो, त्याला कोणत्याही प्रकारची उपाधि नाहीं. घटाकाशाप्रमाणें तो परिच्छिन्न आहे. असें मनांत आणावें.

अथ बिंद्वाकाशस्थलम् ॥

अवतरणिका–अथ "सदाशिवादितत्वानां कारणं व्यापकः परः ॥ बिंदुरूपः शिवो ध्येयो बिंद्वाकाश इतीर्यते" इति किरणागमवचनानुसारेण तत्पिंडाकाशस्थलसंपन्नस्य सुलभीभूतबिंद्वाकाशस्थलं निरूपयति—

श्लोकः–यथाकाशो विभुर्ज्ञेयस्सर्वप्राण्युपरि स्थितः ॥
तथात्मेत्युपमानार्थं बिंद्वाकाशस्थलं विदुः ॥ १ ॥

व्याख्यानं—सर्वप्राण्युपरि वर्त्याकाशो यथा विभुः सन् ज्ञातुं योग्यः तथास्य पिंडाकाशस्थलसंपन्नस्य शिवयोगिन आत्मा सर्वप्राण्युपरि वर्त्याकाशवद्व्यापकीभूतः सन् विज्ञातुं योग्य इत्युपमानार्थं एव बिंद्वाकाशस्थलं विदुः जानंतीत्यर्थः॥१॥

अर्थ–॥ १ ॥ ज्याप्रमाणें आकाश हें श्रेष्ठ असून सर्व प्राणिमात्रांच्या मस्तकावर राहतें; त्याप्रमाणें आत्मा हा प्रत्येक प्राणिमात्राच्या हृदयांत राहतो. हें समजणारास बिंद्वाकाशस्थलें असें ह्मणतात.

अवतरणिका–अथ "वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ॥ एकस्तथा सर्वभूतांतरात्मा रूपं रूपं प्रतिरूपो बहुश्च" इति कठवल्लीश्रुत्युक्तदृष्टांतपूर्वकं चतुर्भिः सूत्रैस्तदेव प्रतिपादयति—

श्लोकः–यथैको वायुराख्यातः सर्वप्राणिगतो विभुः ॥

तथात्मा व्यापकः साक्षात्सर्वप्राणिगतः स्वयम् ॥ २ ॥

व्याख्यानं—समस्तप्राणिनां प्राणरूपं गतः वायुरेक एव व्यापकः सन्नाख्यातः तथाहमिति स्वयं साक्षात्सर्वप्राणिगत आत्मा व्यापक इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ जसा वायु हा एक असून तो शक्तिमान् आहे, व सर्व प्राणिमात्रांच्या अन्तर्बाह्य भरलेला आहे, तसाच आत्मा हा व्यापक असून सर्व प्राणिमात्रांच्या हृदयांत पूर्णपणें भरलेला आहे.

यथा वह्निरमेयात्मा सर्वत्रैकोऽपि भासते ॥
तथा शंभुस्समस्तात्मा परिच्छेदविवर्जितः ॥ ३ ॥

व्याख्यानं—अपरिमितस्वरूपवानेकोऽग्निः यथासारवैद्युतपार्थिववाडवकालाग्निरूपेण विश्वव्यापकः सन् भासते तथा सर्वचैतन्यात्मकश्चिद्वह्निरूपपरमेश्वर एक एव देवदानवमानवतिर्यक्स्थावररूपचराचरप्राणिषु अहमिति व्यक्ताव्यक्तरूपेण व्यापकः सन्विराजत इत्यर्थः ॥ ३ ॥

अर्थ-॥ ३ ॥ विस्तवाचें तेज अलौकिक आहे, तें एकच आहे तरी सर्व ठिकाणीं असल्याचें अनुभवास येतें. त्याप्रमाणेंच शंकर सर्वप्राणिमात्रांच्या हृदयांत पूर्णपणानें भरलेला आहे. त्याचे भाग भाग मुळींच होत नाहींत, तो अखंड आहे.

सर्वेषां देहिनामंतश्चित्ततोयं प्रकाशते ॥
तस्मिन्प्रतिफलत्यात्मा शिवो दर्पणवद्विभुः ॥ ४ ॥

व्याख्यानं—समस्तदेहिनामंतः "चित्तं तु चेतो हृदयं कमलं सलिलं जलमित्यभिधानकोशप्रसिद्धहृदयकमलं दर्पणवत्प्रकाशते तस्मिन् चित्तदर्पणे व्यापकीभूतः शिवः आत्मा सन् प्रतिफलतीत्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ सर्व प्राणिमात्रांच्या हृदयांत चित्तरूप जल रहात आहे. जसें आरशांत रूप पाहणाऱ्याचें प्रतिबिंब दिसतें, त्याचप्रमाणें चित्तरूप जलामध्यें आत्म्याचें प्रतिबिंब दिसतें.

एको वशीकृतः संवित्प्रकाशात्मा परात्परः ॥
सर्वप्राणिगतो भाति तथापि विभुरुच्यते ॥ ५ ॥

व्याख्यानं—विश्वोत्कृष्टपराशक्त्यपेक्षया श्रेष्ठश्चित्प्रकाशात्मा शिव एक एव सर्वप्राणिहृदयकमलं गत्वा तत्परिमितः सन् भाति तथा सर्वानुस्यूतत्वाद्विभुरित्युच्यत इत्यर्थः ॥ ५ ॥

अर्थ-॥ ५ ॥ शिव एक आहे, जितेंद्रिय आहे, ज्ञानस्वरूप आहे, श्रेष्ठाहून श्रेष्ठ आहे, सर्व प्राणिमात्रांच्या हृदयकमळांत राहतो असा दिसतो तरी व्यापक आहे.

अवतरणिका–अथ बिंद्वाकाशस्थलं समापयति—

श्लोकः–एक एव यथा सूर्यस्तेजसा भाति सर्वगः ॥
तथात्मा शक्तिभेदेन शिवः सर्वगतो भवेत् ॥ ६ ॥

व्याख्यानं—सूर्य एक एव स्वकीयवृष्टिहिमोष्णकिरणतेजसा व्यापकः सन् यथा भाति तथा शिवस्वरूप आत्मा स्वकीयेच्छाज्ञानादिशक्तिभिर्विश्वव्यापकः सन्नास्त इत्यर्थः ॥ ६ ॥

इति बिंद्वाकाशस्थलम् ॥

अर्थ–॥ ६ ॥ सूर्य हा एकच आहे, तरी तो आपल्या तेजामुळें सर्व ठिकाणीं आहेच असें वाटतें; तसाच शंकर आपल्या अलौकिक सामर्थ्यामुळें स्वकीय इच्छा ज्ञानादि शक्तींनीं विश्वव्यापक होऊन राहतो.

अथ महाकाशस्थलम् ॥

अवतरणिका–अथ "व्योमाकारं महासूक्ष्मं व्यापकं यो न भावयेत् । संसारी स भवेल्लोके बीजकोशक्रिमिर्यथा" इति देविकालोत्तरवचनानुसारेणोक्तलक्षणबिंद्वाकाशस्थलसंपन्नस्य सुलभं महाकाशस्थलं सूत्रद्वयेन कथयति—

श्लोकः–पिंडांडस्थं यथाकाशं न भिन्नं तद्वदात्मनः ॥
अभिन्नः परमात्मेति महाकाशस्थलं विदुः ॥ १ ॥

व्याख्यानं—ब्रह्मांडपिंडांडगतमाकाशं यथा न भिन्नं तथास्य बिंद्वाकाशसंपन्नस्य शिवयोगिनः आत्मनश्चैतन्यात् परमात्मा भिन्नो नेत्यभिदमेव महाकाशस्थलं सत् जानंतीत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ ब्रह्माण्डांत आणि पिंडांडांत व्यापलेलें आकाश जसें भिन्न नाहीं, तसाच बिंद्वाकाशसंपन्न शिवयोग्याच्या चैतन्याहून परमात्मा भिन्न नाहीं; ह्या अभेदालाच महाकाशस्थल ह्मणतात.

श्लोकः–यथा न भिन्नमाकाशं घटेषु च मठेषु च ॥
तथांडेषु च पिंडेषु स्थितो ह्यात्मा न भिद्यतः ॥ २ ॥

व्याख्यानं—स्पष्टं ॥ २ ॥

अर्थ–॥ २ ॥ आकाश हें घागरींत थोडें आणि घरांत थोडें असें वांटलें गेलें आहे; तरी तें छिन्नभिन्न होत नाहीं, तें एकच आहे. त्याचप्रमाणें जगांतील सर्वप्राण्यांमध्यें आणि एका प्राण्यामध्यें आत्मा भरलेला आहे, तरी तो छिन्नभिन्न होत नाहीं; तो एकच आहे.

अवतरणिका–अथ महालिंगमेव महाकाशमिति सूत्रत्रयेण कथयति—

श्लोकः–अनिर्देश्यमनौपम्यमवाङ्मानसगोचरम् ॥
सर्वतोमुखसंपन्नं सत्तानंदं चिदात्मकम् ॥ ३ ॥
कालातीतं कलातीतं क्रमयोगादिवर्जितम् ॥
स्वानुभूतिप्रमाणस्थं ज्योतिषामुदयस्थलम् ॥ ४ ॥
शिवाख्यं परमं ब्रह्म परमाकाशलक्षणम् ॥
लिंगमित्युच्यते सद्भिर्यद्विना न जगत्स्थितिः ॥ ५ ॥

व्याख्यानं—कलातीतं अष्टत्रिंशत्कलातीतं क्रमयोगविवर्जितम् उत्पत्त्यादिक्रमयोगरहितं ज्योतिषामुदयस्थलं अर्कादिज्योतिषामुत्पत्तिस्थानं अहमिति स्वानुभूतिप्रमाणगम्यमित्यर्थः शिष्टं स्पष्टं ॥ ३ ॥ ४ ॥ ५ ॥

अर्थ–॥ ३ ॥ चित्स्वरूप अमुक प्रकारचें आहे ह्मणून सांगतां येत नाहीं, त्याची बरोबरी करील असा त्रैलोक्यांत एक देखील पदार्थ नाहीं. वाचेस आणि मनास त्याचें वर्णन करितां येत नाहीं, त्याला सर्व बाजूंस मुखें आहेत, व तें सत्तास्वरूप आनंदस्वरूप आणि ज्ञानस्वरूप आहे. ॥ ४ ॥ ज्ञानस्वरूप कालाहून अतीत आहे (अनादिकालापासून आहे), कलांहून अतीत आहे (निष्कल आहे). त्याला क्रम आणि योग वगैरे नाहींत. तें स्वानुभवावरून प्रमाण करितां येणारें आहे. तें तेजस्वी पदार्थांस तेजस्वी करणारें आहे. ॥ ५ ॥ त्याला शिव असें नांव आहे, तें परब्रह्मस्वरूप आहे. चिदंबर हें त्याचें लक्षण आहे. त्याला विद्वान् लोक महालिंग असें ह्मणतात. त्याच्या आश्रयानें सर्वत्रैलोक्य राहतें. त्याचे आश्रयाखेरीज त्रैलोक्यास राहतां येत नाहीं.

अवतरणिका–अथोक्तमर्थमेव सूत्रद्वयेन विशेषयति—

श्लोकः–परमाकाशमव्यक्तं प्रबोधानंदलक्षणम् ॥
लिंगज्योतिर्मयं प्राहुर्लीयंते यत्र योगिनः ॥ ६ ॥

व्याख्यानं—यत्र महाकाशे शिवयोगिनः लीयंत इति तं महाकाशमव्यक्तं मंदभाग्यैर्गंतुमशक्यं सच्चिदानंदलक्षणं ज्योतिर्मयं लिंगमिति संतः प्राहुरित्यर्थः ॥६॥

अर्थ–॥ ६ ॥ तें महाकाश आहे (मोठें आकाश आहे), तें स्पष्ट दिसत नाहीं, ज्ञान आणि आनंद हें त्या ज्ञानस्वरूपाचें लक्षण आहे (तें ज्ञानमय आणि

आनंदमय आहे). तें लिंगस्वरूप असून तेजःपुंज आहे. त्या ज्ञानस्वरूपांत योगीश्वर निमग्न होतात. (योगीश्वर त्या ज्ञानस्वरूपाचें नेहमीं ध्यान करितात.)

श्लोकः–संविदेव परा काष्ठा परमानंदरूपिणी ॥

तामाहुः परमाकाशं मुनयो मुक्तसंशयाः ॥ ७ ॥

व्याख्यानं—विगतसंशयाः वसिष्ठादिमुनयः यं महाकाशमाहुः किमित्याहुरित्यत्र तन्महाकाशं परमानंदरूपिणी सर्वोत्कृष्टा चितिरेवेत्याहुरित्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ ज्ञान हीच मोठी मर्यादा आहे, ज्ञान अतिशय आनंद देणारें आहे, निःसंशय झालेले सर्व मुनीश्वर त्या ज्ञानशक्तीलाच परम आकाश असें ह्मणतात.

अवतरणिका—अथ तस्मिन्महाकाशे जगज्जालस्याभेदं दृष्टांतपूर्वकं दर्शयति—

श्लोकः–तरंगादि यथा सिंधोः स्वरूपान्नातिरिच्यते ॥

तथा शिवाच्चिदाकाशाद्विश्वमेतन्न भिद्यते ॥ ८ ॥

व्याख्यानं—स्पष्टं ॥ ८ ॥

अर्थ–॥ ८ ॥ समुद्राच्या पाण्याहून लाटावगैरे जशा वेगळ्या नव्हेत, एकच आहेत; त्याप्रमाणें ज्ञानस्वरूप शिवाहून त्रैलोक्य हें वेगळें नाहीं; त्रैलोक्य हें शंकराचेंच स्वरूप आहे.

अवतरणिका–अथ पुनर्दृष्टांतरमाह—

श्लोकः–यथा पुष्पपलाशादि वृक्षरूपान्न भिद्यते ॥

तथा शिवात्पराकाशाज्जगतो नास्ति भिन्नता ॥ ९ ॥

व्याख्यानं—स्पष्टं ॥ ९ ॥

अर्थ–॥ ९ ॥ जसें फूल पान वगैरे झाडाहून कांहीं वेगळें नाहीं, ते सर्व झाडाचेच अवयव आहेत. त्याप्रमाणेंच शिव हा परस्वरूप असल्यामुळें त्याच्यांत आणि जगांत कांहींएक निराळेपणा नाहीं.

अवतरणिका–ननु चिदाकाशस्य निरवयवत्वात् कथं तत्र विश्वं स्थितं सत्प्रकाशत इत्यत्राह—

श्लोकः–यथा ज्योतींषि भासंते भूताकाशे पृथक् पृथक् ॥

तथा भांति पराकाशे ब्रह्मांडानि विशेषतः ॥ १० ॥

व्याख्यानं—ज्योतींषि नक्षत्राणीत्यर्थः शिष्टं स्पष्टं ॥ १० ॥

अर्थ-॥ १० ॥ जशीं आकाशांत वेगळीं वेगळीं नक्षत्रें दिसतात, तशींच पराकाशांत (परमेश्वराच्या स्वरूपांत) अनेक ब्रह्माण्डें शोभतात.

अवतरणिका-अथ तमेवाथ बंधविशेष्यमहाकाशस्थलं समापयति—

श्लोकः-निरस्तोपाधिसंबंधं निर्मलं, संविदात्मकम् ॥
पराकाशं जगच्चित्रं विलासालंबभित्तिकः ॥ ११ ॥

व्याख्यानं—उक्तविशेषणविशिष्टपराकाशं जगज्जालरूपचित्रविलासस्याधारभूतमित्यर्थः एतत्पिंडकाशादिलिंगत्रयं शरणस्यांगत्रयस्य संयोजनीयम् ॥ ११ ॥

इति महाकाशस्थलं ॥

अर्थ-॥ ११ ॥ त्या पराकाशास (शिवस्वरूपास) उपाधींचा मुळींच कांहींएक संबंध नसतो, तें निर्मळ आणि ज्ञानस्वरूप आहे, तें अलौकिक आहे. जगज्जालरूप चित्रास परमेश्वर हा भिंती सारखा आधार आहे.

अथ क्रियाप्रकाशस्थलं ॥

अवतरणिका-"अथ क्रियावंतः श्रोत्रिया ब्रह्मनिष्ठा" इति मुंडकश्रुत्यनुसारेण "मोक्षप्रदं चैहिकसौख्यदं च सर्वोत्तरं शांकरकर्म सत्यं" इति योगजागमवचनानुसारेण च महाकाशस्वरूपशिवयोग्येव तत्स्वरूपानुसंधानरूपक्रियाप्रकाशवानिति कथयति-

श्लोकः-शिवस्य परिपूर्णस्य चिदाकाशस्वरूपिणः ॥
आत्मत्वेनानुसंधानात्क्रियाद्योतनवान्यमी ॥ १ ॥

व्याख्यानं—महाकाशस्वरूपः शिवयोगी परिपूर्णचिदाकारमहाकाशस्वरूपिणः शिवस्य स्वात्मत्वेनानुसंधानरूपक्रियावानिति क्रियाप्रकाशनवानित्युच्यत इत्यर्थः॥ १॥

अर्थ-॥ १ ॥ शंकर हा परिपूर्ण आहे आणि ज्ञानाकाशस्वरूप आहे, तो आणि मी एकच आहोंत असें नेहमीं मनांत जो ध्यान करतो, त्या शिवयोग्यास क्रियाप्रकाशस्थल असें ह्मणावें.

अवतरणिका—अथ "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्वेताश्वतरश्रुत्यनुसारेण "ज्ञानक्रियात्मिका सापि सत्या नित्योदितप्रभा। अनन्या स्याच्छि-

वात्सैवं वस्तुतो मूर्तिरैश्वरी" इति पौष्करवचनानुसारेण च तदनु-संधानक्रियामेव सूत्रत्रयेणोपपादयति—

श्लोकः-निष्कलंकचिदानंदगगनोपमरूपिणः ॥
शिवस्य परिपूर्णस्य वृत्तिश्चैतन्यरूपिणी ॥ २ ॥

व्याख्यानं—एवमुक्तरूपस्य शिवस्य वृत्तिः अस्तीति क्रियारूपा स्थितिः चैतन्यरूपिणी शिववच्चित्स्वरूपिणीत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ शिव निष्कलंक व ज्ञानस्वरूप आहे, आनंदस्वरूप असून आकाशाप्रमाणें सर्वत्र व्यापलेला आहे व परिपूर्ण आहे. त्याची वृत्ति (क्रिया) ही चैतन्यस्वरूप आहे.

अवतरणिका-अथ शिवयोगिनः स्वरूपामर्शनक्रियापि तादृशीत्याह—

श्लोकः-निष्कलंके निराकारे नित्ये परमतेजसि ॥
विलीनचित्तवृत्तस्य तथा शक्तिः क्रियोच्यते ॥ ३ ॥

व्याख्यानं—उक्तरूपे परशिवतेजसि विलीनचित्तव्यापारस्य शिवयोगिनः अनुसंधानरूपा या क्रियाशक्तिः तथा परशिवतेजोरूपिणीत्युच्यत इत्यर्थः ॥ ३ ॥

अर्थ-॥ ३ ॥ शंकर हा निष्कलंक आहे, निराकार आहे (त्यास आकार नाहीं). तो शाश्वत आहे, व मोठा तेजस्वी आहे, त्या शिवस्वरूपांत निमग्न झालेल्या शिवयोग्याची जी शक्ति असते तिला क्रिया असें ह्मणतात.

अवतरणिका-ननु किं तदनुसंधानेनेत्यत्राह—

श्लोकः-सर्वज्ञः सर्वकर्ता च सर्वगः परमेश्वरः ॥
तदैक्यचिंतया योगी तादृशात्मा प्रकाशते ॥ ४ ॥

व्याख्यानं—"सर्वज्ञः पंचकृत्यसंपन्नः सर्वेश्वर ईश्वर" इति वृद्धजाबालश्रुतेः परमेश्वरः सर्वज्ञः सर्वकर्ता सर्वव्यापक इति बुद्ध्वा योगी शिवयोगी समानसमरसैक्यध्यानेन तादृगात्मा तत्प्रकारस्वरूपवान् प्रकाशत इत्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ शंकर हा सर्व कांहीं जाणणारा आहे, सर्व कांहीं करणारा आहे, सर्व ठिकाणीं त्याचें गमन आहे, तो परमेश्वर आहे त्याबरोबर माझें ऐक्य व्हावें अशी निरंतर शिवयोग्यानें भावना केली ह्मणजे तो स्वतःच शिवस्वरूप होऊन शोभूं लागतो.

अवतरणिका–ननु शिवयोगिन इंद्रियव्यापारस्य विद्यमानत्वात् कथं शिवं पश्यतीत्याह—

श्लोकः–सर्वेंद्रियाणां व्यापारे विद्यमानेऽपि संयमी ॥
प्रत्युन्मुखेन मनसा शिवं पश्यन् प्रमोदते ॥ ५ ॥

व्याख्यानं—प्रत्युन्मुखेन पश्चिमचक्राभिमुखेन मनसेत्यर्थः ॥ शिष्टं स्पष्टं ॥ ५ ॥

अर्थ–॥ ५ ॥ सर्व इंद्रियांचे व्यापार चालले असले तरी संयमी (शिवयोगी) शिवस्वरूपाकडे आपलें लक्ष्य लाऊन नेहमीं आनंदांत राहतो.

अवतरणिका–अथ कीदृशं शिवं कथं पश्यन् मोदत इत्यत्राह—

श्लोकः–कूटस्थमचलं प्राज्ञं गुणातीतं गुणोत्तरम् ॥
शिवतत्वं स्वरूपेण पश्यन् योगी प्रमोदते ॥ ६ ॥

व्याख्यानं—गुणोत्तरम् ज्ञानवैराग्यादिगुणैः श्रेष्ठं प्राज्ञं कुशलिनं कूटस्थं तुर्यसाक्षिकप्रत्यगात्मादिसंज्ञितं गुणातीतं मायिकसत्वादिगुणातीतं अचलं शिवतत्वं स्वरूपेण स्वस्वरूपेण पश्यन् शिवयोगी प्रमोदत इत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ शंकर हा कूटस्थ आहे, अचल (निश्चल) आहे, तो मोठा ज्ञाता असून गुणांहून अतीत आहे, (गुणांच्याही पूर्वीपासून आहे), व मोठा गुणवान् आहे. त्या शंकराचें तत्व (रहस्य) यथार्थरीतीनें पाहणारा शिवयोगी आनंदांत निमग्न असतो.

अवतरणिका–अथ चित्क्रियारूपस्वस्वरूपसंपन्नस्य शिवयोगिनः गगनतलभासमानगंधर्वनगरीव सर्वा क्रिया तावदस्थिरेति वदन्प्रकाशत इति प्रोक्तं क्रियाप्रकाशस्थलं समापयति—

श्लोकः–परात्मनि क्रिया सर्वा गंधर्वनगरी मुखे ॥
प्रकाशत इति प्रोक्तं क्रियायास्तु प्रकाशनम् ॥ ७ ॥

व्याख्यानं—परात्मनि परशिवस्वरूपशिवयोगिविषये सर्वा क्रिया व्योम्नि गंधर्वनगरीव प्रकाशत इति क्रियायाः प्रकाशनं तु क्रियाप्रकाशनस्थलमिति प्रोक्तमित्यर्थः ॥ ७ ॥

इति क्रियाप्रकाशनस्थलं ॥

अर्थ–॥ ७ ॥ परस्वरूप शिवयोग्यामध्यें सर्वक्रिया आकाशांत गंधर्वनगर जसें शोभतें तशा शोभतात; म्हणून त्यास क्रियाप्रकाशनस्थल असें म्हणतात.

अथ भावप्रकाशस्थलम् ॥

अवतरणिका—अथ "स्वद्रयापूर्णभावस्य स्वेनैवापिच पितस्य च। तस्यैव भासते भावे सोऽयमादिमहेश्वरः' इति योगजागमवचनानुसारेण तत्क्रियाप्रकाशनसंपन्नस्य शिवयोगिनः सुलभाभावप्रकाशस्थलं निरूपयति—

श्लोकः—तरंगाद्या यथा सिंधौ न भिद्यंते तथात्मनि ॥
भावबुद्ध्यादयः सर्वे यत्तद्भावप्रकाशनम् ॥ १ ॥

व्याख्यानं—तरंगफेनादयो भावा यथा समुद्रे न भिद्यंते तथा सर्वे बुध्यादयो भावाः आत्मनि क्रियाप्रकाशसंपन्ने शिवयोगिचैतन्ये न भिद्यंत इति यत् तद्भावप्रकाशनं स्यादित्यर्थः ॥ १ ॥

अर्थ—॥ १ ॥ समुद्रांत वारंवार अनेक लाटा उसळतात, तरी त्या लाटा आणि समुद्राचें पाणी एकच आहेत, त्यांत कांहीं निराळेपणा नाहीं, त्याप्रमाणें क्रियासंपन्न शिवयोग्याच्या चैतन्यामध्यें भावबुद्धिवगैरे उत्पन्न होतात, परंतु आत्मा आणि भावबुद्धि वगैरे कांहीं वेगळें नाहीं सर्व एकच आहे. त्यालाच भावप्रकाशनस्थल ह्मणतात.

अवतरणिका—अथ तद्भावानां पंचभिः सूत्रैर्विशेषयति—

श्लोकः—शिव एव जगत्सर्वं शिव एवाहमित्यपि ॥
भावयन् परमो योगी भवदोषैर्न बाध्यते ॥ २ ॥

व्याख्यानं—सर्वं जगच्छिव एव तस्मादहमपि शिव एवेति भावयन्महाशिवयोगी संसारिकदोषैर्न बाध्यत इत्यर्थः ॥ २ ॥

अर्थ—॥ २ ॥ सर्व जग हें शंकरच आहे व मी देखील शंकरच आहें, अशी नेहमीं मनांत भावना करणाऱ्या शिवयोग्याला संसाराची कांहींच पीडा होत नाहीं.

शिवभावे स्थिरे जाते निर्लेपस्य महात्मनः ॥
ये ये भावाः समुत्पन्नास्ते ते शिवमयाः स्मृताः ॥ ३ ॥

व्याख्यानं—निर्लेपस्य विषयेषु लेपरहितस्येत्यर्थः शिष्टं स्पष्टं ॥ ३ ॥

अर्थ—॥ ३ ॥ शिव हा श्रेष्ठ असून निर्विकार आहे. त्या शिवाविषयीं भाव (भक्ति) स्थिर झाला असतां जे जे भाव उत्पन्न होतात, तें ते सर्व शिवस्वरूपच असतात.

अवतरणिका–अथ ते के भावा इत्यत्राह—

श्लोकः–अद्वितीयशिवाकारभावनाध्वस्तकर्मणा ॥
न किंचिद्भाव्यते साक्षात् शिवादन्यन्महात्मना ॥ ४ ॥

व्याख्यानं—एवं रूपेण शिवयोगिना यद्यद्भाव्यते तत्सर्वं शिवमयमिति भावः॥४॥

अर्थ–॥ ४ ॥ शिवाखेरीज दुसरें कांहींएक नाहीं, अशी शिवाकार भावना झाल्यामुळें ज्याच्या सर्वकर्मांचा नाश झाला आहे; तो महात्मा शिवयोगी शिवाखेरीज दुसरें कांहीएक मनांत आणीत नाहीं.

अवतरणिका–अथ तत्कथमित्यत्राह—

श्लोकः–गलिताज्ञानबंधस्य केवलात्मानुभाविनः ॥
यत्र यत्रेंद्रिया शक्तिस्तत्र तत्र शिवात्मता ॥ ५ ॥

व्याख्यानं—उक्तरूपस्य योगिनः यत्र यत्र भावरूपेंद्रिया शक्तिस्तत्र तत्र भावमयशिवात्मतेत्यर्थः ॥ ५ ॥

अर्थ–॥ ५ ॥ ज्याचा अज्ञानपणाचा पाश नाहींसा झाला आहे, फक्त आत्मानुभव सुखाचाच जो उपभोग घेतो, त्या शिवयोग्याचें जें जें इंद्रिय ज्या ज्या वस्तूकडे जाईल तेथें तेथें त्यास शिवस्वरूपच आहे असें वाटतें.

अवतरणिका–ननु रागद्वेषादिभावानां बंधहेतुत्वात्कथं शिवमय इत्यत्राह—

श्लोकः–रागद्वेषादयो भावाः संसारक्लेशकारणम् ॥
तेषामुपरमो यत्र तत्र भावः शिवात्मकः ॥ ६ ॥

व्याख्यानं—यत्र शिवयोगिनि बंधकारणीभूतरागद्वेषादिभावानामुपरमोऽस्ति तत्र तस्मिन् शिवयोगिनि भावः शिवात्मक इत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ राग (प्रीति) वैर वगैरे विकार संसारदुःख देण्यास कारण आहेत (त्या विकारांमुळें संसारदुःख भोगावें लागतें.) ह्यास्तव शिवयोग्याचे ते विकार नाहींसे झाले असल्यामुळें शिवयोग्याचे भाव शिवस्वरूपच आहेत.

अवतरणिका–तस्मादीदृशं शिवयोगिनं तामसी शक्तिर्नाक्रमतीति वदन् भावप्रकाशस्थलं समापयति—

श्लोकः–यथा सूर्यं समाक्रांतौ न शक्नोति तमः सदा ॥
तथा प्रकाशमात्मानं नाविद्या क्रमति स्वयम् ॥ ७ ॥

व्याख्यानं—अंधकारो यथा सूर्यमावरितुं न समर्थः तथा प्रकाशमात्मानं

स्वच्छप्रकाशरूपं शिवयोगिनं अज्ञानलक्षणं तम आवरितुं न समर्थमित्यर्थः ॥ ७ ॥

इति भावप्रकाशनस्थलम् ॥

अर्थ–॥ ७ ॥ सूर्याचा पराजय करण्याची जशी अंधकाराची शक्ति होत नाहीं, तसें शिवज्ञान झालेल्या शिवयोग्यास वश करण्याची अविद्येस (अज्ञानास) शक्ति होत नाहीं. (अज्ञानाच्यानें शिवज्ञानी आत्म्यास वश करवत नाहीं.

अथ ज्ञानप्रकाशस्थलम् ॥

अवतरणिका–अथ "गवामनेकवर्णानां क्षीरस्याप्येकवर्णता ॥ क्षीरवत्पश्यते ज्ञानं लिंगिनस्तु गवां यथा" इत्यमृतबिंदूपनिषद्वचनानुसारेण "शिवादिस्मरणं ज्ञानं ज्ञानात्सत्ता प्रकाशते ॥ सत्तयानंदसंप्राप्तिरानंदाच्चैव सिद्धिदः" इति योगजागमवचनानुसारेण च तद्भावप्रकाशनसंपन्नस्य शिवयोगिनः सुलभं ज्ञानप्रकाशं निरूपयति––

श्लोकः–मुख्यार्थेऽसंभवे जाते लक्षणायोगसंश्रयात् ॥
तज्ज्ञानयोजनं यत्तदुक्तं ज्ञानप्रकाशनम् ॥ १ ॥

व्याख्यानं—मुख्यार्थे अंगलिंगयोर्मुख्यार्थे असंभवे जाते सति अघटिते जाते सति लक्षणायोगसंश्रयात् कार्यकारणोपाधिविशिष्टजीवेश्वरसंज्ञकांगलिंगयोर्लक्षणा योगसमाश्रयणेन । तज्ज्ञानयोजनं यत् तदंगलिंगनिष्ठज्ञानद्वयस्य समानसमरसभावेन संयोजनं यदस्ति तत् तस्य भावप्रभावप्रकाशनसंपन्नस्य शिवयोगिनो ज्ञानप्रकाशनमित्युक्तं भवति अयं भावः घटावच्छिन्नाकाशमहाकाशवत् कूटस्थपरचैतन्यस्य नित्यसंबंध एव लक्षणार्थः घटजलावच्छिन्नाकाशमेघजलावच्छिन्नाकाशयोरिवांगलिंगयोरुपाधिरेव मुख्यार्थं तच्चैतन्यसामरस्यज्ञानमेव ज्ञानप्रकाश इति ॥ १ ॥

अर्थ–॥ १ ॥ लक्षणा आणि योग ह्यांच्या साधनानें तात्पर्यार्थ समजून चुकला असतां त्यामुळें जें ज्ञान वाढतें त्या ज्ञानसंबंधास ज्ञानप्रकाशनस्थल असें ह्मणतात.

अवतरणिका–अथ तदेव सूत्रत्रयेण विशेषयति—

श्लोकः–मुक्तस्य ज्ञानसंबंधो ज्ञेयाभावः स्वभावतः ॥
उपाधिसहितं ज्ञानं न भेदमतिवर्तते ॥ २ ॥

व्याख्यानं—मुक्तस्य परमुक्तस्य लक्षणार्थकज्ञानसंबंधः स्वभावतः ज्ञेयाभावः आत्माश्रयादिदोषराहित्येन ज्ञेयशून्यः वेदशून्य इत्यर्थः उपाधिसहितं ज्ञानं तस्य

परमुक्तस्य मुख्यार्थभूतलिंगांगोपाधिविशिष्टज्ञानं भेदं नातिवर्तते भेदमनतिक्रम्य वर्तते उपाधिनाश एव ज्ञानसामरस्यमित्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ मुक्त झालेल्या शिवयोग्याचें ज्ञान इतकें विलक्षण असतें कीं, त्यास जात्या जाणावयाचें असें कांहींच नसतें, सर्व त्यास समजलेंच असतें. ज्या ज्ञानाला उपाधि आहे त्या ज्ञानानें भेदबुद्धि (द्वैतभावना) दूर करितां येत नाहीं.

ज्ञानमित्युच्यते सद्भिः परिच्छेदोऽपि वस्तुनः ॥
परात्मस्य परिच्छेदे कुतो ज्ञानस्य संभवः ॥ ३ ॥

व्याख्यानं—वस्तुनः लिंगांगरूपवस्तुनः परिच्छेदः खंडितत्वं ज्ञानमिति द्वैतज्ञानमिति सद्भिः सत्पुरुषैः उच्यते अपरिच्छेदे अखंडिते परात्मनि निरुपाधिकमहाचैतन्ये हि द्वैतप्रसिद्धस्य ज्ञानस्य संभवः उद्भवः कुतः नास्तीत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ लिंगांगरूपवस्तूच्या खंडितत्वाला ज्ञाते लोक द्वैतज्ञान ह्मणतात. अखंड निरुपाधिक महाचैतन्याच्या ठिकाणीं द्वैतज्ञानाची उत्पत्ति कोठून होईल? मुळींच होणार नाहीं.

ज्ञानस्याविषये तत्वे शिवाख्ये चित्सुखात्मनि ॥
आत्मैकत्वानुसंधानं ज्ञानमित्युच्यते बुधैः ॥ ४ ॥

व्याख्यानं—ज्ञानस्य स्वप्रकाशत्वात् स्वातिरिक्तसंविदंतरस्य अविषये अगोचरे चित्सुखात्मनि चिदानंदस्वरूपे शिवाख्ये परशिवाख्ये तत्वे वस्तुनि आत्मैकत्वानुसंधानं स्वात्मन एकत्वानुसंधानं ज्ञानमिति बुधैः विद्वद्भिरुच्यत इत्यर्थः ॥ ४ ॥

अर्थ–॥ ४ ॥ शिवनांवाचें चैतन्यस्वरूप व सुखस्वरूप असणारें तत्वज्ञानशक्तीनें समजून येण्यासारखें नाहीं तें अगम्य आहे. आत्मा आणि परमात्मा एकच आहे असें अनुसंधान करणें ह्यालाच ज्ञाते लोक ज्ञान असें ह्मणतात.

अवतरणिका–तच्छिवज्ञानमेव ब्रह्मज्ञानमिति सूत्रत्रयेण कथयति—

श्लोकः–अपरिच्छिन्नमानंदं सत्ताकारं जगन्मयम् ॥
ब्रह्मेति लक्षणं ज्ञानं ब्रह्मज्ञानमिहोच्यते ॥ ५ ॥

व्याख्यानं—सत्तामनतिक्रांतत्वाद्विश्वस्य तन्मयत्वमित्यर्थः स्वरूपतो ह्यसतः सत्तासंबंधसंभवात् स्वरूपतः सतः सत्तांतरानपेक्षणात् सद्रूपत्वमेवेति निष्कर्षः शिष्टं स्पष्टं ॥ ५ ॥

अर्थ–॥ ५ ॥ ज्याचा आनंद अपरंपार आहे, ज्याची सत्ता मोठी आहे,

सर्व त्रैलोक्याचा ज्याच्या स्वरूपांत समावेश होतो, ब्रह्म हें ज्याचें लक्षण आहे त्यास ब्रह्मज्ञान असें ह्मणतात.

ब्रह्मज्ञाने समुत्पन्ने विश्वोपाधिविवर्जिते ॥
सर्वं संविन्मयं भाति तदन्यन्नैव दृश्यते ॥ ६ ॥

व्याख्यानं—विश्वोपाधिविवर्जिते विश्वभेदरहिते ब्रह्मज्ञाने समुत्पन्ने आविर्भूते सति सर्वं विश्वं संविन्मयं भाति चिच्छक्तिमयमिति भाति तदन्यत् शिवशक्त्यो-रभेदात् तदन्यत् ब्रह्मातिरिक्तं न दृश्यत इत्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ तें ब्रह्मज्ञान उत्पन्न झाल्यावर जगाची कोणतीही उपाधि राहत नाहीं जिकडे पाहावें तिकडे ज्ञानमय शिवस्वरूपच दिसूं लागतें त्याखेरीज दुसरें कांहींएक दिसत नाहीं.

तस्मादद्वैतविज्ञानमपवर्गस्य कारणम् ॥
भावयन् सततं योगी संसारेण न लिप्यते ॥ ७ ॥

व्याख्यानं—तस्मादपवर्गस्य परापरमोक्षस्य कारणं शिवाद्वैतज्ञानं सततं भावयन् शिवयोगी संसारेण न लिप्यते इत्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ ह्यासाठीं शिवाद्वैताचें ज्ञान होणें हें मोक्षप्राप्तीचें कारण आहे (शिवाद्वैतज्ञान झाल्यानें मोक्ष मिळतो) असें नेहमीं मनांत आणून त्याप्रमाणें शिवयोग्यानें वर्तन ठेविलें ह्मणजे त्यास पुन्हां संसारदुःख भोगावें लागत नाहीं.

अवतरणिका–अथ ज्ञानप्रकाशस्थलं समापयति—

वृत्तं ॥–नित्ये निर्मलसत्वयोगिषु परे निर्वासने निष्कले
सर्वातीतपदे चराचरमये सत्तात्मनि ज्योतिषि ॥
संविद्व्योम्नि शिवे विलीनहृदयस्तद्भेदवैमुख्यतः
साक्षात्सर्वगतो विभाति विगलद्विश्वः स्वयं संयमी ॥८॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण विरचिते वीरशैवधर्मनिर्णये सिद्धान्तशिखामणौ शरणस्थलविषयद्वादशविध-लिंगप्रसंगो नाम एकोनविंशतीयः परिच्छेदः समाप्तः ॥

व्याख्यानं—नित्ये निरंतरं सत् निर्मलसत्वयोगिषु परे शुद्धसत्वगुणवस्तु प्राधान्येन वर्तमाने निर्वासने वेद्यवासनारहिते निष्कले निरवयवे सर्वातीतपदे सर्वोत्तीर्णस्थानभूते चराचरमये चराचरप्रपंचोपादानकारणीभूतचित्क्रियालक्षणचिद्-

बरशक्तिस्वरूपे सत्तात्मनि पारमार्थिकसत्तारूपिणि ज्योतिषि भासमाने संविद्योम्नि शिवे चिदाकाशरूपपरशिवे विलीनहृदयः तद्भेदवैमुख्यतः शिवादन्यत्वे विमुखीभूतत्वात् सर्वगतः विश्वव्यापकः संयमी शिवयोगी विगलद्भिश्चः सन् विगलितविश्वभेदविभवः सन् स्वयंसाक्षाद्विशेषेण भाति प्रकाशत इत्यर्थः शिवशरणयोः सतिपतित्वादेः तल्लिंगत्रयं शरणस्यांगत्रयस्य योज्यं ॥ ८ ॥

इति ज्ञानप्रकाशस्थलं ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां शरणस्थलविषयद्वादशविधलिंगप्रसंगो नामैकोनविंशतीयः परिच्छेदः समाप्तः ॥

अर्थ–॥ ८ ॥ निष्पापस्वभावाचे सत्वगुणांचे जगांत जितके शिवयोगी आहेत त्यांपेक्षां शंकर हा श्रेष्ठ आहे, त्याला कोणतीही वासना राहिलेली नाहीं, (तो निरिच्छ आहे) निष्कल (प्रपंचरहित) आहे, जगांत जीं जीं स्थानें आहेत त्यांपेक्षां तो फार प्राचीनकाळापासून आहे, सर्वस्थावरजंगम प्राणी हे त्याचेंच स्वरूप आहे, तो सत्तास्वरूप (सर्वजगावर त्याची मालकी) असा असून तेजोमय आहे, चिदंबर आहे त्या शिवाच्या स्वरूपांत ज्याचें मन गढून गेल्यामुळें त्याला आतां भेदबुद्धि ह्मणून राहिलीच नाहीं, सर्वठिकाणीं त्याला जाण्यायेण्याचें सामर्थ्य आल्यानें विश्वाचा परकेपणा मुळींच राहिला नाहीं असा तो शिवयोगी प्रत्यक्ष शंकराप्रमाणें शोभूं लागतो.

ह्याप्रमाणें वीरशैव धर्माचा निर्णय असलेल्या सिद्धान्तशिखामणि ग्रंथांतील शरणस्थलासंबंधाच्या बारा पोटभेद लिंगांचें वर्णन असलेला हा एकोणिसावा परिच्छेद संपला.

श्रीनंदिकेश्वराय नमः

अथ विंशतीयपरिच्छेदः प्रारभ्यते ।

C. N. Kalburgi

(अथागस्त्यप्रश्नः)

अथ ऐक्यस्थलगतस्वीकृतप्रसादैक्यस्थलम् ॥

श्लोकः-स्थलभेदास्त्वया प्रोक्ताः शरणस्थलसंश्रिताः ॥
ऐक्यस्थलगतान् ब्रूहि स्थलभेदान् गणेंद्र मे ॥ १ ॥

व्याख्यानं—स्थलभेदाः अवांतरस्थलभेदा इत्यर्थः ॥ अग्रेपि तथा शिष्टं स्पष्टम् ॥ १ ॥

॥ श्रीनंदिकेश्वरास नमस्कार असो. ॥

अगस्त्य ह्मणतात, रेवणसिद्धा,

अर्थ-॥ १ ॥ आपण शरणस्थलाच्या संबंधाचे बारा पोटभेद व लिंगस्थलें सांगितलीं. त्याप्रमाणें आतां ऐक्यस्थलाचे किती पोटभेद आहेत ते मला सांगा. आपण सर्व प्रमथगणांत श्रेष्ठ आहां.

अवतरणिका-अथास्य प्रश्नस्योत्तरं वक्ति—

श्लोकः-स्थलानां नवकं चैक्यस्थलेस्मिन्परिकीर्त्यते ॥ २ ॥

व्याख्यानं—स्पष्टम् ॥ २ ॥

अर्थ-॥ २ ॥ ह्या ऐक्यस्थलाचे नऊ पोटभेद आहेत.

अवतरणिका-अथ तदवांतरस्थलभेदं सूत्रत्रयेणोद्दिशति-

श्लोकः-तत्स्वीकृतप्रसादैक्यस्थलमादौ प्रकीर्तितम् ॥
शिष्टोदनस्थलं चाथ चराचरलयस्थलम् ॥ ३ ॥
भांडस्थलं ततः प्रोक्तं भाजनस्थलमुत्तमम् ॥
अंगालेपस्थलं पश्चात्स्वपराज्ञास्थलं ततः ॥ ४ ॥
भावाभावविनाशं च ज्ञानशून्यस्थलं ततः ॥
तदेषां क्रमशो वक्ष्ये शृणु तापसलक्षणम् ॥ ५ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥ ४ ॥ ५ ॥

अर्थ-॥ ३ ॥ ते असे— १ स्वीकृतप्रसादैक्यस्थल २ शिष्टोदनस्थल ३ चराच-

रलयस्थल ॥ ४ ॥ ४ भांडस्थल ५ भाजनस्थल ६ अंगालेपस्थल ७ स्वपराज्ञास्थल ॥ ५ ॥ ८ भावाभावविनाशस्थल ९ ज्ञानशून्यस्थल हीं नऊ स्थलें झालीं, आतां तपस्विश्रेष्ठा अगस्त्य ऋषे तुला क्रमाक्रमानें प्रत्येकाचें लक्षण सांगतों.

अवतरणिका–अथ "ज्ञानप्रसादेन विशुद्धसत्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः" इति मुंडकश्रुत्यनुसारेण "ज्ञानोत्पत्तिनिमित्तं तु क्रियाचर्या प्रकीर्तिता ॥ योगं सालंबनं त्यक्त्वा निष्प्रपंचं विचिंतयेत्" इति देवीकालोत्तरवचनानुसारेण च तत् ज्ञानप्रकाशसंपन्नः शिवयोग्येव ज्ञानप्रसादस्वीकारात्स्वीकृतप्रसादीति निरूपयति—

श्लोकः–मुख्यार्थो लक्षणार्थश्च यत्र नास्ति चिदात्मनि ॥
विशृंखलतया तस्य प्रसादः स्वीकृतो भवेत् ॥ ६ ॥

व्याख्यानं—चिदात्मनि यत्र ज्ञानप्रकाशसंपन्ने शिवयोगिनि मुख्यार्थः जीवेश्वरवियोगरूपमुख्यार्थः नास्ति लक्षणार्थश्च निरुपाधिकशिवात्मनोर्नित्यावियोगरूपलक्षणार्थश्च नास्ति तस्य शिवयोगिनः विशृंखलतया निरंकुशत्वेन प्रसादः पूर्णज्ञानप्रसादः स्वीकृतः अङ्गीकृतो भवेदित्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ ज्या ज्ञानप्रकाशसंपन्न शिवयोग्याचे ठिकाणीं मुख्यार्थ आणि लक्षणार्थ (उघड दिसणारें तात्पर्य आणि समजून ध्यावयाचें तात्पर्य) हे दोन्ही ही मुळींच नसून ज्याच्या प्रसादाला कोठेंही प्रतिबंध होत नाहीं, पाहिजे तेथें प्रसाद होतो; त्या स्थलास स्वीकृतप्रसादैक्यस्थल असें ह्मणावें.

अवतरणिका–अथैतदर्थमेव सूत्रद्वयेन विशदयति—

श्लोकः–मातृमेयप्रमाणादिव्यवहारे विहारिणीम् ॥
संवित्साक्षात्कृतिं लब्ध्वा योगी स्वात्मनि तिष्ठति ॥ ७ ॥

व्याख्यानं—मातृमानप्रमेयादित्रिपुटिमयप्रपंचप्रथमः व्यवहारे रममाणां पूर्णचित्साक्षात्कृतिं लब्ध्वा योगी ज्ञानप्रकाशसंपन्नः शिवयोगी स्वात्मनि स्वीकृतप्रसादवति स्वस्वरूपे तिष्ठतीत्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ शिवयोगी मोजणारा, मोजावयाच्या व प्रमाण ह्या तिन्हीही व्यवहारांत फिरणाऱ्या ज्ञानशक्तीला आपल्या मनांत जाणून स्वस्थ राहतो (शिवयोग्याला सर्वप्रकारचें ज्ञान असतें अमुक ज्ञान त्याला नसतें असें नाहीं)

अवतरणिका–अथैवं रूपस्य शिवयोगिनः पाशबंधनं नास्तीत्यत्राह—

श्लोकः–अद्वैतबोधनिर्धूतभेदावेशस्य योगिनः ॥
साक्षात्कृतमहासंवित्प्रकाशस्य क बंधनम् ॥ ८ ॥

व्याख्यानं—शिवाद्वैतबोधनिवारितांगलिंगलक्षणजीवेश्वरभेदावेशवतः अपरोक्षीकृतनिर्मलचित्प्रकाशस्य शिवयोगिनः पाशपंचकाद्भूतबंधनं कुतः नास्तीत्यर्थः ॥८॥

अर्थ–॥ ८ ॥ शिवाद्वैतज्ञानामुळें ज्याची भेदबुद्धि नाहींशी झाली त्या शिवयोग्याला शिवतत्वज्ञानाच्या साधनामुळें बंधन कसें होईल? मुळींच होणार नाहीं.

अवतरणिका–अथ तस्य पूर्णज्ञानिनः प्रपंचदर्शनं नास्तीति सूत्रत्रयेण सदृष्टांतं कथयति—

श्लोकः–चिदात्मनि शिवे न्यस्तं जगदेतच्चराचरम् ॥
ज्ञायते तन्मयं सर्वमग्नौ काष्ठादिकं यथा ॥ ९ ॥

व्याख्यानं—अग्नौ न्यस्तं काष्ठादिकं यथाग्निमयं सत् दृश्यते तथा शिवे स्थापितं विश्वं चिन्मयमेव दृश्यते शिवस्य चिदग्निरूपत्वादिति भावः ॥ ९ ॥

अर्थ–॥ ९ ॥ शिव हा ज्ञानस्वरूप असून त्यांत हें स्थावर जंगम विश्व राहतें. अग्नींत जसें लांकूड घातलें तर तें अग्निच होतें तसें शिवस्वरूपांत सर्व जग राहत असल्यानें तें शिवस्वरूपच भासतें.

अवतरणिका–ननु वह्नौ काष्ठमिव शिवे विश्वं न केनापि न्यस्तं शिवेनैव कल्पितं तत्कथं तन्मयं सद्भातीत्यत्राह—

श्लोकः–न भाति पृथ्वी न जलं न तेजो नैव मारुतः ॥
नाकाशो न परं तत्वं शिवे दृष्टे चिदात्मनि ॥ १० ॥

व्याख्यानं—मृत्तिकायां ज्ञातायां घटशरावादिकं सर्वं यथा मृण्मयमेव न तद्व्यतिरिक्तमिति ज्ञायते तथा चिदात्मनि शिवे दृष्टे सति तत्कार्यत्वात् भूम्यादिकं तद्भिन्नत्वेन न भाति तदात्मकत्वेनैव भातीत्यर्थः ॥ १० ॥

अर्थ–॥ १० ॥ चित्स्वरूप शिव दृष्टीस पडल्यावर पृथ्वीतत्व भिन्न वाटत नाहीं, जलतत्व भिन्न वाटत नाहीं, अग्नितत्व भिन्न वाटत नाहीं, वायुतत्व भिन्न वाटत नाहीं, किंवा आकाशतत्व देखील भिन्न वाटत नाहीं; सर्वतत्वें शिवस्वरूपच आहेत.

अवतरणिका–एवं शिवात्मकं विश्वं तत्रैव लीनं चिंतयन् योगी न लिप्यत इत्यत्राह—

श्लोकः–ज्योतिर्लिंगे चिदाकारे ज्वलत्यंतर्निरंतरम् ॥
विलीनं निखिलं तत्वं पश्यन् योगी न लिप्यते ॥ ११ ॥

व्याख्यानं—अंतः हृद्रूपाष्टदलकमलमध्ये निरंतरं चिद्रूपे ज्योतिर्लिंगे महालिंगे ज्वलति सति प्रकाशिते सति तस्मिन् महालिंगे शिवयोगी निखिलं तत्वं शिवादिभूम्यांतं विलीनं लयीभूतं पश्यन् सन् न लिप्यते तनुकरणभुवनभोगात्मकषट्त्रिंशत्तत्वैर्न लिप्यत इत्यर्थः ॥ ११ ॥

अर्थ–॥ ११ ॥ ज्ञानस्वरूपी तेजोलिंग आपल्या मनामध्यें नेहमीं प्रकाशमान असल्यामुळें, त्याच तेजामध्यें लीन होणाऱ्या दुसऱ्या पृथ्वीवगैरे छत्तीस तत्वांशीं शिवयोग्याचा संबंध असत नाहीं.

अवतरणिका–अथैतदर्थमेव होमरूपेण विशेषयति—

श्लोकः–अंतर्मुखेन मनसा स्वात्मज्योतिषि चिन्मये ॥
सर्वानप्यर्थविषयान् जुह्वन् योगी प्रमोदते ॥ १२ ॥

व्याख्यानं—अंतर्मुखेन मनसा प्रत्युन्मुखेन मनसा चिन्मये स्वस्वरूपवह्निप्रकाशे समस्तपदार्थान् जुव्हन् तादात्म्येन समर्पयन् शिवयोगी प्रमोदत इत्यर्थः ॥ १२ ॥

अर्थ–॥ १२ ॥ चित्स्वरूपी आत्मतेजामध्यें (अग्नींत) अन्तर्मुख मन करून (एकाग्रमनानें) शिवयोगी सर्व आवडीचे विषय जाळून टाकून आनंद मानितो. (शिवयोगी विषयसुख सोडून देऊन आत्मस्वरूपाकडे लक्ष्य लाऊन सुखानें राहतो.)

अवतरणिका–अथ स्वीकृतप्रसादिस्थलं समापयति—

श्लोकः–सच्चिदानंदजलधौ शिवे स्वात्मनि निर्मलः ॥
समर्प्य सकलान् भुंक्ते विषयान् तत्प्रसादतः ॥ १३ ॥

व्याख्यानं—निर्मलः शिवयोगी सच्चिदानंदानां समुद्रभूते स्वात्मनि स्वप्रकाशात्मनि शिवे सकलान् शब्दादिपदार्थान् समर्प्य तत्प्रसादतः तत्प्रसादरूपेण भुंङ्क्त्वा इति ॥ १३ ॥

इति स्वीकृतप्रसादिस्थलं ॥

अर्थ–॥ १३ ॥ शिव आपला आत्मा असून सत् चित् आणि आनंदस्वरूप आहे, त्या शिवाला शिवयोगी आपले सर्व विषयसुखाचे पदार्थ अर्पण करितो. नंतर त्याचा प्रसाद ह्मणून त्या पदार्थांचा उपभोग घेतो.

अथ शिष्टोदनस्थलम् ॥

अवतरणिका–अथ "मायां तु प्रकृतिं विंद्यात्" इति श्रुत्यनुसारेण "ग्रंथिजन्यकलाकालविद्यारागानृमातरः ॥ गुणादिगर्वचित्ताक्षमात्राभूतान्यनुक्रमात्" इति मृगेंद्रवचनानुसारेण च तच्चित्प्रसादस्वीकारवतः शिवयोगिनः मायातत्वमेव शिष्टोदनमिति सूत्रचतुष्टयेन कथयति—

श्लोकः–प्रकाशते या सर्वेषां माया सैवोदनाकृतिः ॥
लीयते तत्र चिल्लिंगे शिष्टं तत्परिकीर्तितम् ॥ १ ॥

व्याख्यानं—या माया मिश्रा शुद्धाध्वनिवासिनां तनुकरणभुवनभोगरूपिणी अथो मायास्ति शैवसर्वेषां प्रकाशते लीयते च तत् कलादिभूम्यंतषट्त्रिंशत्तत्वात्मकमायातत्वमेव चिल्लिंगे ज्ञानचिह्ने तत्र विषये तत्स्वीकृतप्रसादिविषये शिष्टोदनाकृतिः अवशिष्टोदनाकारवदिति प्रकीर्तितमित्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ सर्व प्राणिमात्रांस माया ह्मणून जी प्रतीतीस येते तीच ओदनस्वरूप आहे, ती माया चित्स्वरूपलिंगामध्यें लय पावते ह्मणून त्यास शिष्टोदनस्थल ह्मणतात.

C. N. Kalburgi

जगदंगे परिग्रस्ते मायापाशविजृंभिते ॥
स्वात्मज्योतिषि बोधेन तदेकमवशिष्यते ॥ २ ॥

व्याख्यानं—मायापाशविजृंभिते कलादिक्षित्यंतत्रिंशत्तत्वात्मकमायापाशनिबद्ध जगदंगे विश्वशरीरवति स्वात्मज्योतिषि स्वस्वरूपज्ञानं बोधेन स्वात्मज्ञानेन परिग्रस्ते सति आक्रांते सति तदेकं तन्मायातत्वमेकमेवावशिष्यत इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ मायेच्या पाशांत सांपडून जर्जर झालेलें त्रैलोक्यरूपी शरीर बोध झाल्यामुळें (शिवज्ञान झाल्यामुळें) ज्ञानस्वरूपांत तेंच कायतें एक (मायातत्वच) शिल्लक राहतें.

अवतरणिका–ननु शारीरिकस्वरूपस्य बोधाक्रांतत्वात् कथं मायातत्वमवशिष्यत इत्यत्राह—

श्लोकः–अखंडसच्चिदानंदपरब्रह्मस्वरूपिणः ॥
जीवन्मुक्तस्य धीरस्य मायाकैंकर्यवादिनि ॥ ३ ॥

व्याख्यानं—अखंडसच्चिदानंदलक्षणपरब्रह्मैव यस्य स्वरूपं तादृशस्य जीवन्मुक्तस्य धीरस्य जितेंद्रियस्य शिवयोगिनः मायाकैंकर्यवादिनि दासभावं वदंती सत्यास्त इत्यर्थः ॥ ३ ॥

अर्थ–॥ ३ ॥ परिपूर्ण अशा सच्चिदानंद परब्रह्मस्वरूपांत निमग्न झालेल्या धैर्यवान् जीवन्मुक्त शिवयोग्याला माया दासीसारखी तुच्छ वाटते. तो मायावश होत नाहीं, उलट माया त्याबरोबर दासभावानें वागते.

अवतरणिका–एवंरूपायां स्थितौ "विश्वसंमोहिनी माया बहुशक्तिनिरंकुशा ॥ शिवैकत्वमुपेतस्य न पुरः स्थातुमीहते" जगन्मोहिनी माया बहुविधशक्तिभिरनर्गलापि शिवे समानसमरसभावमुपेतस्य शिवयोगिनः पुरतः मोहकत्वेन स्थातुं नेहते नेच्छतीत्यर्थः ॥ अथ तस्य शिवैक्यस्य विषयनाशं सूत्रत्रयेण कथयति—

श्लोकः–ज्योतिर्लिंगे चिदाकारे निमग्नेन महात्मना ॥
भुज्यमाना यथा योगं नश्यंति विषयाः स्वतः ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥

अर्थ–॥ ४ ॥ चित्स्वरूपी तेजोलिंगामध्यें निमग्न असणाऱ्या मोठ्या मनाच्या शिवयोग्यानें विषयांचा उपभोग घेतला; तरी इतर विषयी लोकांच्या विषयांप्रमाणें वरचे वर ते वाढत नाहींत, उलट आपापचें नाहींसे होतात.

अवतरणिका–अथ कथं लयं गच्छंतीत्यत्राह—

श्लोकः–शब्दादयोऽपि विषया भुज्यमानास्तदिंद्रियैः ॥
आत्मन्येव विलीयंते सरितः सागरे यथा ॥ ५ ॥

व्याख्यानं—कारणांतरव्यतिरेकेण नदीसागरन्यायेन स्वत एव लयं गच्छंतीत्यर्थः स्वीकृतप्रसादः तैलवत्सारभूतचिदानंदः शिष्टोदनस्तु पिण्याकवन्निःसारा मायेति तद्भोगो निःसारः सन् नश्यतीति भावः ॥ ५ ॥

अर्थ–॥ ५ ॥ शब्द, रूप, रस, स्पर्श, गंध हे ज्या ज्या ज्ञानेंद्रियांचे विषय आहेत, त्या त्या ज्ञानेंद्रियांनीं त्या विषयांचा शिवयोग्यानें उपभोग घेतला; तरी नद्या समुद्रांत जशा मिळून जातात, त्याप्रमाणेंच ते विषय आत्मस्वरूपांतच लय पावतात.

अवतरणिका–अथैवं विनष्टविषयसमूहवान् शिवयोगी कथमास्त इत्यत्र वदन् शिष्टोदनस्थलं समापयति—

श्लोकः–अर्थजातमशेषं तु ग्रसन् योगी प्रशाम्यति ॥
स्वात्मन्नैवास्थितो भानुस्तेजोजालमशेषतः ॥ ६ ॥

व्याख्यानं—शिवयोगी अशेषं पदार्थसमूहं स्वस्वरूपेणाग्रसन् तेजोजालं स्व-किरणसमूहं अशेषतः निःशेषं यथा भवति तथा प्रसन्नुपसंहरन् आस्थितो भानुरिव अस्तं गच्छन् भानुरिव शाम्यति स्वस्थो भवतीत्यर्थः ॥ ६ ॥

इति शिष्टोदनस्थलं ॥

अर्थ–॥ ६ ॥ जसा सूर्य आपल्या बरोबरच आपल्या सर्व प्रकाशमंडळास संकोच करून अस्त पावतो; तसाच शिवयोगी सर्वप्रकारच्या अर्थसमुदायास ग्रास करून शांत होतो.

अथ चराचरविनाशस्थलम् ॥

अवतरणिका–अथ "सोऽविद्याग्रंथिं विकिरति ह सोम्यत्" इति छांदोग्यश्रुत्यनुसारेण "विषसंबंधिनी शक्तिर्यथा मंत्रैर्निरुध्यते ॥ यथा न तदिति क्षीणमेवं पुंसो मलक्षय" इति किरणागमवचनानुसारेण च केवलचित्प्रसादस्वीकारेणावशिष्टमायोदनः शिवयोगी चराचरे प्रत्येकं परिपक्वानुसारेण व्याप्तमलशक्तिं परिपक्वानुसारेण विनाशकरणेन चराचरविनाशक इति कथयति—

श्लोकः–लिंगैक्ये तु समापन्ने चरणाचरणे गते ॥
निर्देही स भवेद्योगी चराचरविनाशकः ॥ १ ॥

व्याख्यानं—चरणाचरणे गते चराचरप्रपंचगते लिंगैक्ये महालिंगतादात्म्ये समापन्ने प्राप्ते सति स योगी शिष्टोदनसंपन्नः शिवयोगी निर्देही भूत्वा चराचरविनाशकः जंगमस्थावरगतमलशक्तिविनाशको भवेदित्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ स्थावरजंगमांत असणारें महालिंगतादात्म्य प्राप्त झालें असतां, त्यांत शिवयोगी विदेही होऊन स्थावरजंगमांत असणाऱ्या मलशक्तींचा (त्रिमलांचा) नाश करणारा होतो.

अवतरणिका–अथ स शिवयोगी चराचरव्याप्तमलशक्तिनिवारणेन मायाप्रपंचं न पश्यतीति षड्भिः सूत्रैः प्रतिपादयति—

श्लोकः–अनाद्यविद्यामूला हि प्रतीतिर्जगतामियम् ॥
स्वात्मैकबोधात्तन्नाशे कुतो विश्वप्रकाशनम् ॥ २ ॥

व्याख्यानं—इदमेतादृगिति प्रतिनियतविश्वभुवनप्रतीतिः लीलाशक्त्यनादिकल्पितमायैव मूलकारणवती स्वात्मैकबोधात् स्वात्मैव बोधात् स्वात्मप्रधानीभूतज्ञानात् तन्नाशे मलशक्तिनाशो विश्वप्रकाशनं तन्मूलकजगद्दर्शनं कुतः नास्तीत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ जग आपणास दिसतें, त्या दिसण्यास अनादि मायाच मूळ-कारण आहे. स्वात्मज्ञानानें त्या मलशक्तीचा नाश झाल्यावर जग कोठून दिस-णार ? मुळींच दिसणार नाहीं.

अवतरणिका-नन्विदं विश्वं कुत्र लयं गच्छतीत्यत्राह—

श्लोकः-यथा मेघाः समुद्भूता विलीयंते नभस्तले ॥
तथात्मनि विलीयंते विषयाः स्वानुभाविनः ॥ ३ ॥

व्याख्यानं—नभस्थले मेघाः संभूय यथा विलीयंते तथा स्वस्वरूपानुभाविनः शिवयोगिनः आत्मनि चैतन्ये विषयाः शब्दादिविषयाः समुद्भूताः उत्पन्नाः संतः विलीयंत इत्यर्थः ॥ ३ ॥

अर्थ-॥ ३ ॥ जसे ढग आकाशांतच उत्पन्न होतात आणि आकाशांतच नाहींसे होतात; तसे उत्तमप्रकारचें शिवाद्वैतज्ञान झालेल्या शिवयोग्याचे विषय आत्मस्वरूपांतच उत्पन्न होतात आणि आत्मस्वरूपांतच लय पावतात.

अवतरणिका-अथेदं विश्वं स्वात्मैकबोधात्कथं नश्यतीत्यत्राह—

श्लोकः-स्वप्ने दृष्टं यथा वस्तु प्रबोधे लयमश्नुते ॥
तथा सांसारिकं सर्वमात्मज्ञाने विनश्यति ॥ ४ ॥

व्याख्यानं—आत्मज्ञाने सतीत्यर्थः नन्वेवं चेद्विश्वस्य स्वप्नसादृश्यांगीकारान्मिथ्यात्वप्रसंग इति नाशंकनीयम् ॥ स्वप्नेनापि फलाफलदर्शनात् रेतःपातादिदर्शनाच्च सत्यत्वमेवेति शिष्टं स्पष्टं ॥ ४ ॥

अर्थ-॥ ४ ॥ स्वप्नांत पाहिलेली वस्तु जागें झाल्याबरोबर जशी नाहींशी होते; तसेंच संसारासंबंधीं कोणत्याही प्रकारचें सुख किंवा दुःख आत्मज्ञानें झाल्याबरोबर नाहींसें होतें.

अवतरणिका-पुनश्च कारणांतरमाह—

श्लोकः-जाग्रत्स्वप्नसुषुप्तिभ्यः परावस्थामुपेयुषः ॥
किं वा प्रमाणं किं ज्ञेयं किंवा ज्ञानस्य साधनम् ॥ ५ ॥

व्याख्यानं—परावस्थां तनुत्रयाश्रितजाग्रदाद्यवस्थातीतबोधखेचरीमुद्रासुलभसर्वोत्कृष्टतुरीयावस्थां उपेयुषः गतस्य शिवयोगिनः किं वा प्रमाणं किं ज्ञेयं किं वा ज्ञानस्य साधनं त्रिपुटिमयप्रपंचोत्तीर्णत्वात्र तद्दर्शनं नास्तीति भावः ॥ ५ ॥

अर्थ-॥ ५ ॥ जागृति, स्वप्न, आणि गाढ झोंप ह्या तिन्ही अवस्थांच्या पुढें

ह्मणजे तुर्यावस्थेस जाऊन पोंचलेल्या शिवयोग्यास प्रमाण तरी कसलें? जाणावयाचें तरी काय राहिलें? आणि ज्ञानाचें साह्य तरी कशाला पाहिजे?

अवतरणिका—अथ तत्तुर्यातीतपदं विशदयति—

श्लोकः—तुर्यातीतपदं यत्तद्दूरं वाङ्मनसाध्वनः ॥
अनुप्रविश्य तद्योगी न भूयो विश्वमीक्षते ॥ ६ ॥

व्याख्यानं—यत्तुर्यातीतपदं मौनांतमुद्रासुलभतुर्यातीतस्थानमस्ति वाङ्मनसाध्वनोदूरं स्तुतिध्यानयोरविषयं तत्तुर्यातीतस्थानं अनुप्रविश्य तद्योगी तुर्यस्थानयोगवान् शिवयोगी भूयो विश्वं नेक्षते न पश्यतीत्यर्थः ॥ ६ ॥

अर्थ—॥ ६ ॥ तुर्यावस्थेच्या पुढें जें पद आहे तेंच परमेश्वराचें पद आहे, व तेथपर्यंत गेल्यावर जन्ममरणाचें दुःख दूर राहतें. तेथपर्यन्त शिवयोगी जाऊन पोंचल्यावर पुन्हां त्यास जग दिसत नाहीं (तो संसारचक्रांत सांपडत नाहीं), तो मुक्तच होतो.

C. N. Kalburgi

अवतरणिका—कुत इत्यत्राह—

श्लोकः—नान्यत्पश्यति योगींद्रो नान्यज्जानाति किंचन ॥
नान्यच्छृणोति संदृष्टे चिदानंदमये शिवे ॥ ७ ॥

व्याख्यानं—चिदानंदस्वरूपे शिवे संदृष्टे सतीति शेषः अपरोक्षीकृते सति योगींद्रः निजस्वरूपस्थः शिवयोगीश्वरः अन्यत्स्वातिरिक्तं रूपं न पश्यति तादृशं शब्दजालं न शृणोति किमपि तदन्यं न जानातीत्यर्थः। मलशक्तिक्षयात् मायिकरूपादिदर्शनं नास्तीति भावः ॥ ७ ॥

अर्थ—॥ ७ ॥ ज्ञानस्वरूप आणि आनंदस्वरूप असा शंकर एकवेळ प्रत्यक्षरीतीनें दृष्टीस पडल्यावर शिवयोगी दुसरें कांहीं पाहात नाहीं, दुसरें कांहींएक जाणत नाहीं, किंवा दुसरें कांहींएक ऐकत नाहीं. शिवस्वरूपाखेरीज इतर कोणत्याही गोष्टीकडे त्याचें लक्ष्य जात नाहीं.

अवतरणिका—अथोक्तार्थं स्फुटयन् चराचरमलनाशस्थलं समापयति—

श्लोकः—असदेव जगत्सर्वं सदिव प्रतिभासते ॥
ज्ञाते शिवे तदज्ञानं स्वरूपमुपपद्यते ॥ ८ ॥

व्याख्यानं—सर्वं जगत् असदेव शिवातिरेकेण नास्त्येव सदिव प्रतिभासते मलशक्तिवशात् तद्व्यतिरेकेण सदिव भासते शिवे सच्चिदानंदलक्षणे परशिवे ज्ञाते साक्षात्कृते सति तदज्ञानं भेदप्रतीतिकारणं तन्मूलाज्ञानं नष्टं सत् स्वरूपं

कारणीभूतचिच्छक्त्याकारं उपपद्यते गच्छतीत्यर्थः तस्मात् शिवातिरेकेण स्वविमर्शनं शिवयोगिनो नास्तीत्यर्थः ॥ ८ ॥

इति चराचरमललयस्थलं ॥

अर्थ-॥ ८ ॥ हें सर्व जग वास्तविक खोटें आहे तरी खरें असल्याप्रमाणें भासतें, शिवस्वरूपाचें यथार्थ ज्ञान झाल्यावर तें अज्ञान नाहींसें होऊन वास्तविकस्वरूप आपल्या अनुभवास येतें.

अथ भांडस्थलम् ॥

अवतरणिका-अथ "ऊर्ध्वमूलमवाक्शाखा एषोश्वत्थः सनातनः ॥ तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ॥ तस्मिन् लोकाः सर्वे तदुनान्येति कश्चन" इति कठवल्लीश्रुत्यनुसारेण "यथा कुंडलिनीशक्तिर्मायाकर्मानुसारिणी ॥ नादबिंद्वादिकं कार्यं तस्या इति जगत्स्थितिः" इति विश्वसारोत्तरवचनानुसारेण च चराचरमलशक्तिविनाशकस्य शिवयोगिनः विचाररूपः परबिंदुरेव भांडस्थलमिति निरूपयति—

श्लोकः-ब्रह्मांडशतकोटीनां सर्गस्थितिलयान्प्रति ॥
स्थानभूतो विमर्शो यस्तद्भांडस्थलमुच्यते ॥ १ ॥

व्याख्यानं—अनेककोटिब्रह्मांडसृष्टिस्थितिलयान् प्रत्याधारभूतो यो विमर्शः अस्य चराचरमलविनाशकस्य शिवयोगिनः शब्दब्रह्मरूपविचारोस्ति तत् भांडस्थलमित्युच्यत इत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ शंभरकोट ब्रह्माण्डें उत्पन्न करणें, संरक्षणकरणें, आणि लय करणें वगैरेंस आधारभूत जो शब्दब्रह्मरूप विचार आहे, त्यास भांडस्थल असें ह्मणतात.

अवतरणिका-अथ तद्विमर्शस्वरूपं विशदयति—

श्लोकः-विमर्शाख्या पराशक्तिर्विश्वोद्भासनकारिणी ॥
साक्षिणी सर्वभूतानां सन्निधे सर्वतोमुखी ॥ २ ॥

व्याख्यानं—षडध्वस्फारलक्षणशब्दार्थविचारपरत्वेन विमर्शाख्या पराशक्तिः शुद्धमाया विश्वोद्भासनकारिणी स्वकार्यरूपज्ञानादिभिर्विश्वप्रकाशिनी सर्वतत्वानां साक्षिणी सर्वतोमुखी सती सन्निधे शुद्धाध्नवासिनां परशक्तिसदाशिवेश्वरविद्यातत्वलक्षणतनुकरणभुवनभोगरूपेण प्रकाशत इत्यर्थः ॥ २ ॥

अर्थ-॥ २ ॥ विचारनांवाची श्रेष्ठ शक्ति आहे त्या शक्तीमुळें सर्वजगाचें ज्ञान होतें, ती सर्वप्राणिमात्रांस साक्षीभूत आहे (सर्वप्राणिमात्र जीं जीं कृत्यें करतात तीं तीं सर्व तिला समजतात. तिला चोंहोंकडे तोंडें आहेत. तिला सर्वप्रकारचें ज्ञान आहे. ती सर्वत्र प्रकाशमान आहे.

अवतरणिका-अथ तामेव विमर्शकलां विशेषयति—

श्लोकः-विश्वं यत्र लयं याति विभात्यात्मा चिदाकृतिः ॥
सदानंदमयः साक्षात्सा विमर्शमयी कला ॥ ३ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥

अर्थ-॥ ३ ॥ ज्या विचारशक्तींत हें सर्व जग लय पावतें, व आत्मा ज्ञानस्वरूप आहे व आनंदस्वरूप आहे असें समजून येतें, ती प्रत्यक्ष विचाररूप कला होय.

अवतरणिका-अथ पिंडस्थलार्थं सूचयन् तत्त्वंपदप्रसिद्धलिंगांगरूपशिवजीवयोः सविमर्श एवाश्रय इति सूत्रद्वयेन प्रतिपादयति—

श्लोकः-पराहंता समावेशपरिपूर्णविमर्शवान् ॥
सर्वज्ञः सर्वगः साक्षी सर्वकर्त्ता महेश्वरः ॥ ४ ॥

व्याख्यानं—महेश्वरः परमेश्वरः पराहंतासमावेशपरिपूर्णविमर्शवान् शिवजीव साधारणीभूतात्मतत्वाक्रमणेन परिपूर्णविमर्शवान् सन् सर्वज्ञः सर्वकर्त्ता सर्वगः सर्वव्यापकः कर्मसाक्षी भवेत् अन्यथा स्फटिकादिप्रकाशवज्जडो भवेदिति भावः ॥ ४ ॥

अर्थ-॥ ४ ॥ श्रेष्ठ परमेश्वर तो मी आहें अशी दृढभावना असल्यामुळें ज्याला परिपूर्णरीतीची विचार शक्ति आहे, जो सर्वकांहीं जाणतो, ज्याला पाहिजे तेथें जातां येतां येतें. सर्वलोक काय करितात हें ज्याला समजतें, सर्व कामें जो करितो, तो महेश्वर शंकरच ह्या जगांत श्रेष्ठ आहे.

अवतरणिका-अथ किं तस्य स्वरूपमित्यत्राह—

श्लोकः-विश्वाधारमहासंवित्प्रकाशपरिपूरितम् ॥
पराहंतामयं प्राहुर्विमर्शं परमात्मनः ॥ ५ ॥

व्याख्यानं—परमात्मनः अहमस्मि "प्रथमभ्वाऋतस्य पूर्वंदेवेभ्यो अमृतस्य सनाभिः" इति श्रुतेः "अहमादिर्हि देवानां अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तत" इति भगवदुक्तेश्च परसंविद्रूपस्याहमात्मनः शिवस्य महासंवित्प्रकाशपरिपूरितं महाचित्प्रकाशपरिपूर्णं विश्वाधारं विश्वरूपा विद्या लक्षणाधोमायाधारं पराहंतामयं

यथा घटस्य कंबुग्रीवादिमत्वं तदनतिरिक्तं तथा अहमोभावः अहंतेति पृषालनपूरणयोरिति धातुगत्यांडरसन्यायेनाशुद्धमिश्रशुद्धाध्वलक्षणसकलविश्वतः पूर्णजीवनभूतपराहंतामयोर्ध्वमायारूपं विमर्शं संतं प्राहुः शिवाद्वैतशास्त्रप्रवीणाः प्रकर्षेणाहुरित्यर्थः अयं भावः "पादोस्य विश्वाभूतानि" इति श्रुतेः । चराचरप्रपंचस्य माहेश्वरीयचित्क्रियालक्षणचरविस्ताररूपत्वात् तत्प्रतिस्फुरणायमानोर्ध्वमायारूपा विमर्शशक्तिरेव घृतकाठिन्यायेनैकदेशविकारीभूत्वा । "वागीश्वरी पराविद्या कुटिला कुंडली परा । शुद्धमायापरो बिंदुः शब्दब्रह्मेति कथ्यते" इति पौष्करवचनप्रसिद्धपर्यायनामवती षडध्वजननीति देशिकोपदेशेन विज्ञेया अस्याश्चिद्रूपत्वेन निरंशत्वेप्यघटनघटनापटीयस्त्वेन स्वातंत्र्यकल्पितांशभेदसंभवान्न काचिदनुपपत्तिरिति ॥५॥

अर्थ–॥ ५ ॥ ही परमेश्वराची विचारशक्ति त्रैलोक्यास अवश्य उपयोगीं पडणारें जें अद्वैतज्ञान त्याचा प्रसार करण्यामुळें पूर्णपणा पावली आहे; व त्या विचारशक्तीला परमेश्वराची अहंता (मीपणाची समजूत) असें ह्मणतात.

विमर्शभांडविन्यस्तविश्वतत्वविजृंभणः ॥
अनन्यमुखसंप्रेक्षी मुक्तः स्वात्मनि तिष्ठति ॥ ६ ॥

व्याख्यानं—मुक्तः मायापाशपटलनिर्मुक्तः शिवयोगी विमर्शभांडस्थापितशक्त्यादिपृथ्व्यंतसमस्ततत्वबुद्बुदः सन् स्वात्मन्येवोन्मुखः सन् स्वस्वरूपेण तिष्ठतीत्यर्थः ॥ ६ ॥

इति भांडस्थलम् ॥

अर्थ–॥ ६ ॥ ज्यानें आपल्या विचाररूपपात्रांत सर्वत्रैलोक्याचें ज्ञानतत्व सांठवून ठेविलें आहे (ज्याला आपल्या विचारशक्तीमुळें कोठें काय चाललें आहे तें सर्व समजतें), त्याला दुसऱ्याच्या तोंडाकडे मुळींच पाहावें लागत नाहीं. तो मुक्त आत्मस्वरूपांत निमग्न असतो.

अथ भाजनस्थलम् ॥

अवतरणिका–अथ "परास्य शक्तिर्विपुला विकर्त्री स्वाभाविकी रुद्रसमानधर्मिणी ॥ ज्ञानक्रियेच्छादिसहस्ररूपा तन्मे मनः शिवसंकल्पमस्तु" इति शिवसंकल्पश्रुत्यनुसारेण । "या सा माहेश्वरी शक्तिः सर्वानुग्राहिका शिवा ॥ धर्मानुवर्तनादेव पाश इत्युपचर्यते" इति मृगेंद्रवचनानुसारेण च तद्भांडस्थलसंपन्नस्य शिवयोगिनो विमर्शस्याश्रयीभूता तिरोभावशक्तिरेव भाजनमिति सूत्रद्वयेन निरूपयति—

श्लोकः—समस्तजगदंडानां सर्गस्थित्यंतकारणम् ॥
विमर्शो भासते यत्र तद्भाजनमिहोच्यते ॥ १ ॥

व्याख्यानं—समस्तभुवनांडसृष्ट्यादिकारणीभूतविमर्शपरबिंदुः यत्र तिरोधानरूपशिवसमवेतशक्तौ भासते तत् तच्छक्तिस्वरूपं इह भांडस्थलसंपन्नशिवयोगिविषये भाजनमित्युच्यते अयं भावः पंचकंचुकयुक्तचैतन्यस्य पुरुष इत्यभिधानवतः पाशत्रयानुसारिण्याः शिवशक्तेस्तिरोभाव इत्युपचारः ॥ १ ॥

अर्थ—॥ १ ॥ सर्व त्रैलोक्य उत्पन्न होणें त्याचें रक्षण करणें व त्याचा संहार करणें ह्या गोष्टींस अवश्य लागणारा विचार ज्यांत असतो त्यास भाजनस्थल असें ह्मणतात.

विमर्शाख्या परा शक्तिर्विश्ववैचित्र्यकारिणी ॥
यस्मिन् प्रतिष्ठिता ब्रह्म तदिदं विश्वभाजनम् ॥ २ ॥

C. N. Kalburgi

व्याख्यानं—विश्ववैचित्र्यकारिणी विमर्शाख्या परकुंडलिनी शक्तिः यस्मिन् तिरोभावशक्तेर्दृक्क्रियास्वरूपे प्रतिष्ठिता ब्रह्म ब्रह्मस्वरूपं तदिदं वह्न्युष्णत्वशुक्लपटन्यायेन स्वसमवेततिरोभावशक्तिदृक्क्रियास्वरूपं विश्वभाजनमित्यर्थः ॥ २ ॥

अर्थ—॥ २ ॥ जगाचा अनेकप्रकारचा चित्रविचित्रपणा दाखविणारी विमर्शनांवाची श्रेष्ठ शक्ति ज्यांत राहते तें परब्रह्मस्वरूप होय. व त्या परब्रह्मस्वरूपांत सर्व त्रैलोक्य एखाद्या पात्रांत ठेवलेल्या पदार्थाप्रमाणें राहतें (परब्रह्मस्वरूपांत राहतें.)

अवतरणिका—अथ तिरोभावविमर्शयोः किंचिन्मिश्रीभावं सूत्रद्वयेन प्रकाशयति—

श्लोकः—अंतःकरणरूपेण जगदंकुररूपतः ॥
यस्मिन्विभाति चिच्छक्तिर्ब्रह्मभूतः स उच्यते ॥ ३ ॥

व्याख्यानं—चिच्छक्तिः स्थूलवेद्यतिरोभावलक्षणा समवेतशक्तिः जगदंकुररूपतः जगदंकुरकारणीभूतेन अंतःकरणरूपेण मूलाहंकाररूपेण यस्मिन् परबिंदौ भाति सः विमर्शाख्यपरबिंदुरेव ब्रह्मभूतः परब्रह्माख्यपरशिव इत्युच्यते तच्चिद्व्यक्तिमत्परबिंदुरेव महालिंगमित्यर्थः ॥ ३ ॥

अर्थ—॥ ३ ॥ अन्तःकरणाच्या रूपानें व त्रैलोक्यरूप अंकुराच्या रूपानें ज्यांत (परबिंदूंत) शक्ति राहते त्या विमर्शनांवाच्या परबिंदूस परब्रह्म परशिव असें ह्मणावें.

अवतरणिका–नन्वहंकारमिश्रत्वान्मिथ्याभूतः किमित्यत्राह–

श्लोकः–यथा चंद्रे स्थिरा ज्योत्स्ना विश्ववस्तुप्रकाशिनी ॥
तथाशक्तिर्विमर्शात्मा प्रकाशे ब्रह्मणि स्थिता ॥ ४ ॥

व्याख्यानं—चंद्रे स्थिरा ज्योत्स्ना चंद्रिका विश्ववस्तु सर्वविश्वं प्रकारे एकदेशे यथा प्रकाशिनी प्रकाशयति तथा ब्रह्मणि दृक्क्रियात्मकपरशिवे स्थिरा स्थिरेण स्थिता विमर्शशक्तिः परामर्शमयी पराशक्तिः विश्ववस्तु सर्वं जगत् प्रकारे स्वस्वातंत्र्यपरिकल्पितांशे प्रकाशिनि प्रकाशयतीत्यर्थः मनोवाचामगोचरत्वेन पशुजनानां तिरोहितत्वात् तिरोधानशक्तिरिति प्रसिद्धा या अस्ति तथ्यकर्मकस्फूर्तिरूपायाश्चित्क्रियाशक्तेः परब्रह्मपरशिवपरलिंगादिनामानि मुख्यानि महाबिंद्वादीनां गौणानीति विवेकः ॥ ४ ॥

अर्थ–॥ ४ ॥ जगांतील सर्ववस्तूंवर उजेड पाडणारें चांदणें जसें चंद्रामध्यें राहतें त्याप्रमाणें विचाररूपशक्ति परब्रह्मस्वरूपामध्यें राहते.

अवतरणिका–ननु मुख्यप्रकाशात्मकं ब्रह्मशक्त्यैकरूपं सत् कथमास्त इत्यत्राह—

श्लोकः–अकारः शिव आख्यातोऽहंकारः शक्तिरुच्यते ॥
शिवशक्तिमयं ब्रह्म स्थितमेकमहं पदे ॥ ५ ॥

व्याख्यानं—"अक्षराणामकारोस्मि" इति भगवदुक्तेः "अकारो वै सर्वावाक्" इति श्रुतेश्च अकारः सप्तदशीयः शिवइत्याख्यातः हकारः शक्तिः हकारोंत्यः कलारूपइत्यागमोक्तेः चैतन्यरूपिणी दृक्क्रियाशक्तिरित्युच्यते शिवशक्तिमयं एवं शिवशक्तिरूपं ब्रह्म परब्रह्म एकं सत् अहंपदे अहमितिस्थाने स्वरूपे स्थितं कालत्रयेपि वर्तत इत्यर्थः अनेनाहंरूपं ब्रह्मेतिवदंतो वैय्यासिकाः प्रत्युक्ताः नित्यापरोक्षं ब्रह्मेत्यंगीकृतत्वे तद्व्यतिरिक्तस्य कथंचिदप्यदृश्यत्वादिति ॥ ५ ॥

अर्थ–॥ ५ ॥ "अ" ह्या अक्षराचा अर्थ शिव असा होतो "हं" ह्या अक्षराचा अर्थ शक्ति असा करावा हीं दोन्ही अक्षरें मिळून "अहं" असा शब्द झाला शिवशक्तिमयच ब्रह्म आहे तें ब्रह्म आहे तें ब्रह्म एक होऊन "अहं" अहं ह्या पदांत राहतें.

अवतरणिका–अथैवंरूपाहंतां प्राप्य शिवयोगी विश्वरूपः सन् प्रतिभातीत्याह—

श्लोकः–अहंतां परमां प्राप्य शिवशक्तिमयीं स्थिराम् ॥
ब्रह्मभूयंगतो योगी विश्वात्मा प्रतिभासते ॥ ६ ॥

व्याख्यानं—परमां देशकालाकारोत्तीर्णां शिवशक्तिमयीं शिवाभिन्नशक्तिमयीं अहंतां सप्तदशीयचित्कलां प्राप्य स्वात्माभेदेन स्थिरां स्थिरीभूतां ज्ञात्वा विमृश्य ब्रह्मभूयंगतः ब्रह्मस्वरूपं गतः शिवयोगी विश्वात्मा जगद्रूपः सन् प्रतिभासते प्रकाशत इत्यर्थः ॥ ६ ॥

अर्थ—॥ ६ ॥ शिवशक्तिरूप श्रेष्ठ मीपणास (सप्तदशी चित्कलेला) (अहंतेस) पाऊन ब्रह्मसायुज्य पावलेला शिवयोगी विश्वात्मा (त्रैलोक्याचें स्वरूप) असल्याप्रमाणें शोभतो.

अवतरणिका—अथ कथं विश्वरूपः सन् शिवयोगी भासत इत्यत्र "यथान्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः ॥ तथा हृदयबीजस्थं जगदेतच्चराचरं" इति श्रीपरात्रिंशिकाशास्त्रोक्तप्रकारेण वदन् भाजनस्थलं समापयति—

श्लोकः—वृक्षस्थं पत्रपुष्पादि वटबीजस्थितं यथा ॥
तथा हृदयबीजस्थं विश्वमेतत्परात्मनः ॥ ७ ॥

व्याख्यानं—वृक्षस्थं वटवृक्षस्थं पत्रपुष्पादिसमस्तं यथा वटबीजे स्थितं तिष्ठतीत्यर्थः तथा एतत् विश्वं समस्तं परात्मनः परब्रह्मरूपस्य भाजनस्थलसंपन्नस्य शिवयोगिनः हृदयबीजस्थं "कलासप्तदशीयज्ञेया स्वांतर्लीनचराचरा" इत्यागमोक्तेः। "अथाद्यास्थितयः सर्वे स्वराबिंद्ववसानकाः। तदंतःकालयोगेन सोमसूर्यौ प्रकीर्तितौ ॥ पृथिव्यादीनि तत्वानि पुरुषांतानि पंचसु। क्रमात्कादिषु वर्गेषु मकारांतेषु सुव्रते। वाय्वग्निसलिलेंद्राणां धारणानां चतुष्टयम्। तदूर्ध्वेशादि विख्यातं पुरस्ताद्ब्रह्मपंचकम्। अमूलात्तत्क्रमाज्ज्ञेया क्षांतासृष्टिरुदाहृता" इति। श्रीपरात्रिंशिकाशास्त्रोक्तप्रकारेण आदिक्षांतपंचाशद्वर्णानां देशकालाकाररूपत्वात् प्रत्यवमर्शात्मासौ चितिः स्वरसवाहिनी परा वाग्या आद्यंतप्रत्याहृतवर्णगणा सत्यहंता सेति पंचाशिकाशास्त्रस्थित्या क्षकारस्य कषयोगरूपत्वेन हकारस्यैवांत्यत्वात् देशकालाकारवाचकसकलमातृकार्णक्रोडीकारलक्षणप्रत्याहृताकारहकाररूपशिवशक्तिसंमेलनस्फुरिततदंतर्गतवेद्यसंस्कारलक्षणाबिंदुस्पंदमयनरशक्तिशिवात्मकाहंपरामर्शरूपचित्क्रियासामरस्यलक्षणहृदयबीजे तादात्म्येन तिष्ठतीत्यर्थः अत्र अकारादिहकारांतसूक्ष्मादिवाक् शक्तिरूपो विमर्शः तदात्मिकाहंपदे पशुजनागोचरत्वेन भासमानानाहतनादलक्षणपरा वाक्शक्तिमयीचिच्छक्तिर्विधानशक्तिरिति रहस्यं "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते" इति वैय्याकरणवचनानुसारादिति ॥ ७ ॥

इति भाजनस्थलं ॥

अर्थ—॥ ७ ॥ वडाच्या झाडास येणारीं पानें·फुलें तें झाड उगवण्यापूर्वी बीजा-

मध्यें सूक्ष्मरूपानें जशीं असतात त्याप्रमाणें हें स्थावर जंगमत्रैलोक्य परमेश्वराच्या हृदयरूप बीजामध्यें राहतें.

अथ अंगालेपनस्थलम् ॥

अवतरणिका–अथ "यथा पुष्करपलाश आपो न श्लिष्यंते एवमेवपापकर्म न श्लिष्यत" इति छांदोग्यश्रुत्यनुसारेण "एवंभूतस्य कर्माणि क्रियमाणानि योगिनः ॥ प्रयांति नैव लिप्यंते पुण्यापुण्यानि संक्षयं" इति योगजागमवचनानुसारेण च तिरोभावलक्षणद्दक्क्रियाभाजवनवतः शिवयोगिनः कर्मांगे लेपकं न भवतीत्यंगलेप इति सूत्रत्रयेण कथयति—

श्लोकः–दिक्कालाद्यनवच्छिन्नं चिदानंदमयं महत् ॥
यस्य रूपमिदं ख्यातं सोंऽगालेप इहोच्यते ॥ १ ॥

व्याख्यानं—दिग्देशकालत्रयेऽपि परिच्छेदरहितं चिदानंदस्वरूपं बृहत् इदं प्रादुर्भूतदृक्क्रियारूपं यस्य तिरोभावभाजनसंपन्नस्य शिवयोगिनः रूपं स्वरूपमिति ख्यातं सः तद्भाजनस्थलसंपन्नः शिवयोगी अंगे कर्मलेपरहित इति इहोच्यत इत्यर्थः ॥१॥

अर्थ–॥ १ ॥ जें ज्ञानस्वरूप दिशा आणि काल ह्यामुळें छिन्नभिन्न होत नाहीं तें अक्षय आणि सदोदित परिपूर्ण असतें तें आनंदस्वरूप असून मोठें आहे असें ज्याचें स्वरूप आहे अशी प्रसिद्धि आहे त्यास अंगालेपस्थल ह्मणतात.

अवतरणिका–अत्र दृष्टांतमाह—

श्लोकः–समस्तजगदात्माऽपि संविद्रूपो महामतिः ॥
लिप्यते नैव संसारैर्यथा धूमादिभिर्नभः ॥ २ ॥

व्याख्यानं—सकलजगच्चैतन्यात्मकः सन् चिद्रूपो महाधीमान् शिवयोगी धूममेघादिभिर्नभो यथा न लिप्यते तथा संसारपापकर्मभिर्न लिप्यत इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ जसा धुराचा मोठा लोट आकाशांत जाऊन पसरला तरी आकाशाच्या स्वरूपास कांहींच विकार होत नाहीं त्याप्रमाणें शिवयोगी सर्वप्राणिमात्रांचा आत्मा आहे तरी तो ज्ञानस्वरूप असून मोठा ज्ञानी आहे त्यामुळें त्याला संसारदुःख मुळींच भोगावें लागत नाहीं.

अवतरणिका–कुत इत्यत्राह—

श्लोकः–न विधिर्न निषेधश्च न विकल्पो न वासना ॥
केवलं चित्स्वरूपस्य गलिता प्राकृतात्मनः ॥ ३ ॥

व्याख्यानं—गलितेति निवृत्तप्राकृतकर्मप्रयत्नवतः केवलचिद्रूपस्य शिवयोगिनः न विधिः विध्युक्तकर्म नास्ति न निषेधश्च निषिध्यमानकर्मापि नास्ति न विकल्पः अस्ति नास्तीति विकल्पो नास्ति न वासना तद्वासनापि नास्तीत्यर्थः ॥ ३ ॥

अर्थ-॥ ३ ॥ ज्ञानस्वरूप व लौकिककर्म न करणाऱ्या शिवयोग्याला विधि नाहीं, निषेध नाहीं, विकल्प नाहीं, किंवा वासना नाहीं; ज्ञानस्वरूपास हे विकार होत नाहींत.

अवतरणिका-अथ वासनारहितस्य शिवयोगिनः अभेदज्ञानं सदृष्टांतं सूत्रद्वयेन विशेषयति—

C. N. Kalburgi

श्लोकः-घटादिषु पृथग्भूतं यथाकाशं न भिद्यते ॥
तथोपाधिगतं ब्रह्म नानारूपं न भिद्यते ॥ ४ ॥

व्याख्यानं—घटमठादिषु पृथग्भूतं व्योम यथा न भिन्नं तथा देवदानवाद्युपाधिगतं ब्रह्म नानारूपमपि न भिद्यत इत्यर्थः ॥ ४ ॥

अर्थ-॥ ४ ॥ पुष्कळ घागरी तयार केल्या तर प्रत्येक घागरींत राहणारें आकाश (पोंकळी) हें निरनिराळें दिसतें, तरी तें निराळें नव्हे तें एकच आहे, त्याचप्रमाणें उपाधीमुळें (निरनिराळ्या कारणामुळें) तें ब्रह्मस्वरूप अनेकप्रकारचें झालेलें दिसतें, तरी अनेकप्रकारचें नव्हे तें एकच आहे.

अनश्वरमनिर्देश्यं यथा व्योम प्रकाशते ॥
तथा ब्रह्मापि चैतन्यमत्र वैशेषिकी कला ॥ ५ ॥

व्याख्यानं—व्योम नाशरहितमनुपमं सत् यथा प्रकाशते तथा ब्रह्मापि प्रकाशते अत्र ब्रह्मणि चैतन्यं दृक्क्रियारूपं वैशेषिकी कला जडभूतभूताकाशापेक्षया विशेषीभूतकलेति चिदाकाशरूपं ब्रह्मेत्यर्थः अत्रानश्वरत्वं निरवयवत्वं न नित्यत्वमिति बोध्यं जडत्वादिति ॥ ५ ॥

अर्थ-॥ ५ ॥ जसें आकाश नेहमीं राहणारें (शाश्वत) आहे, तें अमुक एकप्रकारचें आहे ह्मणून सांगतां येत नाहीं असें दिसतें; तसेंच ब्रह्मस्वरूप हें शाश्वत आणि अवर्णनीय आहे. त्यांत ज्ञान ही एकप्रकारची विशेष (अलौकिक) कला आहे.

अवतरणिका-अथ चिदाकाशरूपः शिवयोगी पूर्ण इत्युक्त्वा अंगालेपस्थलं समापयति—

श्लोकः-न देवत्वं न मानुष्यं न तिर्यक्त्वं न चान्यथा ॥
सर्वाकारत्वमाख्यातं जीवन्मुक्तस्य योगिनः ॥ ६ ॥

व्याख्यानं—जीवन्मुक्तस्य योगिनः कर्मपाशरहितत्वात् पुण्यकर्मसिद्धदेवत्वं नास्ति पुण्यपापमिश्रतोद्भूतमानुष्यमपि नास्ति पापजन्यतिर्यक्प्राणित्वं च नास्ति तद्व्यतिरेकेण मायागर्भे मलमूर्छितत्वेन विद्यमानतापि नास्ति किंतु सर्वत्र परिपूर्ण-चिदाकाशरूपत्वमाख्यातं नित्यपरिपूर्णचित्प्रसादवतः शिवयोगिनः सिद्धांतप्रसिद्धमायामलबिंदुतिरोभावकर्मरूपपंचपाशबंधो नास्तीति भावः ॥ ६ ॥

इत्यंगालेपस्थलं ॥

अर्थ–॥ ६ ॥ जीवन्मुक्त झालेल्या शिवयोग्याला सर्व ठिकाणीं शिवस्वरूपच आहे असें दिसतें. हा देवपणा आहे, हा मनुष्यपणा आहे, हा पशुपक्षीपणा आहे वगैरे निरनिराळेपणा त्याला मुळींच वाटत नाहीं.

अथ स्वपराज्ञस्थलम् ॥

अवतरणिका–अथ "यथा प्रियया संपरिष्वक्तो न बाह्यं किंचन वेदनांतरम् एवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेदनांतरं" इति बृहदारण्यकश्रुतेः "स्वयं स्वस्य परो नैव न परः स्वस्य विद्यते ॥ इति धार्येपि संलीने तस्मिन् ज्ञेयं न तस्य हि" इति सर्वज्ञोनोत्तरवचनाच्च अंगालेपः शिवयोगी प्राथमिकपंचस्थलप्रतिपादितपाशपंचकराहित्येन स्वं परं न जानातीति प्रतिपादयति—

श्लोकः–अप्रमेये चिदाकारे ब्रह्मण्यद्वैतवैभवे ॥
विलीनः किंनु जानाति स्वात्मानं परमेव वा ॥ १ ॥

व्याख्यानं—अपरिमिते स्फुरणरूपे "एकमेवाद्वितीयं ब्रह्मेति" श्रुतेः स्वगतसजातीयविजातीयभेदशून्ये परब्रह्मणि सामरस्यं गतः अंगालेपः स्वात्मानं वा परं वा जानाति किं? न जानातीत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ परब्रह्मस्वरूप अनुपमेय (अलौकिक) आहे, ज्ञानस्वरूप आहे, त्यांत अद्वैतमताचेंच प्राबल्य आहे. त्या परब्रह्मस्वरूपांत तल्लीन झालेल्या शिवयोग्याला हें माझें शरीर आहे आणि हें दुसऱ्याचें शरीर आहे असा द्वैतभाव मुळींच वाटत नाहीं.

अवतरणिका–अथ अमुमेवार्थं पंचभिः सूत्रैर्विशेषयति—

श्लोकः–यत्र नास्ति भिदायोगादहं त्वमिति विभ्रमः ॥
न संयोगो वियोगश्च न ज्ञेयज्ञातृकल्पना ॥ २ ॥

न बंधो न च मुक्तिश्च न देवाद्यभिमानिता ॥
न सुखं नैव दुःखं च नाज्ञानं ज्ञानमेव वा ॥ ३ ॥
नोत्कृष्टत्वं न हीनत्वं नोपरिष्टान्न चाप्यधः ॥
न पश्चान्नैव पुरतो न दूरे किंचिदंतरे ॥ ४ ॥
सर्वाकारे चिदानंदे सत्यरूपिणि शाश्वते ॥
पराकाशमये तस्मिन् परे ब्रह्मणि निर्मले ॥ ५ ॥
एकीभावमुपेतानां योगिनां परमात्मनाम् ॥
परापरपरिज्ञानपरिहासकथा कुतः ॥ ६ ॥

व्याख्यानं—यत्र अद्वैतवैभववति ब्रह्मणि योगात् दृग्द्वयवत् समानसमरसयोगात् अहं त्वमिति भेदविभ्रमः नास्ति उभयोरप्यहंप्रत्ययैकत्वविश्रांतत्वात् संयोगवियोगौ च नस्तः ज्ञेयज्ञातृकल्पना च यत्र नास्ति बंधो मुक्तिश्च यत्र नास्ति देवत्वाद्यभिमानोपि यत्र नास्ति न सुखं वैषयिकसुखं यत्र नास्ति नैव तादृग्दुःखं नेंद्रियजं ज्ञानं नाज्ञानं न श्रेष्ठत्वं न निकृष्टत्वं नोपरिभागः नचाधोभागः न पश्चाद्भागः न पूर्वभागश्च तस्मिन्नदूरे किंचिद्दूरे सर्वस्वरूपे चिदानंदसत्यरूपिणि शाश्वते निर्मले पराकाशमये ब्रह्मणि एकीभावंगतानां अतएव परब्रह्मस्वरूपाणां शिवयोगिनां परं स्वं च जानामीति परिहासप्रसंगः कुतः व्यापकत्वादेकत्वान्नास्तीत्यर्थः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

अर्थ–॥ २ ॥ ज्या परब्रह्मस्वरूपांत भेदबुद्धीमुळें (मी वेगळा परमेश्वर वेगळा अशा समजुतीमुळें) मीपणा आणि तूंपणा अशी भ्रांतीच पडत नाहीं; त्यांत संयोग नाहीं, वियोग (तुटातुट) नाहीं. जाणावयाचें व जाणणारा ही निराळेपणाची देखील कल्पना नाहीं. ॥ ३ ॥ त्याला बंध (अटकाव) नाहीं किंवा मुक्ति नाहीं, मी देव आहें ह्मणून सर्वापेक्षां श्रेष्ठ आहें असा गर्व होत नाहीं. सुख नाहीं, दुःख नाहीं, ज्ञान नाहीं किंवा अज्ञान नाहीं. ॥ ४ ॥ त्याला श्रेष्ठपणा नाहीं किंवा नीचपणा नाहीं, वर नाहीं किंवा खालीं नाहीं, मागें नाहीं किंवा पुढें नाहीं दूर नाहीं किंवा जवळ नाहीं. ॥ ५ ॥ परब्रह्मस्वरूप सर्व त्रैलोक्य मिळून एकरूप झाल्यासारखें आहे, ज्ञानस्वरूप आहे, सत्यस्वरूप असून श्रेष्ठ व निर्दोष आहे. ॥ ६ ॥ त्या अशा रीतीच्या परब्रह्मस्वरूपांत मिळून गेलेल्या (सामरस्यामुळें एक झालेल्या) परकाय शिवयोग्यांस आपलेपणा आणि परकेपणाच्या समजुतीच्या थट्टेची गोष्ट कोठली? (त्यांस भिन्नभाव मुळींच नसतो.

अवतरणिका-अथेममर्थमेव विशेषयन् स्वपराज्ञस्थलं समापयति—

श्लोकः-देशकालानवच्छिन्नतेजोरूपसमाश्रयात् ॥
स्वपरज्ञानविरहात् स्वपराज्ञस्थलं विदुः ॥ ७ ॥

व्याख्यानं—तेजोरूपं चित्प्रकाशरूपमित्यर्थः शिष्टं स्पष्टं ॥ ७ ॥

इति स्वपराज्ञस्थलम् ॥

अर्थ-॥ ७ ॥ देश आणि काल ह्यामुळें छिन्नभिन्न न होतां अखंडपणानें राहणाऱ्या तेजोरूपाचा आश्रय केल्यामुळें, व स्वरूपज्ञान नाहींसें झाल्यामुळें, त्यास स्वपराज्ञस्थल (स्वपरभाव नसणारें असें स्थल) ह्मणतात.

अथ भावाभावलयस्थलम् ॥

अवतरणिका-अथ "निद्रांतं जागरितांतं चोभौ यो वा न पश्यति ॥ महांतं विभुमात्मानं मत्वा धीरो न शोचति ॥" इति कठवल्लीश्रुत्यनुसारेण । "भावाभावद्वयातीतं स्वप्नजागरणातिगम् ॥ मृत्युजीवननिर्मुक्तं तत्वं तत्वविदो विदुः" इति योगजागमवचनानुसारेण च तत्स्वयपरज्ञानशून्यस्य शिवयोगिनः भावाभावौ न स्त इति निरूपयति—

श्लोकः-त्वंताहंताविनिर्मुक्ते शून्यकल्पे चिदंबरे ॥
एकीभूतस्य सिद्धस्य भावाभावकथा कुतः ॥ १ ॥

व्याख्यानं—परिच्छिन्नशरीरविशिष्टत्वमहंभावरहिते शून्यसदृशे चिदाकाशे एकरसीभूतस्य स्वपरज्ञानशून्यस्य सिद्धस्य शिवयोगिनः भावाभावप्रसंगः कुतः नास्तीत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ चिदंबरस्वरूपांत मीपणा आणि तूंपणा नाहीं, तें खरोखर शून्यासारखें आहे; त्या चिदंबर (परमेश्वर) स्वरूपांत सामरस्य पावलेल्या शिवयोग्याला भाव आणि अभाव ही गोष्टच माहीत होत नाहीं.

अवतरणिका-अथ तद्भावाभावलयस्वरूपं सूत्रद्वयेन प्रतिपादयति—

श्लोकः-अहंभावस्य शून्यत्वादभावस्य तथात्मनः ॥
भावाभावविनिर्मुक्तो जीवन्मुक्तः प्रकाशते ॥ २ ॥

व्याख्यानं—अहंभावराहित्यात् आत्मनः अयमात्मा ब्रह्मेति प्रसिद्धपरमात्मनः अभावस्य तथा शून्यत्वात् जीवन्मुक्तः स्वपरज्ञानशून्यः सन् अमनस्कतंद्रिमुद्रास्थितः शिवयोगी भावाभावविनिर्मुक्तः अहमिति परिच्छिन्नदेहाहंभावः आत्मा नास्तीत्यभावः एवंरूपभावाभावशून्यः सन् स्वस्वरूपेण प्रकाशते सकलदुःखभोक्ता सन् सुप्तिलयगामिमूलाहंकारोस्तीति भावेन सर्वसाक्षिकत्वेनावस्थात्रयेऽप्यवच्छेदेन भासमानचैतन्यं नास्तीत्यभावेन च विविक्त एव भावाभावरहित इत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ ज्याचा मीपणा नाहींसा झाला आहे, तसाच मी हा शब्द देखील ज्याला राहिलेला नाहीं (मानीत नाहीं), ज्याला भाव आणि अभाव माहीत नाहीं, तो जीवन्मुक्त होऊन शोभतो.

सुखदुःखादिभावेषु नाभावो भाव एव वा ॥
विद्यते चित्स्वरूपस्य निर्लेपस्य महात्मनः ॥ ३ ॥

व्याख्यानं—उक्तलक्षणमूलाहंकारलेपरहितस्य चित्स्वरूपस्य महापुरुषस्य सुखदुःखादिसंबंधेषु अभावः भाव एव वा न विद्यते निर्लेपत्वेन व्यापकत्वादित्यर्थः ॥३॥

अर्थ–॥ ३ ॥ चित्स्वरूपाला कोणताही विकार नसून तें महासमर्थ आहे; त्या ज्ञानस्वरूपाला सुखाचा किंवा दुःखाचा भावही नाहीं आणि अभावही नाहीं.

अवतरणिका–एवं भावाभावशून्यस्य किमपि न दृश्यत इत्यत्राह—

श्लोकः–यस्मिन् ज्योतिषि चिद्रूपे दृश्यते नैव किंचन ॥
सद्रूपं वाप्यसद्रूपं भावाभावं विमुंचतः ॥ ४ ॥

व्याख्यानं—स्पष्टं ॥ ४ ॥

अर्थ–॥ ४ ॥ ज्याचा भाव आणि अभाव (आहेनाहींपणा) नाहींसा झालेला आंहे, त्या शिवयोग्याला त्या तेजोमय चित्स्वरूपांत चांगलें रूप किंवा वाईट रूप कांहींएक दिसत नाहीं, त्यास सर्वत्र शिवस्वरूपच दिसतें.

अवतरणिका–अथ भावाभावलयस्थलं समापयति—

श्लोकः–प्रतीयमानौ विद्येते भावाभावौ न कुत्रचित् ॥
लिंगैक्ये सति यत्तस्माद्भावाभावलयस्थलम् ॥ ५ ॥

व्याख्यानं—प्रकाशमानौ भावाभावौ शिवलिंगैकरसीभूतमहापुरुषविषये क्वचिदपि यस्मात्कारणात् न विद्येते नस्तः तस्मात् भावाभावलयस्थलमित्युक्तमित्यर्थः ॥ ५ ॥

इति भावाभावलयस्थलं ॥

अर्थ-॥ ५ ॥ शिवलिंगैक्य झालें असतांना कोठेंही भाव आणि अभाव दिसून येत नाहींत; ह्यामुळें त्यास भावाभावलयस्थल असें ह्मणतात.

अथ ज्ञानशून्यस्थलम् ॥

अवतरणिका "अथ अप अप्स्वग्निमग्नौ वायुं वायौ व्योम्नि व्योमलक्षयेत् एवमंतर्गतं चित्तं पुरुषे प्रतिमुच्यत" इति मैत्रेयश्रुत्यनुसारेण "सर्वशून्यं निराभासं सामरस्यं तथा भवेत् । घृते घृतं यथान्यस्तं क्षीरे क्षीरं यथैव च" इति सर्वज्ञानोत्तरवचनानुसारेण च स्वपरज्ञानशून्यत्वेन भावाभावलयसंपन्नस्य शिवयोगिनः अभेदसुलभज्ञानशून्यस्थलं सूत्रत्रयेण निरूपयति—

श्लोकः—परापरसमापेक्षभावाभावविवेचनम् ॥
ज्ञानं ब्रह्मणि तन्नास्ति ज्ञानशून्यस्थलं विदुः ॥ १ ॥

व्याख्यानं—परापरज्ञानाभिलाषयुक्तभावाभावविवेकवज्ज्ञानं ब्रह्मणि परब्रह्मस्वरूपे भावाभावलयसंपन्ने शिवयोगिनि नास्ति तत् ज्ञानशून्यस्थलमिति विदुः जानंतीत्यर्थः ॥ १ ॥

अर्थ-॥ १ ॥ मीपणा तूंपणा (आपलेपणा परकेपणा) ह्याची अवश्यकता असलेलें भावाभावाच्या विचाराविषयीं ज्ञान ब्रह्मस्वरूप व भावाभावसंपन्न अशा शिवयोग्यांत नाहीं; त्याला ज्ञानशून्यस्थल ह्मणतात.

अवतरणिका-तर्हि स कथं तिष्ठतीत्यत्राह—

श्लोकः—जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम् ॥
परे ब्रह्मणि लीनात्मा विभागेन न दृश्यते ॥ २ ॥

व्याख्यानं—जलमिश्रजलमिव वह्निस्थापितवह्निरिव परब्रह्मस्वरूपमहालिंगे लयीभूतभावाभावप्रयत्नवान् शिवयोगी भिन्नभावेन न दृश्यते न तिष्ठतीत्यर्थः । ज्ञानशून्यत्वादिति । अत्र द्वैतज्ञानशून्यशिवाद्वैते जलवह्निदृष्टांतः आप्यतैजसस्थलरूपदृग्युगैक्यवत्समानसमरसरूपः नतु स्वरूपहानिवृद्धिकरः समुद्रजलवदिति ॥२॥

अर्थ-॥ २ ॥ पाण्यांत पाणी टाकलें तर सारखेंच दिसतें, विस्तवांत विस्तव टाकला तर तोही एकसारखा दिसतो; त्याप्रमाणें परब्रह्मस्वरूपांत लीन झालेला शिवयोगी अमुक वस्तूहून अमुकवस्तु निराळी आहे असें मुळींच मानीत नाहीं, सर्वत्र शिवस्वरूपच भरलें आहे असें मानतो.

सर्वात्मनि परे तत्वे भेदशंकाविवर्जिते ॥
ज्ञात्रादिव्यवहारोत्थं कुतो ज्ञानं विभाव्यते ॥ ३ ॥

व्याख्यानं—स्पष्टं ॥ ३ ॥

अर्थ–॥ ३ ॥ श्रेष्ठतत्व हें सर्वजगाचें स्वरूप आहे (सर्व जग त्या परब्रह्म स्वरूपांत राहतें), त्या तत्वस्वरूपांत निराळेपणाची कल्पना देखील नाहीं; त्या रूपांत ज्ञातृ ज्ञेय आणि प्रमाण ह्या तीनतऱ्हेचें ज्ञान कोठून संभवणार आहे? मुळींच संभवत नाहीं.

अवतरणिका–अथ तदेव सूत्रत्रयेण विशेषयति—

श्लोकः–निर्विकारं निराकारं नित्यं सीमाविवर्जितम् ॥
व्योमवत्परमं ब्रह्म निर्विकल्पतया स्थितम् ॥ ४ ॥
न पृथ्व्यादीनि भूतानि न ग्रहा नैव तारकाः ॥
न देवा न मनुष्याश्च न तिर्यंचो न चापरे ॥ ५ ॥
तस्मिन् केवलचिन्मात्रसत्तानंदैकलक्षणे ॥
त्वंताहंतादिसंरूढं विज्ञानं केन भाव्यते ॥ ६ ॥

व्याख्यानं—मृदादिवद्विकाररहितं नीलपीताद्याकाररहितं अवधिरहितं परंब्रह्म व्योमवन्निर्विकल्पतया भेदराहित्येन स्थितं तिष्ठति अतएव भिन्नतया प्रतीयमान-भूम्यादिभूतानि न आदित्यादिनवग्रहाश्च न अश्विन्यादितारकाश्च न विष्ण्वादि-देवाश्च न मनुष्याश्च न तिर्यक्प्राणिनश्च न परे च न तस्मात् केवलसच्चिदानंदस्वरूपे ब्रह्मणि त्वमहमादिकव्यवहारोत्थविशेषज्ञानं केन भाव्यते न केनापि भाव्यत इत्यर्थः ॥ ४ ॥ ५ ॥ ६ ॥

अर्थ–॥ ४ ॥ ब्रह्मस्वरूपास विकार नाहीं, आकार नाहीं, तें शाश्वत आहे, त्यास मर्यादा नाहीं, तें आकाशाप्रमाणें सर्वत्र व्यापलेलें आहे, व त्यास कोणत्याहीप्रकारचा विकल्प नाहीं; तें अशा प्रकारानें राहतें. ॥ ५ ॥ त्या परब्रह्मस्वरूपांत पृथ्वी अप् तेज वायु आकाश वगैरे पंचमहाभूतांचा संबंध नाहीं, त्या रूपांत नऊ ग्रह किंवा तारका ह्यांचा संबंध नाहीं, त्या रूपांत देव नाहींत, मनुष्य नाहींत, पशु पक्षी नाहींत किंवा दुसरे कोणी नाहींत. ॥ ६ ॥ त्या केवल ज्ञान सत्ता आणि आनंद अशाप्रकारचें लक्षण असणाऱ्या परब्रह्मस्वरूपांत तूंपणा आणि मीपणा वगैरेपासून उत्पन्न होणारें ज्ञान कोठून अनुभवास येईल? मुळींच येणार नाहीं.

अवतरणिका–अथ "एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातःपरं वेदितव्यं च किंचित्" ॥ इति श्वेताश्वतरश्रुत्यनुसारेण "केवलं

ज्ञेयमित्युक्तं वेदितव्यं च किंचन" इति देवीकालोत्तरवचनानुसारेण च स्वस्वरूपज्ञानिनस्त्रिपुटिमयप्रपंचज्ञानं नास्तीति पंचभिः सूत्रैः प्रतिपादयति—

श्लोकः—ज्ञेयाभावाद्विशेषेण शून्यकल्पं विभाव्यते ॥
ज्ञातृज्ञेयादिभिःशून्यं शून्यं ज्ञानादिभिर्गुणैः ॥ ७ ॥
आदावंते च मध्ये च शून्यं सर्वत्र सर्वदा ॥
द्वितीयेन पदार्थेन शून्यं शून्यं विभाव्यते ॥ ८ ॥

व्याख्यानं—ज्ञेयाभावात् सकलवस्तुविषयकज्ञानाभावेन ज्ञेयपदार्थशून्यत्वात् संविदेव भगवति विषयसत्त्वोपगमे शरणमिति प्रभाकरैरप्यंगीकृतत्वात् शून्यकल्पं ज्ञानमिति शेषः विभाव्यते तस्मात् ज्ञातृज्ञेयादित्रिपुटिमयप्रपंचशून्यं ज्ञानादिभिः ज्ञानेच्छादिगुणैश्च शून्यं आद्यंतमध्येषु सर्वत्र सर्वदा शून्यं केनेत्यत्राह द्वितीयेन पदार्थेन शून्यमिति तस्मात् शून्यं शून्यज्ञानं विभाव्यते ॥ ७ ॥ ८ ॥

अर्थ—॥ ७ ॥ त्या रूपांत जाणतां येईल अशी कोणाची शक्ति नसल्यामुळें (त्यांत जाणण्यासारखें कांहीं नसल्यामुळें), तें बहुत करून शून्याप्रमाणेंच दिसून येतें, त्यांत ज्ञातृज्ञेयप्रमाण वगैरे कांहींएक नाहीं. ज्ञान वगैरे दुसरे ही कोणते गुणधर्म ह्या परब्रह्मस्वरूपांत नाहींत.

अर्थ—॥ ८ ॥ आधीं, शेवटीं किंवा तरुणपणाच्या स्थितींत जें नेहमीं शून्य आहे (त्याला जन्म नाहीं, त्याला तारुण्य नाहीं व मरणही नाहीं.), त्याची बरोबरी करील असा जगांत दुसरा पदार्थ नाहीं. सारांश तें सर्वतोपरि शून्य असल्याप्रमाणें अनुभवास येतें.

अवतरणिका—अथ तत्किमित्यत्राह—

श्लोकः—केवलं सच्चिदानंदप्रकाशाद्वयलक्षणम् ॥
शून्यकल्पं पराकाशं परब्रह्म प्रकाशते ॥ ९ ॥

व्याख्यानं—केवलसच्चिदानंदप्रकाशाद्वितीयशून्यचिन्हं अतएव शून्यसदृशं परब्रह्ममहाकाशरूपं सत् प्रकाशत इत्यर्थः ॥ ९ ॥

अर्थ—॥ ९ ॥ तें सत्स्वरूप, चित्स्वरूप आनंदस्वरूप प्रकाशस्वरूप आणि अद्वयस्वरूप आहे, तें शून्यासारखें असून चिदंबरस्वरूप आहे. व तें अशा-तऱ्हेचें असल्यामुळें उत्तमप्रकारानें शोभतें.

अवतरणिका–अथैवंरूपे ब्रह्मणि तादात्म्यापन्नस्य विकल्पज्ञानोत्पत्तिर्न संभवतीत्यत्राह—

श्लोकः–शून्यज्ञानादिसंकल्पे शून्यसर्वार्थसाधने ॥
ज्योतिर्लिंगे चिदाकारे स्वप्रकाशे निरुत्तरे ॥
एकीभावमुपेतस्य कथं ज्ञानस्य संभवः ॥ १० ॥

व्याख्यानं—शून्यज्ञानेच्छादिसंकल्पवति शून्यसर्वार्थसाधने स्वस्मादुत्तररहिते परमशिवलिंगज्योतीरूपचिदाकारस्वप्रकाशे एकीभावंगतस्य शिवयोगिनः ज्ञानस्य संभवः वृत्तिज्ञानाविर्भावः कथं स्यात् न कथंचिदपीत्यर्थः ॥ १० ॥

अर्थ–॥ १० ॥ परब्रह्मस्वरूपांत इतर ज्ञानादिकांचें तर नांव देखील नाहीं, त्याला कोणतीही वस्तु प्राप्त करून घ्यावयाची नाहीं (तें सर्वगुणसंपन्न आहे), तें तेजोमय लिंगस्वरूप आहे, तें ज्ञानस्वरूप असून स्वतः प्रकशमान आहे. त्याला दुसऱ्या प्रकाशमान वस्तूंचें किरण नाहीं, तेंच इतर वस्तूंस प्रकाशित करतें, त्याचें कोणी खंडन करीत नाहीं. त्या परब्रह्मस्वरूपांत सामरस्य पावलेल्या योगीश्वरास भेदबुद्धीचें ज्ञान कसें उत्पन्न होईल? मुळींच उत्पन्न होणार नाहीं.

अवतरणिका–"अथ नेति नेत्यस्थूलमनण्वऱ्हस्वदीर्घप्लुत" इति बृहदारण्यश्रुत्यनुसारेण "अनाख्ये तु निरालंबे ह्यग्राह्ये मानवर्जिते। निस्तत्वे योजितो मुक्त इति शास्त्रस्य निश्चयः" इति निश्वासकारिकातंत्रानुसारेण "पशुपशुपतियोगो दृग्युगैक्यप्रयोगो गगनगगनदेशः सिंधुसिंधुप्रदेशः। समसमरसरूपो भिन्नभिन्नस्वरूपो निशि समरसकांतावल्लभाश्लेषकांतः" इति त्रयीतंत्रयुक्तियुक्ताभियुक्तोक्त्यनुसारेण च परमुक्तलक्षणमुक्त्वा ज्ञानशून्यस्थलं समापयन्ति—

श्लोकः–यस्य कार्यदशा नास्ति कारणत्वमथापि वा ॥
शेषत्वं नैव शेषित्वं स मुक्तः पर उच्यते ॥ ११ ॥

व्याख्यानं—यस्य सर्वं नेति नेति निवार्य तत्वातीतस्य स्वस्वरूपसंपन्नस्य कार्यावस्था नास्ति, अथापि वा तन्न चेत्कारणत्वं च नास्ति यस्य परब्रह्मपरशिवपरलिंगादिपर्यायनामोच्चारवतः स्वस्वरूपसंपन्नस्य शेषत्वं अवशेषत्वं शेषित्वं शेषवत्वं च नास्ति सः नित्यपरिपूर्णः सच्चिदानंदस्वरूपपरमुक्त एवेत्युच्यत इत्यर्थः ॥ अयं भावः "अनी-

शश्वात्मा बाध्यते भोक्तृभावादिति ज्ञात्वा देवं मुच्यते सर्वपाशैः'' इति श्वेताश्वतर-श्रुत्या ''पाशबद्धो भवेज्जीवः पाशमुक्तः परः शिवः'' इति वीरागमवचनेन देशिकोपदेशेन स्वानुभवेन च मायामलबिंदुतिरोभावकर्मपाशविमुक्तपरशिवशब्दवाच्य-स्वस्वरूपाभिव्यक्तिरेव परमुक्तिरिति एतल्लिंगत्रयं शिवलिंगैक्यस्यांगत्रयस्य क्रमेण संयोजनीयं ॥ ११ ॥

इति ज्ञानशून्यस्थलम् ॥

॥ लिंगस्थलं समाप्तम् ॥

अर्थ–॥ ११ ॥ ज्या योगीश्वरास कार्याची दशा नाहीं आणि कारणाचीही दशा नाहीं (ज्याला कार्य नाहीं आणि कारणही नाहीं, ज्याला शेषपण आणि शेषिपणही नाहीं (ज्याचें कांही शिल्लक राहिलें नाहीं किंवा जो शिल्लक राहणाराही नव्हे), त्याला मुक्त असें ह्मणतात.

अवतरणिका—अथैतच्छास्त्रसंग्रहकृच्छिवाचार्यः स्वशिष्य-प्रशिष्यान् प्रति एतच्छास्त्रोपरमं सूचयन् रेणुकगणेश्वरो निरुत्तरः सन् तूष्णीं स्थित इति सूत्रद्वयेन कथयति—

वृत्तम्–एतावदुक्त्वा परमप्रबोधमद्वैतमानंदशिवप्रकाशम् ॥
देव्यै पुरा भाषितमीश्वरेण तूष्णीमभूद्ध्यानपरो गणेंद्रः॥१॥

व्याख्यानं—गणेंद्रः रेणुकगणेश्वरः परमेश्वरेण देव्यै पार्वत्यै पुरा रहस्यं सद्भाषितं शिवानंदप्रकाशकम् शिवाद्वैतरूपं परमप्रबोधं उपक्रमोपसंहारमध्यपरामर्शेष्वपि स्वस्वरूपप्रकाशकपिंडादिवृत्तिज्ञानशून्यांतवीरशैवशास्त्रमेतावदनेन प्रकारेणोक्त्वा कुंभसंभवायोपदिश्य स्वस्वरूपध्यानासक्तः सन् तूष्णीमभूत् मौनमुद्रावलंबी बभूवेत्यर्थः ॥ १ ॥

अर्थ–॥ १ ॥ उत्तमरीतीनें शिवज्ञान करून देणारें, आनंद व कल्याण ह्या-दोहोंचीही वृद्धि करणारें, हें अद्वैतशास्त्र पूर्वी शंकरांनीं स्वतः पार्वतीस सांगितलें होतें; तेंच मीं आतां तुला सांगितलें. इतकें सांगून तो रेवणसिद्ध गणेश्वर शिवयोग समाधि लाऊन मुकाट्यानें बसला.

एवमुक्त्वा समासीनं शिवयोगपरायणम् ॥
रेणुकं तं समालोक्य बभाषे प्रांजलिर्मुनिः ॥ २ ॥

व्याख्यानं—बभाषे स्तुतिमारब्धवानित्यर्थः शिष्टं स्पष्टं ॥ २ ॥

अर्थ–॥ २ ॥ इतकें बोलून स्तब्ध राहून शिवयोगसमाधि लाऊन बसणाऱ्या त्या रेणुकेश्वरास पाहून अगस्त्यऋषि हात जोडून ह्मणाला.

अवतरणिका–अथ सप्तभिः सूत्रैः श्रीरेणुकस्तुतिं करोत्य-गस्त्य उवाचेति—

श्लोकः–शिवयोगविशेषज्ञ शिवज्ञानमहोदधे ॥
समस्तवेदशास्त्रादिव्यवहारधुरंधर ॥ ३ ॥
आलोकमात्रनिर्धूतसर्वसंसारबंधन ॥
स्वच्छंदचरितोल्लास स्वप्रकाशात्मवच्छिव ॥ ४ ॥
अवतीर्णमिदं शास्त्रमनवद्यं त्वदाननात् ॥
श्रुत्वा मे मोदते चित्तं ज्योतिः पश्ये शिवाभिधम् ॥ ५ ॥

व्याख्यानं—शिवध्यानयोगविशेषज्ञ शिवज्ञानस्यसमुद्र समस्तवेदागमपुराणादि-शास्त्रव्यवहारभारवाहक दर्शनमात्रनिवारितसमस्तजनसंसारबंध स्वेच्छाचाराविर्भाव स्वप्रकाशेनैव चैतन्यवच्छिवस्वरूप भो गणेंद्र त्वन्मुखादाविर्भूतं दोषरहितमिदं वीरशैवशास्त्रं श्रुत्वा मे मनो नंदति शिवप्रकाशं पश्ये ॥ ३ ॥ ४ ॥ ५ ॥

अर्थ–॥ ३ ॥ हे रेवणसिद्धा, तूं शिवरहस्य फार चांगल्या रीतीनें समजून घेतलें आहेस, तूं शिवज्ञानाचा महासागर आहेस, तुला सर्व वेद, सर्व शास्त्रें अवगत असून तुला व्यवहारज्ञान फार चांगलें आहे. (तूं मोठा चतुर आहेस).

अर्थ–॥ ४ ॥ तुझें दर्शन झाल्याबरोबर प्राणिमात्रांचें सर्वप्रकारचें दुःख नाहींसें होतें. तूं स्वतंत्रपणानें वागणारा असून आनंदी स्वयंप्रकाश असल्यामुळें प्रत्यक्ष शंकरासारखा आहेस. ॥ ५ ॥ तुझ्या मुखापासून हें निर्दोषरीतीचें अद्वैतशास्त्र उत्पन्न झालें (तूं स्वतः सांगितलेंस), तें ऐकून माझ्या मनास मोठा संतोष झाला व मला प्रत्यक्ष शंकराचें दर्शन झालें.

अद्य मे सफलं जन्म गतो मे चित्तविभ्रमः ॥
संजाता पाशविच्छित्तिस्तपांसि फलितानि मे ॥ ६ ॥

व्याख्यानं—अद्य मे इति सर्वत्र संबंधः ॥ ६ ॥

अर्थ–॥ ६ ॥ आतां माझ्या जन्माचें सार्थक झालें, माझ्या मनाचा सर्व संशय फिटला, माझी संसाररूप पाशांतून सुटका झाली. आणि माझ्या तपश्चर्यांचें सार्थक्य झालें.

इदानीमेव मे जातं मुनिराजोत्तमोत्तमम् ॥
इतःपरं मया नास्ति सदृशो भुवनत्रये ॥ ७ ॥

व्याख्यानं—मुनीश्वराणां ऋषिश्रेष्ठानां उत्तमोत्तमत्वमित्यर्थः धर्मधर्मिणोरभे-दात् शिष्टं स्पष्टं ॥ ७ ॥

C. N. Kalburgi

अर्थ–॥ ७ ॥ आतां पृथ्वीवर जितके मोठमोठे ऋषीश्वर आहेत त्यांच्यापेक्षां मी श्रेष्ठ झालों; माझ्यासारखा कृतार्थ झालेला मुनीश्वर ह्या त्रैलोक्यांत दुसरा नाहीं.

शास्त्रं तव मुखोद्गीर्णं शिवाद्वैतपरंपरम् ॥
मां विना कस्य लोकेषु श्रोतुमस्ति तपः शुभम् ॥ ८ ॥
तपसां परिपाकेन शंकरस्य प्रसादतः ॥
आगतस्त्वं महाभाग मां कृतार्थयितुं गिरा ॥ ९ ॥

व्याख्यानं—उद्गीर्णं बहिर्निर्गतमित्यर्थः । शास्त्रं वीरशैवशास्त्रं महाभाग श्रेष्ठेत्यर्थः शिष्टं स्पष्टं ॥ ८ ॥ ९ ॥

अर्थ–॥ ८ ॥ हें तूं आपल्या तोंडानें स्वतः सांगितलेलें शिवाचें अद्वैतशास्त्र ऐकण्याइतकें चांगलें तपःश्चर्येचें सामर्थ्य माझ्याखेरीज इतर कोणत्याही ऋषीचें नाहीं. मला माझ्या पूर्वपुण्यामुळें तुझ्याकडून शिवाद्वैतशास्त्र ऐकण्यास मिळालें. ॥ ९ ॥ माझ्या तपश्चर्येची सफळ होण्याची वेळ आल्यामुळें व शंकराच्या कृपेमुळेंच तूं येथें आलास, तूं मोठा भाग्यशाली आहेस, तूं मला शिवज्ञानाचा उपदेश करून कृतार्थ केलेंस.

अवतरणिका–अथ संग्रहकृच्छिवाचार्यः कुंभसंभवं श्रीरेणुकः स्तुतिं कृतवानित्याह—

श्लोकः–इति स्तुवंतं विनयादगस्त्यं मुनिपुंगवम् ॥
आलोक्य करुणादृष्ट्या बभाषे स गणेश्वरः ॥ १० ॥

व्याख्यानं—विनयात् भक्त्येत्यर्थः शिष्टं स्पष्टं ॥ १० ॥

अर्थ–॥ १० ॥ ह्याप्रमाणें नम्रतेनें स्तुति करणाऱ्या त्या अगस्त्यऋषीश्वराकडे कृपादृष्टीनें पाहून तो प्रमथगणांचा श्रेष्ठ रेवणसिद्ध ह्मणूं लागला.

अगस्त्य मुनिशार्दूल तपःसिद्धमनोरथ ॥
त्वां विना शिवशास्त्रस्य कः श्रोतुमधिकारवान् ॥ ११ ॥

व्याख्यानं—"एकोत्तरशतं प्रोक्ता दीक्षाभेदा मया पुरा ॥ दीक्षितस्तासु गुरुणा भक्तोऽस्मिन्नधिकारवान्" ॥ इति योगजागमवचनात् अस्मिन् शास्त्रे त्वां विना अधिकारी नास्तीत्यर्थः ॥ ११ ॥

अर्थ–॥ ११ ॥ अगस्त्यऋषे, तूं सर्व ऋषीश्वरांत श्रेष्ठ आहेस, तपःसामर्थ्यानें तुझे सर्व मनोरथ परिपूर्ण झालेलेच आहेत. तुझ्याखेरीज शिवशास्त्र ऐकण्याचा अधिकारी ह्या पृथ्वीवर दुसरा कोण आहे? शिवशास्त्र ऐकण्याची योग्यता तुझीच आहे इतरांची नाहीं.

पात्रं शिवप्रसादस्य भवानेको न चापरः ॥
इति निश्चित्य कथितं मया ते तंत्रमीदृशम् ॥ १२ ॥

व्याख्यानं—ईदृशं वीरशैवतंत्रमित्यर्थः ॥ १२ ॥

अर्थ–॥ १२ ॥ शिवाचा प्रसाद होण्यास तूंच एक योग्य आहेस, दुसरा कोणी नाहीं. अशी माझी पक्की खातरी असल्यामुळेंच मीं तुला हें शिवरहस्य सांगितलें.

स्थाप्यतां सर्वलोकेषु तंत्रमेतत्त्वया मुने ॥
ईदृशं शिवबोधस्य साधनं नास्ति कुत्रचित् ॥ १३ ॥

व्याख्यानं—स्पष्टं ॥ १३ ॥

अर्थ–॥ १३ ॥ अगस्त्यऋषे, तूं आतां हें शिवतंत्र सर्व जगांत प्रसिद्ध होईल असें कर. शिवज्ञान होण्याला जगामध्यें अशा रीतीचें साधन दुसरें कोणतें ही नाहीं.

रहस्यमेतत्सर्वज्ञः सर्वानुग्राहकः शिवः ॥
अवादीत्सर्वलोकानां सिद्धये पार्वतीपतिः ॥ १४ ॥

व्याख्यानं—सिद्धये भोगमोक्षसिद्धये इत्यर्थः एतद्रहस्यं वीरशैवरहस्यमित्यर्थः शिष्टं स्पष्टं ॥ १४ ॥

अर्थ–॥ १४ ॥ हें शास्त्र फार महत्वाचें असून गुप्त ठेवण्यासारखें आहे; तरी शंकर हा सर्वज्ञ आणि सर्व जगावर कृपा करणारा असल्यामुळें सर्व जगाचें हित होण्यासाठीं त्यानें हें पार्वतीस सांगितलें.

तदिदं शिवसिद्धांतसाराणामुत्तमोत्तमम् ॥
वेदवेदांतसर्वस्वं विद्याचारप्रवर्तकम् ॥ १५ ॥
वीरमाहेश्वरग्राह्यं शिवाद्वैतप्रकाशकम् ॥
परीक्षितेभ्यो दातव्यं शिष्येभ्यो नान्यथा क्वचित् ॥ १६ ॥

व्याख्यानं—तदिदं वीरशैवषट्स्थलशिवयोगमार्गप्रतिपादकं तदिदं शास्त्रं कामिकादिवातुलांताष्टाविंशतिदिव्यागमसाराणामुत्तमोत्तमं चतुर्वेदद्वात्रिंशदुपनिषत्सर्वस्वं ज्ञानक्रियाप्रकाशकं वीरमाहेश्वरैरंगीकरणीयं परशिवाद्वैतप्रतिपादकमिदं शास्त्रं "तावताः संहिता अंतेवासिने ब्रूयान्नासंवत्सरवासिने न प्रवक्तयिताचार्य" इत्यैतरेयश्रुतेः "भक्तस्यैवात्मशिष्यस्य विरक्तस्य महामतेः । गुरुणा ज्ञानिना देयमानंदरसनिर्भरं" इति योगजागमवचनाच्च परीक्षितेभ्यः शिष्येभ्यो देयं अनधिकारिणे न ब्रूयादिति भावः ॥ १५ ॥ १६ ॥

अर्थ-॥ १५ ॥ हें शास्त्र सर्व शिवसिद्धान्तशास्त्रांच्या ग्रंथांत फारच उत्तम असें मानलें आहे, वेद आणि उपनिषदें ह्यांचें तात्पर्य आहे, विद्येची आणि सदाचाराची वृद्धि करणारें आहे. ॥ १६ ॥ हें शास्त्र वीरमाहेश्वर लोकांनीं अवश्य स्वीकारण्यासारखें आहे, व शिवाच्या अद्वैतशास्त्राची प्रसिद्धि करणारें आहे हें शास्त्र कोणास शिकविणें झाल्यास त्या शिष्यांची अगोदर सदाचरणाबद्दल परीक्षा करून मग शिकवावें; नाहींपेक्षां कधींही शिकवूं नये.

श्लोकः—एतच्छ्रवणमात्रेण सर्वेषां पापसंक्षयः ॥
अवतीर्णं मया भूमौ शास्त्रस्यास्य प्रवृत्तये
प्रवर्तय शिवाद्वैतं त्वमपि ज्ञानमीदृशं ॥ १७ ॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण विरचिते वीरशैवधर्मनिर्णये सिद्धान्तशिखामणौ शिवैक्यस्थलविषयनवविधलिंगप्रसंगो नाम विंशतीयः परिच्छेदः समाप्तः ॥

व्याख्यानं—स्पष्टं ॥ १७ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां शिवैक्यस्थलविषयनवविधलिंगप्रसंगो नाम विंशतीयः परिच्छेदः समाप्तः ॥

अर्थ-॥ १७ ॥ हें शास्त्र ऐकिलें असतां सर्व श्रोत्यांच्या पापाचा नाश होतो. ह्या शास्त्राची लोकांत प्रसिद्धि व्हावी ह्यासाठींच मीं हें पृथ्वीलोकावर आणिलें आहे. तूंही अशा रीतीच्या ह्या शिवाद्वैतज्ञानाचा प्रसार कर.

ह्याप्रमाणें वीरशैवधर्माचा निर्णय असलेल्या सिद्धान्तशिखामणी ग्रंथांतील शिवैक्यस्थलासंबंधाच्या नऊ प्रकारच्या लिंगांचें वर्णन असलेला हा विसावा परिच्छेद संपला.

॥ श्रीनंदिकेश्वराय नमः ॥

अथ एकविंशतीयपरिच्छेदः प्रारभ्यते।

॥ विभीषणाभीष्टदानम् ॥

अवतरणिका–अथ रेवणसिद्धेश्वरेण कुंभसंभवाय पिंडादिवृत्तिज्ञानशून्यांतोपदिष्टं वीरशैवसंग्रहं शिवयोगिसंज्ञकाचार्यः स्वशिष्यप्रशिष्येषु प्रख्यातं कृत्वा अनंतरं रेणुकविभीषणसंवादं रेवणसिद्धेश्वरैक्यं च पंचपंचाशत्सूत्रैः संगृह्याह—

श्लोकः–इत्युक्त्वा पश्यतस्तस्य पुरस्तादेव रेणुकः ॥
अंतर्दधे महादेवं चिंतयन्नंतरात्मना ॥ १ ॥

व्याख्यानं—स्पष्टं ॥ १ ॥

॥ श्रीनंदिकेश्वरास नमस्कार असो. ॥

अर्थ–॥ १ ॥ रेवणसिद्ध मागील परिच्छेदांत सांगितल्याप्रमाणें अगस्त्यऋषीबरोबर संभाषण करून अगस्त्यऋषी त्याकडे पाहत आहेत तों त्यांच्यासमक्ष मनामध्यें शंकराचें स्मरण करीत करीत गुप्त झाला.

य इदं शिवसिद्धांतं वीरशैवमतं परम् ॥
श्रृणोति शुद्धमनसा स याति परमां गतिम् ॥ २ ॥

व्याख्यानं—यः पुरुषः वीरशैवमतं अंगलिंगषट्स्थलरूपं सत् वीरशैवधर्मनिर्णयसंमतम् परं सर्वोत्कृष्टं इदं शिवसिद्धांतं श्रुतिसंमतमेतच्छिवसिद्धांतं शुद्धमनसा निर्मलचित्तेन श्रृणोति सः परमां गतिं परमुक्तिं यातीत्यर्थः ॥ २ ॥

अर्थ–॥ २ ॥ जो कोणी हें श्रेष्ठ आणि वीरशैव लोकांस संमत असणारें शिवरहस्य एकाग्रमनानें ऐकेल तो उत्तम गतीस जाईल.

अवतरणिका–अथांतर्हितो रेणुको लंकां प्रविष्टवानित्याह–

श्लोकः–स्वच्छंदाचाररसिकः स्वेच्छानिर्मितविग्रहः ॥
आससाद पुरीं लंकां रेणुको गणनायकः ॥ ३ ॥

व्याख्यानं—निर्मलस्वेच्छाचाररसिक इत्यर्थः शिष्टं स्पष्टं ॥ ३ ॥

अर्थ–॥ ३ ॥ असो. स्वतंत्रपणानें सदाचार पाळण्याची आवड असणारा, आपल्या इच्छेप्रमाणें शरीर धारण करणारा, तो प्रमथश्रेष्ठ रेणुकाचार्य तेथून निघून लंकानगरीस गेला.

तमागतं महाभागं सर्वागमविशारदम् ॥
विभीषणः समालोक्य गेहं प्रावेशयन्निजम् ॥ ४ ॥

व्याख्यानं—महाभागः श्रेष्ठः सर्वागमविशारदः कामिकादिवातुलांतदिव्यागमकुशल इत्यर्थः ॥ शिष्टं स्पष्टं ॥ ४ ॥

अर्थ–॥ ४ ॥ रेणुकाचार्य मोठा भाग्यवान् होता, आणि सर्व कामिकादि वातुलांत शिवागम चांगल्यारीतीनें जाणत होता, तो दैवयोगानें आपल्या घरीं आलेला पाहून बिभीषणानें आदरसत्कार करून त्यास आपल्या वाड्यांत नेलें.

भद्रासने निजे रम्ये निवेश्य गणनायकं ॥
अर्घ्यपाद्यादिभिः सर्वैरुपचारैरपूजयत् ॥ ५ ॥

व्याख्यानं—निजे भद्रासने स्वकीयसिंहासन इत्यर्थः शिष्टं स्पष्टं ॥ ५ ॥

अर्थ–॥ ५ ॥ आणि त्यास सुशोभित रत्नांच्या सिंहासनावर बसविलें व अर्घ्य पाद्य वगैरे सर्व उपचारांनीं त्याची यथाविधि पूजा केली.

पूजितेन प्रसन्नेन रेणुकेन निरूपितः ॥
निषसाद तदभ्याशे स निजासनमाश्रितः ॥ ६ ॥

व्याख्यानं—स विभीषणः पूजाप्रसन्नेन श्रीरेणुकेनाज्ञापितः सन् तत्समीपे स्वकीयासनांतरमाश्रितवान् सन् निषसाद उपविष्टवानित्यर्थः ॥ ६ ॥

अर्थ–॥ ६ ॥ बिभीषणानें आदरसत्कार करून रेणुकाचार्याची पूजा केल्यावर रेणुकाचार्यानें संतुष्ट होऊन त्यास खालीं बैस ह्मणून सांगितल्यावर बिभीषण त्याचेच जवळ आपल्या आसनावर बसला.

अवतरणिका–अथ विभीषणः—

श्लोकः–आबभाषे गणेंद्रं तं कृतांजलि विभीषणः ॥
मानुषाकारसंपन्नं साक्षाच्छिवमिवापरम् ॥ ७ ॥

व्याख्यानं—विभीषणः मानुषाकृतिं साक्षादपरं शिवमिव स्थितमिति शेषः तं गणेंद्रं रेणुकं कृतांजलि कृतमंजलिपुटं यस्मिन् कर्मणि यथा भवति तथा आबभाषे विज्ञापनवचनं प्रयुक्तवानित्यर्थः ॥ ७ ॥

अर्थ–॥ ७ ॥ व हात जोडून बिभीषण त्या रेणुकाचार्यास ह्मणाला, महाराज, आपण मनुष्याच्या आकृतीचे आहां खरे तरी आपण प्रत्यक्ष दुसरे शंकर असल्यासारखे दिसतां.

रेणुक त्वां गणाधीश शिवज्ञानपरायण ॥
अवतीर्णं महीमेनामिति सम्यक् श्रुतं मया ॥ ८ ॥

व्याख्यानं—भो शिवज्ञानपरायण गणाधीश श्रीरेणुक त्वामेनां महीं भूलोकं प्रत्यवतीर्णं संतं मया सम्यक् इति लोकवार्तया श्रुतमित्यर्थः ॥ ८ ॥

अर्थ–॥ ८ ॥ रेणुकाचार्या, तूं प्रमथगणांत श्रेष्ठ आहेस, शिवज्ञानांत प्रवीण आहेस, तूं ह्या पृथ्वीवर जन्म घेऊन आलास हें मला पूर्वींच समजलें आहे.

मद्भाग्यगौरवादद्य समायास्त्वं पुरीमिमाम् ॥

कथं भाग्यविहीनानां सुलभाः स्युर्भवादृशाः ॥ ९ ॥

व्याख्यानं—स्पष्टं ॥ ९ ॥

अर्थ–॥ ९ ॥ माझा दैवयोग चांगला ह्मणून तूं मला भेटण्यास येथें आलास. जे लोक भाग्यहीन आहेत त्यांस तुमच्या सारख्यांचें दर्शन सहजरीतीनें कसें होईल ? कधींही होणार नाहीं.

मत्समो नास्ति लोकेषु भाग्यातिशयवत्तया ॥

यस्य गेहं स्वयं प्राप्तो भवान् साक्षान्महेश्वरः ॥ १० ॥

व्याख्यानं—भो रेणुक भूलोकगतप्रत्यक्षमहेश्वरो भवान् स्वयमेव यस्य मे राजालयं प्राप्तोसि सतः भाग्यातिशयवत्वेन लोकेषु मत्समः कोऽपि नास्तीत्यर्थः॥१०

अर्थ–॥ १० ॥ सर्व त्रैलोक्यांत माझ्यासारखा भाग्यवान् कोणी नाहीं कां-तर तूं प्रत्यक्ष शंकरासारखा असून माझ्या घरीं माझ्यावर कृपा करण्यासाठीं आपण होऊन आलास.

अवतरणिका–अथ न तावन्मात्रमित्यत्राह—

श्लोकः–कृतार्था मे पुरी ह्येषा कृतार्थो राक्षसान्वयः ॥

जीवितं च कृतार्थं मे यस्य त्वं दृष्टिगोचरः ॥ ११ ॥

व्याख्यानं—भो रेणुक त्वं यस्य मे दृष्टिगोचरः तस्मात् मे ममैषा लंकापुरी कृतार्थेत्यादि ॥ ११ ॥

अर्थ–॥ ११ ॥ ही माझी लंकानगरी धन्य झाली, हा माझा राक्षसांचा वंश कृतार्थ झाला, माझ्या जन्माचें सार्थक्य झालें कां तर तूं माझ्या दृष्टीस पडलास.

इति ब्रुवाणं कल्याणं राक्षसेंद्रं गणेश्वरः ॥

बभाषे सस्मितो वाणीं विश्वोल्लासकरीं शुभाम् ॥ १२ ॥

व्याख्यानं—सस्मितः मंदस्मितेन युक्तः सन्नित्यर्थः ॥ विश्वोल्लासकरीं सर्वेषामानंदकरीमित्यर्थः शिष्टं स्पष्टं ॥ १२ ॥

अर्थ–॥ १२ ॥ ह्याप्रमाणें गोड गोड बोलणाऱ्या बिभीषणाकडे पाहून रेणुकाचार्य हांसून सर्वजगास संतोष होईल अशा तऱ्हेच्या मधुर वाणीनें बोलूं लागला.

अवतरणिका-अथ तत्प्रकारं चतुर्भिः श्लोकैर्वर्णयति—

श्लोकः-विभीषण महाभाग जाने त्वां धर्मकोविदम् ॥
त्वां विना कस्य लोकेषु जायते भक्तिरीदृशी ॥ १३ ॥

व्याख्यानं—स्पष्टं ॥ १३ ॥

अर्थ-॥ १३ ॥ बिभीषणा तूं मोठा दैववान् आहेस, तूं मोठा धार्मिक (धर्माची माहिती असणारा) आहेस, तुझ्या खेरीज इतरांचे अंगीं अशी भक्ति कोठून असणार? कधींही असावयाची नाहीं.

समस्तशास्त्रसारज्ञं सर्वधर्मपरायणम् ॥
अध्यात्मविद्यानिरतमाहुस्त्वां राक्षसेश्वर ॥ १४ ॥

व्याख्यानं—भो विभीषण त्वां समस्तनिगमादिशास्त्रसारज्ञं सकलशिवधर्मेषु परायणं तत्परमित्यर्थः शिवाद्वैतज्ञानयोगरूपाध्यात्मविद्यानिरतं संतं आहुरित्यर्थः अतः कारणात् ॥ १४ ॥

अर्थ-॥ १४ ॥ तूं सर्व राक्षसांचा राजा आहेस, तुला सर्व शास्त्रांचें तत्व माहीत आहे, तूं सर्व धर्मांत प्रवीण आहेस, आणि अध्यात्मविद्येंत प्रवीण आहेस.

त्वदीयधर्मसंपत्तिं श्रुत्वाहं विस्मिताशयः ॥
व्रजन् कैलासमचलं त्वदंतिकमुपागतः ॥ १५ ॥

व्याख्यानं—कैलासमचलं व्रजन्नहं त्वदीयशिवधर्मसंपत्तिं श्रुत्वाऽऽश्चर्ययुक्तचित्तः सन् त्वत्समीपमागतोस्मीत्यर्थः ॥ १५ ॥

अर्थ-॥ १५ ॥ तुझी धर्मावरील श्रद्धा ऐकून माझ्या मनास मोठें आश्चर्य वाटलें, व त्यामुळें मी आतां कैलासपर्वताकडे जाण्यास निघालों असतां, तुझी भेट घ्यावी ह्मणून इकडे तुझ्या नगरीस आलों.

प्रीतोऽस्मि तव चारित्रैः शोभनैर्लोकविश्रुतैः ॥
दास्यामि ते वरं साक्षात्प्रार्थयस्व यथेप्सितम् ॥ १६ ॥

व्याख्यानं—स्पष्टं ॥ १६ ॥

अर्थ-॥ १६ ॥ तुझ्या लोकांत प्रसिद्ध असणाऱ्या व कल्याणकारक चरित्रांमुळें मी फार संतुष्ट झालों, तुला मी इच्छिलेला वर देतों तुला जें पाहिजे असेल तें मला सांग.

इति प्रसादसुमुखे भाषमाणे गणेश्वरे ॥
प्रणम्य परया प्रीत्या व्याजहार विभीषणः ॥ १७ ॥

C. N. Kalburgi

व्याख्यानं—व्याजहार विज्ञापनवाक्यं प्रयुक्तवानित्यर्थः ॥ १७ ॥

अर्थ-॥ १७ ॥ ह्याप्रमाणें कृपाळूपणानें रेणुकाचार्य प्रमथेश्वर बोलूं लागला असतांना, त्यास नमस्कार करून मोठ्या आवडीनें विभीषण त्यास बोलूं लागला.

अवतरणिका—अथ तत्प्रकारं षड्भिः सूत्रैः प्रदर्श्य स्वस्य रावणोक्ताभिप्रायमष्टभिः सूत्रैः सूचयति—

श्लोकः—आगमानुग्रहादेव भवतः शिवयोगिनः ॥
दुर्लभाः सर्वलोकानां समपद्यंत संपदः ॥ १८ ॥

व्याख्यानं—भो गणेश्वर शिवयोगिनो भवतः आगमनरूपानुग्रहादेव सर्वजनदुर्लभाः संपदः समपद्यंत प्राप्ता इत्यर्थः ॥ १८ ॥

अर्थ-॥ १८ ॥ प्राणिमात्रांस संपत्ति मिळणें फार कठीण आहे खरें; तरीपण आगमांच्या कृपेमुळें व तुझ्या सारख्या शिवयोग्याच्या कृपेमुळें त्या सहज मिळतात.

तथापि प्रार्थनीयं मे किंचिदस्ति गणेश्वर ॥
सुकृते परिपक्के हि स्वयं सिद्ध्यति वांच्छितम् ॥ १९ ॥

व्याख्यानं—मे मयेत्यर्थः शिष्टं स्पष्टं ॥ १९ ॥

अर्थ-॥ १९ ॥ तरी पण रेणुकाचार्य गणेश्वरा, मला तुजजवळ कांहीं मागावयाचें आहे, पुण्य परिपक्वदशेस येऊन फलद्रूप झालें ह्मणजे मनोरथ आपाप परिपूर्ण होतो.

रावणो हि मम भ्राता माहेश्वरशिखामणिः ॥
अदृष्टशत्रुसंबाधं शशास हि जगत्रयम् ॥ २० ॥

व्याख्यानं—अदृष्टशत्रुसंबाधं यथा भवति तथा जगत्रयं हि प्रसिद्धं सत् शशास पालयामासेत्यर्थः ॥ २० ॥

अर्थ-॥ २० ॥ माझा वडील भाऊ रावण शिवभक्तांत (माहेश्वरांत) श्रेष्ठ होता. त्यानें त्रैलोक्याचें राज्य केलें, परंतु त्यास विघ्न आल्याचें व शत्रु आल्याचें मीं कधीं पाहिलें नाहीं व ऐकिलेंही पण नाहीं.

यस्य प्रतापमतुलं सोढुमक्षमशक्तयः ॥
इंद्रादयः सुराः सर्वे राज्यलक्ष्म्या वियोजिताः ॥ २१ ॥

व्याख्यानं—स्पष्टं ॥ २१ ॥

अर्थ-॥ २१ ॥ त्याचा पराक्रम इतका जबर होता कीं, तो सहन न झाल्या-

मुळें इंद्रादिक सर्व देव आपापलीं राज्यें सोडून पळून गेले व कितीएक देव तर रावणाच्याच घरीं सेवा करीत राहिले.

स तु कालवशेनैव स्वचारित्रविपर्ययात् ॥

रणे विष्णववतारेण रामेण निहतोऽभवत् ॥ २२ ॥

व्याख्यानं—स्पष्टं ॥ २२ ॥

अर्थ–॥ २२ ॥ तो रावण कालाच्या तडाक्यांत सांपडल्यामुळें व आपल्या दुर्वर्तनामुळें विष्णूच्या अंशानें उत्पन्न झालेल्या रामाच्या हातून मरण पावला.

स तु रामशराविद्धः कंठस्खलितजीवितः ॥

अवशिष्टं समालोक्य मामवादीत्सुदुःखितः ॥ २३ ॥

व्याख्यानं—स रावणः रामबाणेन क्षतं लब्धवान् सन् कंठगतप्राणः सन् अवशिष्टं राक्षसेषु हतशिष्टं मां दृष्ट्वात्यंतदुःखितः सन् प्रत्यवददित्यर्थः ॥ २३ ॥

अर्थ–॥ २३ ॥ तो रामाच्या बाणानें व्याकुळ होऊन युद्ध भूमीवर पडला असतां, व त्याचा प्राण कंठापर्यंत येऊन अडकला असतां, फक्त मीच काय तो एक जीवंत राहिलेला पाहून मजला तो कष्टी होऊन दीनस्वरानें ह्मणूं लागला.

अवतरणिका–अथ रावणोक्तप्रकारमुपपादयति—

श्लोकः–विभीषण विशेषज्ञ महाबुद्धे सुधार्मिक ॥

अवशिष्टोऽसि वंशस्य रक्षसां भाग्यगौरवात् ॥ २४ ॥

व्याख्यानं—स्पष्टं ॥ २४ ॥

अर्थ–॥ २४ ॥ बिभीषणा, तूं विलक्षण बुद्धिमान् आहेस, मोठा ज्ञाता आहेस व धार्मिक आहेस राक्षसकुलांचें दैव चांगलें ह्मणून तूं तरी एकटा जीवंत राहिलास हें फार चांगलें झालें.

वयमज्ञानसंपन्ना महत्सु द्रोहकारिणः

ईदृशीं तु गतिं प्राप्ता दुस्तरा हि विधिस्थितिः ॥ २५ ॥

व्याख्यानं—वयमज्ञानसंपन्नाः संतः महत्सु महतां विषये द्रोहकारिण इति ईदृशीं गतिं प्राप्ताः तथाहि विधिस्थितिः दैवाधीनवृत्तिः दुस्तरा हि लंघितुमशक्या खल्वित्यर्थः ॥ २५ ॥

अर्थ–॥ २५ ॥ अरे बिभीषणा, आह्मी अज्ञानानें व्यापलेले आहों. आह्मीं महासामर्थ्यवानांशीं द्वेष केला ह्मणूनच अशा स्थितीस येऊन पोहोंचलों; दैवाची गति फार विचित्र आहे.

नवकं लिंगकोटीनां प्रतिष्ठाप्यमिहस्थले ॥
इति संकल्पितं पूर्वं मया तदवशिष्यते ॥ २६ ॥

व्याख्यानं—इह स्थले अस्मिन् लंकापत्तनस्थले नवकोटिलिंगं प्रतिष्ठाप्यमिति मया पूर्वं संकल्पितं तत्र किंचिदवशिष्टमस्तीत्यर्थः ॥ २६ ॥

अर्थ-॥ २६ ॥ मीं ह्या ठिकाणीं नऊकोटि लिंगांची स्थापना करावी असा बेत केला होता; परंतु माझी अशी स्थिति झाल्यामुळें, तें कृत्य माझ्या हातून शेवटास गेलें नाहीं.

अवतरणिका-कियदवशिष्टमित्यत्राह—

श्लोकः-कोटिषट्कं तु लिंगानां मया साधु प्रतिष्ठितम् ॥
कोटित्रयं तु लिंगानां स्थापनीयमतस्त्वया ॥ २७ ॥

व्याख्यानं—अतः तत्संकल्पपूरणार्थमित्यर्थः ॥ २७ ॥

अर्थ-॥ २७ ॥ तरी सहा कोटि लिंगांची स्थापना मीं पूर्वींच चांगल्यारीतीनें केली आहे; तीन कोटिलिंगांची स्थापना करावयाची मात्र राहिलेली आहे, तेवढी तूं करावीस.

इति तस्य वचः श्रुत्वा दीनबुद्धेर्मरिष्यतः ॥
तथा साधुकरोमीति प्रतिज्ञातं मया तथा ॥ २८ ॥

व्याख्यानं—स्पष्टं ॥ २८ ॥

अर्थ-॥ २८ ॥ ह्याप्रमाणें मरणोन्मुख झालेल्या व दीनवदन करून माझी विनंति करणाऱ्या माझ्या वडीलभावाचें (रावणाचें) बोलणें मीं, बरें आहे, मी खरोखर तुझ्या सांगण्याप्रमाणें तीन कोटि लिंगांची स्थापना करीन, ह्मणून कबूल केलें आहे.

युगपच्छिवलिंगानां कोटित्रयमनुत्तमम् ॥
प्रतिष्ठाप्यं यथाशास्त्रमिति मे निश्चयोऽभवत् ॥ २९ ॥

व्याख्यानं—स्पष्टं ॥ २९ ॥

अर्थ-॥ २९ ॥ एकदम तीन कोटि उत्तम उत्तम शिवलिंगांची स्थापना यथाशास्त्र करावी असा त्या वेळेपासून माझा निश्चय झाला आहे.

लिंगकोटित्रयस्येह युगपत्स्थापनाविधौ ॥
अविदन्नेकमाचार्यमहमेवमवस्थित: ॥ ३० ॥

व्याख्यानं—इह लंकायामित्यर्थः युगपल्लिंगत्रिकोटिस्थापनविषये मुख्यमाचार्यमलब्धवान् सन्नेवं स्थितोऽस्मीत्यर्थः ॥ ३० ॥

अर्थ–॥ ३० ॥ तीनकोटि लिंगांची एकदम स्थापना करूं शकेल असा ज्ञानी आचार्य मला मिळाला नाहीं, ह्मणून मी आजपर्यंत असाच निराश होऊन बसलों.

शिवशास्त्रविशेषज्ञ शिवज्ञाननिधिर्भवान् ॥
आचार्यभावमासाद्य मम पूरय वांच्छितम् ॥ ३१ ॥

व्याख्यानं—शिवशास्त्रविशेषज्ञ भो रेवणसिद्ध भवान् शिवज्ञानस्य निधिःनिक्षेपस्थानभूतः अत आचार्यभावमासाद्य युगपत्कोटित्रयाचार्यभावं प्राप्य ममाभीष्टं पूरयेत्यर्थः ॥ ३१ ॥

अर्थ–॥ ३१ ॥ तूं शिवशास्त्र चांगल्यारीतीनें जाणतोस, तूं प्रत्यक्ष शिवज्ञानाचा महासागर आहेस; तूं माझा आचार्य होऊन मजकडून लिंगप्रतिष्ठा करवून माझे मनोरथ पूर्ण कर.

अवतरणिका–अथ श्रीरेणुकः तस्याभीष्टं पूरयित्वा अंतर्हित इति श्लोकपंचकेन प्रतिपादयति—

श्लोकः–तस्येति वचनं श्रुत्वा राक्षसेंद्रस्य धीमतः ॥
तथेति प्रतिशुश्राव सर्वज्ञो गणनायकः ॥ ३२ ॥

व्याख्यानं—प्रतिशुश्राव अंगीकृतवानित्यर्थः शिष्टं स्पष्टं ॥ ३२ ॥

अर्थ–॥ ३२ ॥ असें त्या बुद्धिमान् राक्षसेश्वराचें (बिभीषणाचें) बोलणें ऐकून "बरें आहे" असें ह्मणून त्या सर्वजाणत्या रेणुकाचार्य गणेश्वरानें मान्य केलें.

तत्र संतुष्टचित्तस्य पौलस्त्यस्येष्टसिद्धये ॥
कोटित्रयं तु लिंगानां यथाशास्त्रं यथाविधि ॥
त्रिकोट्याचार्यरूपेण स्थापितं तेन तत्क्षणे ॥ ३३ ॥

व्याख्यानं—तत्र लंकायां पौलस्त्यस्य बिभीषणस्येत्यर्थः शिष्टं स्पष्टं ॥ ३३ ॥

अर्थ–॥ ३३ ॥ मग लागलेंच त्या ठिकाणीं संतुष्ट झालेल्या बिभीषणाचें कल्याण होण्यासाठीं तीन कोटि शिवलिंगांची स्थापना रेणुकाचार्यानें शास्त्राप्रमाणें व विधीप्रमाणें आपण स्वतःच तीन कोटि आचार्यांचीं (गुरूची) रूपें घेऊन तत्काळ केली.

तादृशं तस्य माहात्म्यं समालोक्य विभीषणः
प्रणनाम मुहुर्भक्त्या पादयोस्तस्य विस्मितः ॥ ३४ ॥

व्याख्यानं—स्पष्टं ॥ ३४ ॥

अर्थ–॥ ३४ ॥ अशाप्रकारचें त्याचें अलौकिक सामर्थ्य पाहून बिभीषणास मोठें आश्चर्य वाटलें, व त्यानें भक्तिपूर्वक त्याचे पायांवर वारंवार नमस्कार घातले.

प्रणतं विनयोपेतं प्रहृष्टं राक्षसेश्वरम् ॥
अनुगृह्य स्वमाहात्म्याद्रेणुकोऽतर्हितोऽभवत् ॥ ३५ ॥

व्याख्यानं—स्पष्टं ॥ ३५ ॥

अर्थ–॥ ३५ ॥ अशा तऱ्हेनें नम्रतेनें वारंवार नमस्कार करणाऱ्या व संतुष्ट झालेल्या बिभीषणास आपल्या अलौकिक सामर्थ्यानें कृतार्थ करून तो रेणुकाचार्य गुप्त झाला.

श्लोकः–**बिभीषणोऽपि हृष्टात्मा रेणुकस्य प्रसादतः ॥**
शिवभक्तिरसासक्तः स्थिरराज्यमपालयत् ॥ ३६ ॥

व्याख्यानं—स्पष्टं ॥ ३६ ॥

अर्थ–॥ ३६ ॥ बिभीषणास देखील मोठा संतोष वाटला; रेणुकाचार्यांच्या प्रसादामुळें त्याचें मन शिवभक्तीवर पहिल्यापेक्षां ज्यास्त दृढ झालें, व त्यानें अनेकवर्षपर्यंत सुखानें राज्यकारभार चालविला.

अवतरणिका–अथाष्टदिक्षु प्रसिद्धस्य रेवणसिद्धेश्वरस्य महत्वं संकोचेनाष्टभिः सूत्रैः प्रकाशयति—

श्लोकः–**रेणुकोऽपि महातेजाः संचरन् क्षितिमंडले ॥**
प्रच्छन्नश्च प्रकाशश्च परमाद्वैतभावितः ॥ ३७ ॥
कांश्चिद् दृष्टिनिपातेन करुणारसवर्षिणा ॥
अपरानुपदेशेन शिवाद्वैताभिमर्शिना ॥ ३८ ॥
अन्यांश्च सहवासेन समस्तमलहारिणा ॥
कृतार्थयन् जनान् सर्वान् कृतिनः पक्वकर्मिणः ॥ ३९ ॥
दर्शयित्वा निजाधिक्यं शिवदर्शनलालसः ॥
खंडयित्वा दुराचारान् पाषंडान् भिन्नदर्शनान् ॥ ४० ॥

यंत्रमंत्रकलासिद्धान् विमतान् सिद्धमंडलान् ॥
विजित्य स्वप्रभावेन स्थापयित्वा शिवागमान् ॥
आजगाम निजावासं कोल्लिपाक्यभिधं पुरम् ॥ ४१ ॥

व्याख्यानं—प्रच्छन्नश्च सप्तशतवर्षपर्यंतमिति शेषः तथा प्रकटितः सन् कांश्चिज्जनान् करुणारसपूरितकटाक्षेण कृतार्थयन् अपरान् शिवाद्वैतप्रकाशकोपदेशेन कृतार्थयन् अन्यान् निर्मलसहवासेन कृतार्थयन् अवशिष्टसर्वजनान् कृतिनः सकलकलाकुशलान् पक्वकर्मिणः परिपक्वमलमायापाशवंतः संतश्च कृतार्थयन् सन् शिवदर्शनलालसः शिवसमयलंपटः श्रीरेवणसिद्धः निजाधिक्यं अनेकचित्रविचित्रनिजमहत्वं दर्शयित्वा भिन्नदर्शनान् वैष्णवाद्यन्यसमयनिष्ठान् पाषंडान् शंखचक्राद्यन्यलांछनयुक्तान् दुराचारान् खंडयित्वा यंत्रमंत्रादिचतुःषष्टिकलासिद्धियुक्तान् कापालिकादिपरमतसिद्धमंडलान् गोरक्षादिनवकोटिसिद्धसमूहान् स्वसामर्थ्येन विजित्य कामिकादिशिवसिद्धांतान् स्थापयित्वा निजावासं कोल्लिपाक्यभिधं पुरमाजगाम आससादेत्यर्थः ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

अर्थ—॥ ३७ ॥ असो. इकडे तो महासामर्थ्यवान् आणि शिवाद्वैतमतावर विश्वास ठेवणारा रेणुकाचार्य कोठें कोठें गुप्त रीतीनें आणि कोठें कोठें उघड रीतीनें पृथ्वीवर संचार करूं लागला. ॥ ३८ ॥ त्या रेणुकाचार्यानें दयारूपरसाची वृष्टि करणाऱ्या आपल्या नेत्रकटाक्षानें (कृपादृष्टीनें) कितीएकांस कृतार्थ केलें. कितीएकांस शिवाद्वैतास अनुसरून असणारा उपदेश करून कृतार्थ केलें ॥ ३९ ॥ सर्वप्रकारचे दोष दूर करणाऱ्या आपल्या सहवासानें कितीएकांस कृतार्थ केलें. अशा रीतीनें ज्यांचीं कर्मे परिपक्व झालीं आहेत अशा सर्व सज्जनलोकांस कृतार्थ करीत करीत. ॥४०॥ शिवदर्शनाची आवड करणारा रेणुकाचार्य आपलें सामर्थ्य सर्वांस दाखवूं लागला. त्यानें कितीएक अन्यमती पाखंडी आणि दुर्वर्तनी लोकांस जिंकून त्यांस ताळ्यावर आणिलें. ॥ ४१ ॥ कितीएक सिद्धांचे समुदाय शिवमताचा द्वेष करीत असून यंत्र, मंत्र कला वगैरे करून प्रौढि मिरवीत होते त्यांस त्यानें आपल्या सामर्थ्यानें (चातुर्यानें) जिंकून त्यांस शिवागमाची अभिरुचि लावून दिली. असा जागोजाग शिवसिद्धांताचा प्रसार करीत करीत रेणुकाचार्य आपल्या कोल्लिपाकि नांवाच्या नगरास परत आला.

तत्र संभावितः सर्वैर्जनैः शिवपरायणैः ॥
सोमनाथाभिधानस्य शिवस्य प्राप मंदिरम् ॥ ४२ ॥

व्याख्यानं—संभावितः सत्कृत इत्यर्थः शिष्टं स्पष्टं ॥ ४२ ॥

अर्थ–॥ ४२ ॥ तेव्हां तेथील सर्व शैवधर्मी लोकांनीं त्याचा मोठा आदरसत्कार केला नंतर त्या सर्व मंडळीसहित रेणुकाचार्य कोलिपाकि नगरांतील सोमनाथाचे मंदिरास येऊन पोंचला.

पश्यतां तत्र सर्वेषां भक्तानां शिवयोगिनाम् ॥
तन्वानो विस्मयं भावैस्तुष्टाव परमेश्वरम् ॥ ४३ ॥

व्याख्यानं—भावैर्निर्मलगुणैरित्यर्थः विस्मयमाश्चर्यं तन्वानः विस्तारयन्नित्यर्थः ॥ ४३ ॥

अर्थ–॥ ४३ ॥ तेथें येतांच रेणुकाचार्यानें सर्व शिवयोगी लोकांसमक्ष त्यांस आश्चर्य वाटेल अशा तऱ्हेनें शिवस्तुति करण्यास आरंभ केला.

अवतरणिका–अथ सप्तभिः सूत्रैः सोमेश्वरस्य स्तुतिं करोति—

देवदेव जगन्नाथ जगत्कारणकारण ॥
ब्रह्मविष्णुसुराधीशवंद्यमानपदांबुज ॥ ४४ ॥

व्याख्यानं—अत्र जगच्छब्देन भुवनान्युच्यंते तत्कारणीभूतबिंदुमायादीनामपि कारणीभूत इत्यर्थः ॥ ४४ ॥

अर्थ–॥ ४४ ॥ हे देवाधिदेवा, आपण सर्व त्रैलोक्याचे ईश्वर आहां, सर्व जग उत्पन्न होण्याला ज्या ज्या वस्तूंची अवश्यकता असेल त्या त्या सर्व वस्तूंस आपली अवश्यकता आहे इतकी आपली योग्यता मोठी आहे. आपलें चरणकमल ब्रह्मदेव, विष्णु वगैरे देवांचेही देव देखील वंदन करितात.

संसारनाटकभ्रांतिकलानिर्वहणप्रद ॥
समस्तवेदवेदांतपरिबोधितवैभव ॥ ४५ ॥

व्याख्यानं—संसारनाटकभ्रांतिकलाजयप्रद इत्यर्थः ॥ ४५ ॥

अर्थ–॥ ४५ ॥ ईश्वरा, आपण संसारनाटकांतील हरएकप्रकारचें अज्ञान दूर करणारे आहां, सर्व वेद आणि उपनिषदें आपल्या महत्वाचें वर्णन करितात त्यामुळें आपलें महत्व समजलें नाहीं तर समजलें नसतें.

संसारवैद्य सर्वज्ञ सर्वशक्तिनिरंकुश ॥
सच्चिदानंद सर्वस्व परमाकाशविग्रह ॥ ४६ ॥

व्याख्यानं—आकाशशरीरं ब्रह्मेतिश्रुतेः चिदाकाशस्वरूप इत्यर्थः ॥ शिष्टं स्पष्टं ॥ ४६ ॥

अर्थ-॥ ४६ ॥ संसाररूपरोग दूर करणारे आपण वैद्य आहां, आपण सर्वज्ञ आहां, आपण सर्वांपेक्षां शक्तिमान् असून आपल्या शक्तीस कोठेंच प्रतिबंध होत नाहीं आपण सत् चित् आणि आनंद ह्या गुणांचे मुख्यस्थान आहां, आपलें स्वरूप चिदंबर आहे.

समस्तजगदाधारज्योतिर्लिंगविजृंभण ॥
सदाशिवमुखानेकदिव्यमूर्तिकलाधर ॥ ४७ ॥

व्याख्यानं—"ज्वाललिंगाय नम" इति श्रुतेः ज्योतिर्लिंगस्वरूपेण जृंभमाणेत्यर्थः "स्थिरेभिरंगैः पुरुरूप उग्र" इति श्रुतेः सकलनिष्कलसदाशिवप्रभृतिदिव्यमूर्तिकलाधरेत्यर्थः अत्र "स एको रुद्रः स ईशानः स भगवान् स महेश्वरः स महादेव" इति श्रुतिः ॥ ४७ ॥

अर्थ-॥ ४७ ॥ आपण सर्व त्रैलोक्यास आधारभूत आहां, तेजोमय लिंगांत आपण राहतां, सदाशिव, शंकर वगैरे आपणास अनेक नांवें आहेत.

गुणत्रयपदातीत मलत्रयविनाशन ॥
जगत्रयविलासात्मन् श्रुतित्रयविलोचन ॥ ४८ ॥

व्याख्यानं—सत्वरजस्तमोगुणस्थानातीतआणवकार्मणमायिकाख्यमलत्रयोन्मूलनकर स्वर्गमर्त्यपाताललक्षणजगत्रयसृष्ट्यादिपंचकृत्यक्रीडाविलासोन्मुख ऋग्यजुःसामाख्यश्रुतित्रयविलोचनेत्यर्थः ॥ ४८ ॥

अर्थ-॥ ४८ ॥ सत्व, रजस्तमगुणांचा आपणास संपर्क नाहीं, त्यापेक्षां आपण फार श्रेष्ठ आहां, आपण, मायाकार्मिकमलांचा नाश करणारे आहां, सर्वजगामध्यें आपण पूर्णपणानें भरलेले आहां, ऋग्वेद, यजुर्वेद, सामवेद हे तीन वेद आपले डोळेच आहेत.

पाहि मां परमेशान पाहि मां पार्वतीपते ॥
त्वदाज्ञया मयैतावत्कालमात्रं महीतले ॥
अचारि भवदुक्तानामागमानां प्रसिद्धये ॥ ४९ ॥

व्याख्यानं—स्पष्टं ॥ ४९ ॥

अर्थ-॥ ४९ ॥ हे परमेश्वरा, हे पार्वतीपते, आपण माझें रक्षण करा, माझें रक्षण करा. आपल्या आज्ञेप्रमाणें मी इतके दिवस पृथ्वीवर आपण सांगितलेल्या आगमांची प्रसिद्धि होण्याकरितां राहिलों इतकेंच.

अतः परं स्वरूपं ते प्राप्तुकामोऽस्मि शंकर ॥
अंतरं देहि मे किंचिदनुकंपाविशेषतः ॥ ५० ॥

व्याख्यानं—भो शंकर सुखकर तेन प्रसिद्ध सोमेश्वर अतः परं इतः परमित्यर्थः अहं ते स्वरूपं लब्धुकामोऽस्मि मे राम अंतरंमवकाशं देहि अनुकंपां कृपां विशेषतो देहि कुर्वित्यर्थः ॥ ५० ॥

अर्थ-॥ ५० ॥ शंकरा आतां ह्यापुढें मी आपल्या स्वरूपांत लीन होण्याची (सामरस्य पावण्याची) इच्छा करितों. ह्यासाठीं मजवर मोठी कृपा करून कांहीं थोडें अंतर (जागा) घ्या ह्मणजे मी आपल्या लिंगांत प्रवेश करीन.

अवतरणिका—अथ वृत्तत्रयेण शिवप्रसन्नतां रेवणसिद्धेश्वरस्य लिंगैक्यं च प्रतिपादयति—

वृत्तं—इत्युक्ते गणनायकेन सहसा लिंगात्ततः शांकरा-
द्वत्सागच्छ महानुभाव भवतो भक्त्या प्रसन्नोऽस्म्यहम् ॥
इत्युच्चैरगदाद्वचस्तनुभृतामाश्चर्यमासीत्तदा
दिव्यो दुंदुभिराननाद गगने पुष्पं ववर्षुर्गणाः ॥ ५१ ॥

व्याख्यानं—गणनायकेन रेवणसिद्धेश्वरेण इत्युक्ते एवं विज्ञापिते सति सहसा तत्क्षणेन शांकरात् ततः लिंगात् सोमेश्वरलिंगात् भो महानुभाव निगमागमेषु महानिश्चयबुद्धिमन् वत्स रेवणसिद्धाख्यकुमार भवतस्तव भक्त्या नवविधभक्त्या अहं प्रसन्नोऽस्मि आगच्छ आयाहीति वचः शिवः उच्चैरगदात् अवादीत् तदा तस्मिन् समये तनुभृतां शरीरिणां आश्चर्यं कौतुकं आसीत् गगने दिव्यो दुंदुभिः देवदुंदुभिः आननाद सर्वत्र ध्वनितवान् गणाः प्रमथगणा देवगणाश्च पुष्पं कुसुमवृष्टिं ववर्षुः इत्यर्थः ॥ ५१ ॥

अर्थ-॥ ५१ ॥ रेणुकाचार्यांनें अशी स्तुति केल्याबरोबर एकाएकीं त्या शंकर लिंगापासून "मुला ये, तुझें सामर्थ्य अलौकिक आहे, तुझ्या भक्तीमुळें मी तुला प्रसन्न आहें" असा मोठ्यानें शब्द निघाला तो ऐकतांक्षणीं सर्व लोकांस मोठें आश्चर्य वाटलें. त्याचवेळीं आकाशांत देवांनीं दुंदुभि (नगारे) वाजविले व विद्याधरांनीं रेणुकाचार्यांवर फुलांचा वर्षाव केला.

C. N. Kalburgi

वृत्तं—श्रुत्वा लिंगाद्वचनमुदितं शांकरं सानुकंपं
संहृष्टात्मा गणपतिरथो ज्योतिषा दीप्यमानः ॥
जातोत्कंठैः परमनुचरैर्योगिभिः स्तूयमानो
ज्योतिर्लिंगं परमनुविशत्स्वप्रकाशं तदानीम् ॥ ५२ ॥

व्याख्यानं—अथो पुष्पवृष्ट्यनंतरं संहृष्टात्मा संतुष्टचित्तः गणपतिः शिवगण-

पतिः श्रीरेवणसिद्धः ज्योतिषा शिवप्रकाशेन दीप्यमानः प्रकाशमानः सन् लिंगात् सोमेशलिंगात् उदितं उद्भूतं सानुकंपं कृपासहितं शांकरं वचनं शिवसंबंधिवचनं पूर्वोक्तवाक्यं श्रुत्वा जातोत्कंठैः उद्भूताश्चर्यवद्भिः अनुचरैः सहचरैः शिवयोगिभिः परमधिकतया स्तूयमानः सन् तदानीं तस्मिन् समये परं सर्वोत्कृष्टं स्वप्रकाशं निजप्रकाशरूपं ज्योतिर्लिंगं "तस्य भासा सर्वमिदं विभाति तमेव भांतमनुभाति सर्वं" इति श्रुतिसिद्धचिल्लिंगं अनुविशत् स्वरूपहानिवृद्धिव्यतिरेकेण सामरस्येन प्रविष्टवानित्यर्थः ॥ ५२ ॥

अर्थ–॥ ५२ ॥ तें शंकरलिंगापासून दयाळूपणाचे निघालेले शब्द ऐकतांच रेणुकाचार्यास मोठा संतोष वाटला व तो तेजःपुंज दिसूं लागला रेणुकाचार्य गुप्त होतो असें समजतांच त्याचें दर्शन पुन्हां होणार नाहीं म्हणून त्याच्या दर्शनाविषयीं उतावीळ झालेल्या शिवयोग्यांनीं त्याची फार स्तुति केली. नंतर सर्व लोकांसमक्ष रेणुकाचार्य तेव्हांच त्या तेजःपुंज व स्वयंप्रकाश सोमनाथलिंगांत गुप्त झाला.

लीने तस्मिन् शांकरे स्वप्रकाशे दिव्याकारे रेणुके सिद्धनाथे ॥
सर्वो लोको विस्मितोऽभूत्तदानीं शैवी भक्तिः सप्रमाणा बभूव॥५३॥

व्याख्यानं—दिव्याकारे मनोहरस्वरूपे रेणुके सिद्धनाथे रेवणसिद्धेश्वरे स्वप्रकाशे शांकरे तस्मिन् लिंगे सोमेशलिंगे लीने सति ऐक्यंगते सति सर्वो लोकः समस्तजनः विस्मितः आश्चर्ययुक्तः आसीत् । तदानीं तस्मिन् काले शैवी भक्तिः शिवसंबंधिनी भक्तिः सप्रमाणा प्रमाणेन सहवर्तमाना बभूव आसीदित्यर्थः ॥ ५३ ॥

अर्थ–॥ ५३ ॥ त्या स्वयंप्रकाश सोमनाथ लिंगांत तो सुस्वरूप रेणुकाचार्य गुप्त झाला असतां तो अद्भुत चमत्कार पाहून सर्वलोकांस मोठें आश्चर्य वाटलें व तेव्हां शैवभक्ति सर्वलोकांच्या अनुभवास आली.

अवतरणिका–अथास्य ग्रंथस्य माहात्म्यमाह—

वृत्तं–श्रीवेदागमवीरशैवसरणिं श्रीषट्स्थलोद्यन्मणिं
श्रीजीवेश्वरयोगपद्मतरणिं श्रीगोप्यचिंतामणिम् ॥
श्रीसिद्धांतशिखामणिं लिखयिता यस्तं लिखित्वा परान्
श्रुत्वा श्रावयिता स याति विमलां भुक्तिं च मुक्तिं पराम् ॥५४॥

इति श्रीमत्षट्स्थलब्रह्मिणा शिवयोगिनाम्ना रेणुकाचार्येण विरचिते वीरशैवधर्मनिर्णये सिद्धांतशिखामणौ रेणुकविभीषणसंवादे रेणुकशिवलिंगैक्यप्रसंगो नामैकविंशतीयः परिच्छेदः समाप्तः ॥

व्याख्यानं—वेदागमवीरशैवसरणिं मंगलकरसकलसमयशास्त्रोसग्वेदागमप्रतिप वीरशैवसरणिरिव सरणिर्यस्येत्यर्थः श्रीषट्स्थलोद्यन्मणिं मंगलात्मकैकोत्तरशतस्थलरूपांगलिंगषट्स्थलमार्गप्रकाशनशाणोल्लीढरत्नं श्रीजीवेश्वरयोगपद्मतरणिं शोभमानजीवपरमैक्यलक्षणकमलविकसनार्कं श्रीगोप्यचिंतामणिं मंगलकरशिवरहस्यार्थप्रकाशनचिंतारत्नं तं श्रीसिद्धांतशिखामण्याख्यवीरशैवशास्त्रं यो लिखित्वा परान् लेखयिता यः श्रुत्वा परान् श्रावयिता सः विमलां भुक्तिं परां मुक्तिं च याति प्राप्नोतीत्यर्थः ॥ ५४ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्रीमरितोंटदार्येण विरचितायां तत्वप्रदीपिकाख्यायां सिद्धान्तशिखामणिव्याख्यायां रेणुकविभीषणसंवादे रेणुकशिवलिंगैक्यप्रसंगो नामैकविंशतीयः परिच्छेदः समाप्तः ॥

अर्थ–॥ ५४ ॥ हा सिद्धान्तशिखामणि ग्रंथ वीरशैवलोकांस वेद आणि शैवागम ह्यांचा मार्ग दाखविणारा आहे, षट्स्थलांचा प्रकाश करणारा (षट्स्थलें दाखविणारा) रत्नदीपच आहे, जीव आणि ईश्वर यांचें ऐक्य ह्या कमलांस सूर्यासारखा आहे (सूर्य कमलांस प्रफुल्लित करितो त्याप्रमाणें हा ग्रंथ वाचल्यानें जीवाचें शिवाशीं ऐक्य होतें.) गुप्त ठेवावयाच्या चिंतामणिरत्नाप्रमाणें महत्वाचा आहे. हा ग्रंथ जो कोणी लिहील किंवा लिहवील, ऐकेल आणि इतरांसही ऐकवील तो पुरुष निष्पापरीतीच्या भुक्तिसुखाचा आणि मुक्तिसुखाचा उपभोग घेईल. त्याला ह्या लोकीं सुख लागून तो मरणानंतर स्वर्गास जाईल.

ह्याप्रमाणें वीरशैवांच्या धर्माचा निर्णय असणाऱ्या सिद्धान्तशिखामणिग्रंथांतील रेणुकाचार्य आणि बिभीषण ह्यांचा संवाद आणि रेणुकाचार्य शिवलिंगांत गुप्त झाला हें वर्णन असलेला हा एकविसावा भाग संपला.

श्रीसिद्धांतशिखामणिः समाप्तः ॥

सी. एन. कालगुर्गी.

॥ श्रीशिवाय नमः ॥



पंचाचार्यपंचमोत्पत्तिक्रमवर्णन.

वीरशैवलिंगिब्राह्मणांना आपलें सूत्र, गोत्र, शाखा, प्रवर वगैरे समजणें अवश्यक आहे. ह्मणून, *सुप्रबोधागमांत श्रीपरमेश्वराची पांच मुखें सद्योजात, वामदेव, अघोर, तत्पुरुष व ईशान यांपासून रेवणाराध्य, मरुळाराध्य, एकोरामाराध्य, पंडिताराध्य, आणि विश्वाराध्य हे पांचजण आचार्य अनुक्रमें उत्पन्न झाले. त्यांची जन्मभूमि सिंहासनाधिपत्यस्थानें, त्यांचीं गोत्रें, त्यांचीं महासूत्रें, प्रवर, शाखा, कलशांचे धातु, त्यांचीं तत्वें, बीजमंत्र (बीजाक्षर), व प्रत्येक महासूत्राचीं उपसूत्रें सांगितलीं आहेत. त्याचप्रमाणें पंचवक्त्र गणाधीश्वराचीं पांच मुखें सद्योजात, वामदेव, अघोर, तत्पुरुष, ईशान यापासून अनुक्रमें मखारि, कालारि; पुरारि, स्मरारि, वेदारि हे मुख्य पंचम उत्पन्न झाले. त्यांचे गुरु, त्यांचीं गोत्रें, सूत्रें, प्रवर, शाखा वगैरे क्रमवार माहिती सांगितली आहे ती ज्याची त्यास समजावी यासाठीं पुढील पृष्ठावर दिली आहे.

---

*पाशुपत तंत्र वगैरे ग्रंथांत ह्मटलें आहे कीं, सद्योजातमुखापासून मरुळाराध्य, वामदेव मुखापासून एकोरामाराध्य, अघोरमुखापासून रेवणाराध्य, तत्पुरुषमुखापासून पंडिताराध्य, आणि ईशानमुखापासून विश्वाराध्य, उत्पन्न झाले. परंतु आह्मांस तर सुप्रबोधागमावरून, पंचतत्वावरून व पंचप्रणवावरून (बीजाक्षर मंत्रावरून) असें दिसतें कीं, सद्योजातमुखापासून रेवणाराध्य व वामदेवमुखापासून मरुळाराध्य, अघोरमुखापासून एकोरामाराध्य, तत्पुरुषमुखापासून पंडिताराध्य आणि ईशानमुखापासून विश्वाराध्य उत्पन्न झाले हेंच खरें आहे.

सुखबोधागमांतर्गतपंचाचार्योत्पत्तिगोत्रसूत्रादिमालिका.

परमेश्वराचीं पांचमुखें.	सद्योजात.	वामदेव.	अघोर.	तत्पुरुष.	ईशान.
पंचाचार्यांचीं नांवें.	रेवणाराध्य.	मरुळाराध्य.	एकोरामाराध्य.	पंडिताराध्य.	विश्वाराध्य.
त्यांची जन्मभूमि.	कोल्लिपाकी क्षेत्रांत सोमेश लिंगापासून जन्म.	वटक्षेत्रांत सिद्धेश लिंगापासून जन्म.	धातुकुंड क्षेत्रांत श्रीमल्लिकार्जुन लिंगापासूनजन्म.	द्राक्षाराम क्षेत्रांत रामनाथ लिंगापासून जन्म.	काशी क्षेत्रांत विश्वेश्वर लिंगापासून जन्म
सिंहासनाधिपत्यस्थानें.	रंभापुरी (बाळी हळ्ळी)	उज्जयनीपुरी	श्रीशैलपर्वत.	हिमवत्केदार.	कोल्लिपाकी (काशी)
त्यांचीं गोत्रें.	वीर.	नंदि.	वृषभ.	भृंगी.	स्कन्द
त्यांचें सूत्र.	पडविडि.	वृष्टि.	मुक्तागुच्छ.	लंबन.	पंचवर्ण
त्यांचे प्रवर.	वीरशैव.	वीरशैव.	वीरशैव.	वीरशैव.	वीरशैव
त्यांच्याशाखा	ऋग्वेद	यजुर्वेद.	सामवेद.	अथर्वणवेद.	अजपवेद
कलशांचे धातु.	सोनें.	रुपें.	तांबें.	लोखंड.	शिसें
त्यांचें तत्व.	पृथ्वी.	आप्	तेज.	वायु.	आकाश
त्यांचेबीजमंत्र(बीजाक्षर)	नकार.	मकार.	शिकार.	वाकार.	यकार
महासूत्रांची उपसूत्रें १	पुराण	लोहकंथा	गोणीकंथा	त्रिपुटी	पंचवर्ण
२	पच्छकंथा	स्वर्णकंथा	दंती	रज्जु	कंबाल
३	षडंग	शृंगी	जठर	कंथा	वृषभ
४	सुरगि	मसणी	त्रिगुण	भस्मी	दशवक्त्र
५	महिषी	कुठार	केशकंथा	शिखरी	जरत्कंथा
६	दिगंबर	भैत्री	ललाट	रौप्य	पंचमुख
७	वेणी	कठार	व्याघ्रकंथा	चंद्रगुंड	गुहाग्र
८	भित्ति	चामरी	लोचन	भृत्कंथा	गोचर
९	मोरट	कवाट	भगिनी	काष्टक	गगन्
१०	नाटी	कुक्षकंथा	जालकंथा	पवन	मुसली
११	शौरी	ज्वलत्कंथा	नटन	रामगिरि	लगुड
१२	मुसडी	सिंहीः	[illegible]डि	खड्गी	शिथिली

पंचवक्त्र गणाधीश्वराचीं पांच मुखें.	सद्योजात	वामदेव	अघोर	तत्पुरुष	ईशान
मुख्य पंचमांचीं नांवें.	मखारि	कालारि	पुरारि	स्मरारि	वेदारि
पंचमांचे गुरु.	रेवणाराध्य	मरुळाराध्य	एकोरामा०	पंडिताराध्य	विश्वाराध्य
पंचमांचीं गोत्रें	वीर	नंदि	वृषभ	भृंगि	स्कंद
पंचमांचीं सूत्रें	पडिविडि	वृष्टि	मुक्तागच्छ	लंबन	पंचवर्ण
पंचमांचे प्रवर	वीरशैव	वीरशैव	वीरशैव	वीरशैव	वीरशैव
पंच शाखा.	ऋग्वेद	यजुर्वेद	सामवेद	अथर्वणवेद	अजपवेद
पंचमांचे कलशांचे धातु	सोनें	रुपें	तांबें	लोखंड	शिसें
पंचमांचीं तत्वें	पृथ्वी	आप्	तेज	वायु	आकाश
त्यांचे बीजमंत्र (बीजाक्षर)	नकार	मकार	शिकार	वाकार	यकार
पंचमांचे उपपंचम १	शतांग	केशराक्ष	अग्नियुक्त	सहस्रशीर्ष	पश्चाद्दक्
२	प्रमुख	मृगारि	हारीत	पीतांग	विश्वपुष्ट
३	शर्कर	नाकेश	जाबाल	नगमाल	गोमुख
४	वृषभ	वृषण	निर्जर	निराशन	गिरिवक्त्र
५	सहस्राक्ष	शिलांग	निशित	यमद्युति	सुवर्णनखर
६	धर्म	शृंगशीर्ष	शशांक	सप्तांग	[illegible]ंघ्रि
७	विषम	नीलांबर	ललाटाक्ष	लतांग	दशानन
८	मोचक	कुहासन	कराक्षक	मृत्युनाशन	विषानन
९	वृकभेदी	शतबाहु	पादास्य	अतनु	उग्रदेह
१०	कुंजरारि	बहुजिव्ह	विकटांग	घोटवक्त्र	शतपद
११	[illegible]शेष	नागदंत	शिलाद	नीरोग	सहस्रस्कंद
१२	शि[illegible]खहरित्	षणावपु	हरिन्मुख	भव	त्रिमुखस्कंद

* पंचमांच्या गुरूंचे जें सूत्र, गोत्र वगैरे आहे तेंच सूत्र, गोत्र वगैरे त्या पंचमांपासून उत्पन्न झालेल्या उपपंचमांचें आहे असें समजावें.

C. N. Kalburgi.

विक्रीस तयार.

1. शिवपरअभंग. ... ...
2. शिवोत्कर्षकीर्तनतरंगिणी भाग १ ला. ... ...
3. ,, भाग २ रा. ... ...
4. ,, भाग ३ रा. ... ...
5. मराठी सिद्धरामेश्वर चरित्र. ... ...

C. N. Halburgi

सी. एन. कल्बुर्गी.

C. N. Halburgi